अर्वाचीनसंस्कृतम् (७/१)

१५ जनवरी, १९८५ ई०

विषय-सूची

विषयः	लेखकः	पृष्ठाङ्कः
१. सम्पादकीयम्	सम्पादकः	१—४
२. कृष्णात् परं किमपि तत्त्वमहं न जाने	आचार्य श्री रमेशचन्द्र शुक्लः, दिल्ली	५—२८
३. श्लोकमञ्जरी	डा० विन्ध्येश्वरी प्रसाद मिश्रः 'विनयः', सागरः	२९—४४
४. इन्दिरागीतिः	श्री श्रीसुन्दरराजः दिल्ली	४५—५६
५. धातस्त्वया किं कृतम् !	डा० उमारमण झा जम्मू	५७— ५८
६. हन्तेन्दिरार्या सहसा प्रयाता !	प्रा० हरिश्चन्द्र रेणापुरकरः, गुलबर्गा	५९ – ६१
७. कूहा	डा० उमाकान्त शुक्लः मुजफ़्फ़रनगरम् (उ०प्र०)	६२—७१
८. अभिनव-प्रकाशन-चर्चा	रमाकान्त शुक्लः	७२—७६
९. देववाणी-परिषद्वार्ता	रमा शुक्ला	७७—७८
१०. संस्कृत-जगद्वार्ता	,,	७९—८०

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् Rs. 20 (भारते)
पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)

Annual Subscription
Rs. 20.00 (In India)
5 Dollars or 2 Pounds (Abroad) + Postage charges

सम्पादकीयम्

अर्वाचीनसंस्कृतम् सप्तमे वर्षे पदं निदधाति । सप्तमवर्षीये प्रथमे काव्यमये ऽस्मिन्नङ्के आचार्यश्रीरमेशचन्द्रशुक्लप्रणीतं 'कृष्णात्परं किमपि तत्त्वमहं न जाने' इत्येतत्स्तोत्रकाव्यं, डा० विन्ध्येश्वरीप्रसादमिश्र-प्रणीता 'श्लोकमञ्जरी' श्री श्रीसुन्दरराज-डा० उमारमणझा-श्रीहरिश्चन्द्र रेणापुरकर - डा० उमाकान्त-शुक्लानां स्व० श्रीमतीम् इन्दिरागाँधि-महाभागामवलम्ब्य कविताचतुष्टयम्, अभिनवप्रकाशनचर्चा, देववाणी-परिषद्वार्ता संस्कृत-जगद्वार्ता च प्रकाश्यन्ते ।

'कृष्णात्परं किमपि तत्त्वमहं न जाने'— इत्येतस्मिन् शतककाव्ये आचार्य-वर्य्यैः शुक्लमहाभागैः 'कृष्णात्परं किमपि तत्त्वमहं न जाने' इत्येतन्मुकुटालङ्कृता एकादशोत्तरशतं वसन्ततिलका विरचिता यासु भगवतः कृष्णस्य प्रमुखाः जीवनलीलाः सरलसंस्कृतभाषायां प्रस्तुताः सन्ति । केषुचित्पद्येषु चतुर्थ-चरणात्पूर्वं त्रयः पादाः श्रीकृष्णस्य विशेषणैः समलङ्कृताः, केषुचिच्च विशेषण पदवन्धरूपेण ।

कविनास्मिन् काव्ये गीतायाः सारोऽपि पुनराख्यातः । ५२तमपद्यात्प्रभृति श्रीकृष्णोक्तवाक्यांशरूपेण गीताश्लोकानां भावाः स्वशब्दैरुपन्यस्ताः ।

आचार्यशुक्लमहाभागैरितः पूर्वं 'श्रीकृष्णचरितं' नाम महाकाव्यमपि श्रीकृष्णस्य विषये व्यरचि । अस्मिन् स्तोत्रकाव्ये च आचार्यमहाभागानां भगवतः कृष्णरूपे भक्तिभावः समुल्लसति । नूनमस्याः कृतेः साम्प्रतिकसंस्कृत-भक्तिकाव्येषु उल्लेखनीयं स्थानमस्ति ।

डा० विन्ध्येश्वरीप्रसादमिश्रस्य जन्म २०१२ तमे वैक्रमाब्दे (१९५६ ई०) माघमासे शुक्लचतुर्थ्यां मध्यप्रदेशस्य 'छतरपुर'-मण्डलान्तर्गते 'पहरा' ग्रामे कान्यकुब्जमिश्रान्वये कात्यायनसगोत्रे पं० उमादत्तमिश्रमहाभागानां गृहे समभूत् । हिन्दी-भाषायां बाल्यादेवास्य कवितानिर्माणशक्तेः समुन्मेषः समदृश्यत । अनेन हाईस्कूलकक्षायामेव 'व्रजनिधि', 'कुन्तल का सम्राट्' इत्येत-दादिखण्डकाव्य-स्फुटगीतानां निर्माणं कृतम् । द्वादशकक्षायामस्य संस्कृतकाव्य-रचनाप्रसृतिरजायत । प्रतिभापरीतेन श्रीमिश्रमहाभागेन द्वादशकक्षां याव-द्विज्ञानविषयमधिकृत्य पश्चाच्च कलाविषयानङ्गीकृत्य सर्वोत्कर्षत्वेन रीवाँ-विश्व-विद्यालयतः स्नातकपरीक्षोत्तीर्णा । तदनन्तरं काशीहिन्दूविश्वविद्यालयतः संस्कृत-साहित्ये प्रथमश्रेण्यां स्नातकपरीक्षोत्तीर्णा । तदनु तत एव 'श्रीमद्भागवते

कृष्णकथाविमर्शः' इति विषयमूरीकृत्य 'पीएच०डी०' उपाधिः समधिगतः। अद्यत्वे डा० मिश्रमहाभागः सागरस्थे डा० हरिसिंहगौरविश्वविद्यालये संस्कृत-विभागे प्रवक्तास्ति। अस्य महानुभावस्यानेका रचना अनेकासु पत्रिकासु प्रकाशिताः सन्ति, अनेकाश्च अप्रकाशिता एव तिष्ठन्ति।

श्लोकमञ्जर्यां कविना प्रथमं मङ्गलमाचरितम्। मङ्गलाचरणे प्रथमं भगवती वाग्देवी स्तुता, तदनु लक्ष्मीनारायणस्य कृपाकांक्षिता, तदनु च दुकूल-चौरस्य घटभंजनपटोः धूमालकस्य अंगुलिपर्वधृतपर्वतस्य (श्रीकृष्णस्य) स्तुति विहिता। इतः परं **'श्रीमारुतिनुति'**-शीर्षके चतुर्षु श्लोकेषु प्रपन्नपरिपालकस्य, दनुजजालदहनस्य, कपीन्द्रकुलवल्लभस्य, सततरामचन्द्रप्रियस्य, रामकीर्तनपरस्य, भक्तशिरोमणेः, रामायण-कथानटस्य श्रीमतो हनुमतः स्तुतिर्विहिता। तदनु **'नुतिषोडश्यां'** षोडशपद्यैः कविभारत्याः सरस्वत्या विशदा नुतिः समाचरिता। ततः परं **'पिकपञ्चदश्यां'** पञ्चदशमन्दाक्रान्तासु कस्याश्चित् कृष्ण-वियोगिन्याः बल्लव्याः विरहोद्गाराः पिकं प्रति प्रकाशिताः। इयं हि गोपी कृष्णाय स्वदशां निवेदयितुं पिकं मधुपुरं गमयति। ततः **'रङ्गपञ्चके'** पञ्चपद्येषु व्रज-होलिका-क्रीडा सखीमुखेन वर्णिता। अतः परं **'वसन्तोल्लासः'** इति शीर्षके नवपद्यैः वसन्तागमे उत्कण्ठिताया नायिकायाः दशा वर्णिता। ततश्च **'शरद्वर्णनम्'** सखीमुखेन वर्णितम्। **'शकुन्तविलसिते'** शुक-सारिकासंवादं तनोति कविः, यत्र उभयोरपि परस्परम् आक्षेप-प्रत्याक्षेपान सरससरण्या प्रस्तौति। शुकः सारिकायाः 'सारिके'ति नामैव वृथा उद्घोषयति, यतो हि सा निःसारे पलाश-पत्रे सारकामनया भ्रमति :—

> **श्यामे कटूक्तिकुशले वामे तव नाम सारिकेति वृथा।**
> **भ्रमसि पलाशपलाशे निःसारे सारकामनया॥** (पृ० २७)

कविनातः परं शुकं विषयीकृत्य चतस्रोऽन्योक्तय प्रस्तुताः। ततश्च **'भद्रमूर्तिः'** **'गजाननं वन्दे'**, **'स्मरामि'**, **वागीश्वरी पातु वः'**, **'सज्ज्ञानचर्चासुधा'**, **'वसतु मे वदने सुरभारती'**, **'देववाणीम्'**, **'भिन्नरुचिर्हि लोकः'**, **'न जानीमहे'**, **'विद्युल्लता'**, **'वारिदाः'** चेति समस्यानां पूर्तिर्विविधेषु वृत्तेषु अलंकृतसरण्या कृता।

कविनात्र क्वचिदलंकृत-पद्धतिमनुसृत्य क्वचन च अति स्वाभाविकतया काव्यमिषेण सुभाषित-विधानमपि कृतम्।

इत्थं **'श्लोकमञ्जर्यां'** पारम्परिकशैली प्रधानतोऽङ्गीकृता कविना। आर्या-स्रग्धरा-शार्दूलविक्रीडित-पृथ्वी-मालिनी-अनुष्टुप्-मन्दाक्रान्ता-पुष्पिताग्रा-वसन्ततिलका-उपेन्द्रवज्रा-द्रुतविलम्बित-हरिणी-वृत्तेषु कविना विषयानुसारं वैदर्भी गौडी वा शैली समवलम्बिता। कविना शरद्वर्णने व्रजभाषायाः कवित्त-सवैया-दोहा-छन्दांस्यपि सफलतया प्रयुक्तानि।

१९८४ तमेशवीयेऽब्दे विश्वस्य महती हानिरभवत् श्रीमत्या इन्दिरागांधि-महाभागायास्तत्सुरक्षापुरुषाभ्यां कृतया जघन्यया हत्यया। ३१.१०.१९८४ ई० तारिकायामयं हि गुलिकाप्रहारो भारतस्य सामासिकसंस्कृतेर्वक्षसि जातः। न केवलं सम्पूर्णं भारतमपि तु समस्तमेव विश्वमनया हत्यया स्तब्धं खिन्नं चाभूत्। अनेकासु भाषासु कविभिः स्वमनोव्यथा गद्य-पद्य-रूपेण प्रकटिता। संस्कृतेऽपि नैकैः रचनाकारैः श्रीमतीमिन्दिरागांधिमहाभागामवलम्ब्य नैका रचनाः कृता।

श्रीमत्या इन्दिरागान्धिमहाभागाया व्यक्तित्वस्येदमनितरसाधारणं वैशिष्ट्यमासीत् यत्सा स्वप्रशंसकानाम् आलोचकानां च कृते समानरूपेण आकर्षणं धत्ते स्म। तस्या जीवनस्य प्रमुखा घटनाश्चित्रयद्भिः संस्कृतरचनाकारैस्तस्या राष्ट्रसेवि दृढनिश्चयि रूपमेव प्रधानतो वर्णितम्। सा यदपि कार्यमकरोत् तत्समानान्तरमेव कोऽपि न कोऽपि संस्कृतरचनाकारस्तस्योल्लेखं स्वरचनायामकरोत्। इदमेकत इन्दिराया आकर्षकव्यक्तित्वस्य अपरतश्च संस्कृतरचनाकाराणां वर्तमानं प्रति जागरूकताया: परिचायकमस्ति।

तस्याः महायात्रादिवसेष्वेव न जाने कियत्यो रचनाः संस्कृते जाताः। श्रीश्रीसुन्दरराजेन १.११.१९८४ तारिकायां प्रातः दूरभाषेणाहं सूचितो यत्तेन भावाभिभूतेन सता ३१.१०.१९८४ तारिकायां रात्रावेव ६७ श्लोकास्तामवलम्ब्य प्रणीताः, येषु इन्दिरागांधिमहाभागायाः ६७ तमवर्षं यावत् जीवनगाथाः अंकिता। त एव श्लोका '**इन्दिरागीति**'-शीर्षकेणात्र प्रकाश्यन्ते।

डा० उमारमणझामहाभागस्य '**धातस्त्वया किं कृतम्**' श्री हरिश्चन्द्र रेणापुरकर-महाभागस्य '**हन्तेन्दिरार्या सहसा प्रयाता**' च कविते अपि भावाभिभूतहृदययोः स्वाभाविकोद्गारभूते स्तः।

११-११-१९८४ ई० तारिकायां प्रारब्धे १९-११-१९८४ तारिकायां च सम्पूर्णे '**कूहा**'-इत्येतस्मिन् प्रबन्धकाव्ये डा० उमाकान्त शुक्लेन इन्दिराया अस्थिभस्मनां हिमालयशृङ्गेषु राजीवगान्धिद्वारा विसर्जनं वर्णितम्। कविः प्रथमं हिमालस्य गौरवं शोभां च वर्णयति। तदनु राजीवगान्धिद्वारा स्वमातुरस्थिभस्मनस्तत्र विकिरणं चित्रयति। हिमालात्प्रतिनिवर्तमानः श्रीराजीवः स्वमातुः स्मरणं करोति। अस्मिन् प्रसंगे इन्दिराया जीवनचरितं संक्षेपतो वर्णयति कविः। तदनन्तरमेकादशपद्येषु श्रीराजीवगान्धिः देशस्य कल्याणकामनां करोति, तद्यथा:—

"अन्त्येष्टिकार्यैः सममेव तस्याः समाप्यते सम्प्रति लोकयात्रा।
अतः परं वैभवसिद्धिलक्ष्या प्रवर्ततां भारतदेशयात्रा॥"

कल्याणकामनां प्रकुर्वन् स निजराजधानीं समायाति, आप्तबोध सन् भारतमातुः सेवार्थं सर्वात्मना तत्परश्च भवति।

अस्मिन् काव्ये इन्दिरया ३०-१०-१९८४ तारिकायां कृतस्य भाषणस्यापि चर्चा कविना कृता, यथा—

यदि स्वदेशं खलु सेवमाना हता तदा स्यां विषयः स्मयस्य।
जाने मदीयं प्रतिबिन्दुरक्तं देशोन्नतेर्यास्यति कारणत्वम्॥
(६८)

भारतवासिभिः कृताः जयोद्घोषा अपि कविनाऽत्र निबद्धाः, यथा—

यावद्रविस्तिष्ठति यावदिन्दुर्यावच्च तारा धरणिश्च सिन्धुः।
तावद्यशः स्थास्यति ते धरायां तुषारहारावलिशुभ्रमम्ब॥
(८६)

कविना काव्यस्यास्य सुखान्तता अतीव कौशलेन संरक्षिता

चतसृष्वपि कवितासु स्वर्गीयायै श्रीमत्यै इन्दिरागान्धिमहाभागायै श्रद्धाञ्जलयः कविभिः समर्पिताः सन्ति।

संस्कृत-साहित्ये इन्दिरा-विषयिण्यः प्रभूता रचनाः प्रणीताः सन्ति। शोधार्थिन एतासां तुलनात्मकमध्ययनं कर्तुं समुत्सुका भविष्यन्तीति आशास्यते।

अभिनवप्रकाशनचर्चायां, देववाणी-परिषद्वार्तायां संस्कृतजगद्वार्तायां च शीर्षकानुसारं सामग्री दीयते।

अर्वाचीनसंस्कृतस्य अस्मिन्नंके पृष्ठसंख्या परिवर्धिता किन्तु मूल्यं सप्तवर्ष-पुरातनमेवास्ति। अग्रिमेऽङ्के पृष्ठसंख्या न्यूनतां यास्यति। पाठकानां सहयोगाय कृतज्ञतामावहामि तेभ्यश्च नूतनवर्षाभिनन्दनं व्याहरामि।

विदुषामाश्रवः

रमाकान्त शुक्लः

(डा० रमाकान्त शुक्लः)
प्रधानसम्पादकः

१५.१.१९८५ ई०
आर ६, वाणी-विहारः
नयी दिल्ली-११००५९

श्री :

कृष्णात् परं किमपि तत्त्वमहं न जाने

रचयिता

आचार्य डा० रमेशचन्द्र शुक्लः
एम० ए०, पी-एच० डी०
सांख्ययोगाचार्यः, साहित्याचार्यः, साहित्यरत्नम्
श्रीमोतीनाथसंस्कृतमहाविद्यालयस्य साहित्य-विभागे
शास्त्रचूडामणिपण्डितः
नयी दिल्ली-११००५९

श्रीः

(१)

मातुर्विधातुरखिलाधिपदीनबन्धो-
स्त्रातुर्दयामयहृदः परमप्रकाशात् ।
दैन्यार्तिभेदनपटोः सुहृदः समेषां
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(२)

संसाररक्षकपवित्रमतिप्रदातुः
सन्मार्गदर्शकचराचरवासकर्तुः ।
ज्ञानात्मनो ह्यमितशक्तिनिधेरुदारात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(३)

तेजोऽभिवन्दित सुरासुरदैत्यनाग-
गन्धर्वकिन्नरनरादिसमस्तसेव्यात्
शान्तिप्रदान्मृदुलधीरसहिष्णुचित्तात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(४)

दुर्नीतिगामिशठदुर्जनदुष्टवृन्द-
विध्वंसनक्षमभुजस्थिरशौर्य्यधाम्नः ।
सन्मानवावनपरात् सरसस्वभावात्
कृष्णात् परं किमति तत्त्वमहं न जाने ।।

(५)

सूर्येन्दुभौमशनिशुक्रवृहस्पतीनां
सोमात्मजादिकसरिद्विपिनोदधीनाम्
स्रष्टुश्च लोकविविधाद्भुतसुन्दराणां
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(६)

सिंहद्विपादिमृगहिंस्रवनोद्भवानां
कर्तुर्मयूरशुकहंसविहङ्गमानाम् ।
अम्भोजुषां रचयितुर्मकरादिकानां
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(७)

सर्पादिदारुणकठोरविषश्रितानां
जन्त्वाद्यनेकबहुभीषणकर्मभाजाम् ।
स्रष्टुश्च कीटमृदुगात्रभृतां बहूनां
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(८)

क्षोणीरुहां कुसुमपत्रफलश्रितानां
नानावनस्पतिलताहितकारिणीनाम् ।
धातू रुजाक्षयकृतां विविधौषधीनां
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(९)

ध्यायन्ति योगिमुनयोऽखिलसाधवो यं
देवास्तपस्विसुधियः सुजना अजस्रम् ।
तस्मात् समग्रभुवनाधिपतेरनन्तात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१०)

योगेश्वरात् सकलवेदमयान्मुरारे-
रन्तःस्थितादसुभृतां प्रकृतेः परस्तात् ।
श्रीनन्दनन्दनमुकुन्दसरोजनेत्रात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(११)

मायाम्बरावृतहरेर्वसुदेवसूनो-
र्भक्तप्रियादखिलरक्षकधर्ममूलात् ।
नारायणादमृतरूपशिवस्वरूपात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१२)

विष्णोरजाद् भगवतः स्थितिसर्गहेतो-
रात्मागमाद् भुवनसर्वपतेरलक्ष्यात् ।
ईशानकालपुरुषोत्तमदेवदेवात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१३)

वृन्दाटवीविहरणस्थितचित्तभृङ्गाद्
राधाप्रियाद् व्रजमहीहृदयप्रसादात् ।
प्रेमस्वरूपमधुरस्मितमञ्जुलाभात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१४)

यः पातिता व्रजजनेषु महापदो द्राग्
दूरीचकार शरणागतसाधुचेताः ।
अत्यन्तदारुणकठोरतमा हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१५)

गोवर्धनं करधृतं हि विधाय गोपान्
गोपीश्च गाः सुरपतेर्घनघोरवृष्टेः ।
पाति स्म यो व्रजधरारमणात्तु तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१६)

तां पूतनां कपटरूपधरां जघान
योऽरिष्टकेशिवलिनावपि धेनुकं च ।
चाणूरभीषणबलं न्यवधीद्धि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१७)

हत्वा हि कंसनृपतिं भृशनिन्द्यकृत्यं
मातुः पितुश्च विपदं हृतवान् द्रुतं यः ।
तस्मात् सुनीतिपथगाच्छुभकार्यलग्नात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१८)

लीलां निशम्य मनसाऽनुदिनं यदीयाम्
उक्त्वा च यस्य सुखधामकथां मनुष्याः ।
मुक्तिं प्रयान्ति तरसा सदयाद्धि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१९)

नीत्या हरिर्मगधनाथमजीघतद् यो
भूपांश्च वन्दिसदनात् त्वरयाथ तस्य ।
मुक्तांश्चकार शतशो हितकृच्च तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(२०)

लोकेऽत्र विश्वगतविष्णुरनुग्रहार्थं
प्रादुर्बभूव वसुदेवसुतो हि भूत्वा ।
योऽनादिदेवपरमेश्वर एव तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(२१)

सर्वेश्वरात् सुजनकष्टहराद् रमेशाद्
गोपीमनोहरणकारिविपत्सुबन्धोः ।
श्रीनन्दनन्दनजगद्धितसक्तवृत्तात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(२२)

यज्ञे चकार भगवान् धरणीसुराणां
संक्षालनं चरणयोः श्रुतिपण्डितानाम् ।
ज्ञानस्य योऽप्रतिहतस्य निधिर्हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(२३)

तत्त्वं हरिः श्रुतिमतं पुरुषार्थभूमिः
यः सर्वलोकपरमेश्वरतावसानम् ।
आत्मेश्वरोऽस्त्यखिलजीवपितुर्हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(२४)

राधानुरागहृदयो व्रजभूमिचन्द्रो
यो वेणुभूषितकरो नवमेघवर्णः
तस्मान्मनोज्ञयमुनातटलब्धसौख्यात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(२५)

यस्मिन् विभान्ति नतताधृतितुष्टिपुष्टि-
कीर्तिश्रियोऽनुपमबुद्धिनयज्ञतेऽपि ।
शूरत्वशास्त्रपटुतादिगुणाश्च तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(२६)

आगांसि चेदिनृपतेः शिशुपालनाम्नः
सेहे शतं शममतिर्धृतिमांस्ततो यः ।
चक्रेण तस्य च शिरो हि चकर्त तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(२७)

व्यक्ते स्थितो वपुषि यः स्वयमेव नास्ति
व्यक्तो विभाति च हरिः प्रलयेऽपि सृष्टेः ।
नित्यो भवन् रचयिता जगतां हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(२८)

पाण्डोः सुता वसुमतीं सकलामजैषुः
सम्राड् बभूव च तदग्रजधर्मराजः ।
यस्येश्वरस्य दययाऽमितया हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(२९)

नग्नां विधातुमलगद् द्रुपदस्य वत्सां
दुःशासनो हतमतिस्तु यदा सभायाम् ।
आर्तां तदा झटिति यो हि जुगोप तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(३०)

चक्रन्द 'मामव हरे' द्रुपदात्मजेति
श्रुत्वार्तशब्दमतिशीघ्रमधावदेव ।
योऽनाथनाथकरुणालुमना हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(३१)

दुर्योधनः कुटिलधीर्निरवासयत् तान्
पाण्डोः सुतानभिययौ द्रुतमीक्षितुं यः ।
धर्मध्वगामिबलबुद्धिधनाद्धि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(३२)

दुर्वाससो मुनिवरस्य ररक्ष कोपात्
तान् पाण्डवान् विपिनवासिनिरागसो यः ।
स्थालीस्थपत्रमुपभुज्य हरिर्हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।

(३३)

भूत्वागमत् कुरुहितप्रियशान्तिदूतो
दुर्योधनस्य भवनं न च तत्र भोज्यम् ।
जग्राह यो विदितपुण्यमतिर्हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(३४)

न्यायानुकूलशुभलोकयशस्करं यद्
वाक्योत्तमं कुरुकुलस्य कृते जगाद ।
यः पुण्यवज्जनमतं मधुरं हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(३५)

शस्त्रं ग्रहीष्यति हरिर्न रणे कदापि
पार्थस्तथापि ववरे यदुनन्दनं यम् ।
सत्यप्रियात् सरलताललिताद्धि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(३६)

आपातिता हि विपदोऽतिततरां कठोराः
तस्याः सुतेष्विति रुरोद तदा भणन्ती ।
कुन्ती भृशं यममिताभर्हरि च तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(३७)

भोक्ष्यन्ति राज्यकमलां तनयाः भवत्याः
भूयः स्वसो भम पितुर्निजगाद् यस्ताम् ।
एतत् तदेत्यभिमतं भगवान् हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(३८)

विश्वात्मनः प्रणतदुःखविनाशकर्तुः
श्रीवत्सचिह्नसमलङ्कृतवक्षसो हि ।
पीताम्बरान्निखिललोकपितुः समर्थात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(३९)

तं प्राप्तुमर्हति जितेन्द्रिय एव भक्तः
इत्येतदस्ति कथितं विपये तु यस्य ।
विभ्राजमानवपुषः पुरुषाद्धि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(४०)

जन्ये निहत्य नरकासुरशक्तिमन्तं
भूपात्मजा उदधरञ्च सहस्रशो यः
प्राग्ज्योतिषञ्च विदधौ सुगमं हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(४१)

क्राथं मुरं द्विविदमाहुतिशैव्यशाल्वान्
भीमान् बले च शतधन्वकसेरुमन्तौ ।
अन्यांश्च यो युधि पराजयते स्म तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(४२)

दिव्यस्वरूपशुचिपौरुषरम्यभव्यात्
विश्वार्चितादखिलयोगविदामधीशात् ।
विद्यानिषेव्ययममञ्जुलसौम्यचित्तात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(४३)

उद्धारकादनुपमाच्छरणागतानां
पापात्मनामपि च पावनकारिणो वै ।
दारिद्र्यदुःखविनिवारणदक्षनाथात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(४४)

जाताः प्रचण्डबलिनोऽसुरषट्सहस्र-
संख्यागता अपि न धर्तुमशक्नुवन् यम् ।
निर्मोचने तु निबबन्ध हि तांश्च तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(४५)

बाणासुरं हि निजघान च दन्तवक्त्रम्
अन्यांश्च यो भुवनसर्वहिताय दुष्टान् ।
सौजन्यभूषणसुहृत् शुभधाम तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(४६)

युद्धं भवेन्न कुरुपाण्डवयोर्यं ऐच्छत्
यत्नं चकार भृशमेव हरिस्तदर्थम् ।
शान्तिप्रियो हितपरो भगवान् हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(४७)

चन्द्रं हि यस्य हृदयं तरणिश्च चक्षुः
अग्निर्मुखं भगवतोऽद्भुतविक्रमस्य ।
तस्मादनन्तगुणसुन्दरताप्रकर्षात्
कृष्णात् पर किमपि तत्त्वमहं न जाने ।।

(४८)

मत्वा सुखानि जगतः क्षणभङ्गुराणि
संसारसर्वविषयांश्च विचिन्त्य धीराः ।
दुःखप्रदान् यमनिशं हि भजन्ति, तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(४९)

विश्वं विधाय निखिलं निजमायया यः
तत्र प्रविश्य समवस्थित एव गुप्तः ।
तस्मात् गुणत्रयपरात् प्रभुर्निर्विकारात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(५०)

सूक्ष्मातिसूक्ष्मसमदर्शिसुखैकधाम
सत्यस्वरूपविधिशङ्करपूजितो यः ।
तस्मादसीममहिमप्रथिताप्रमेयात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(५१)

बुद्धिस्मृतिप्रदविभोः परमप्रकृष्टाद्
विद्याविभूतिबलसिद्धिसुखप्रदातुः ।
ज्ञानप्रदाद्धृदयकाङ्क्षितवस्तुदातुः
कृष्णात् पर किमपि तत्त्वमहं न जाने ॥

(५२)

जन्येऽर्जुनं स्वजन-बन्धुकुलं विलोक्य
हित्वा धनुः स्थितमुवाच रथे विषण्णम् ।
क्लैव्यं न पार्थं भज सम्प्रति यो हि तस्मात्
कृष्णात् पर किमपि तत्त्वमहं न जाने ॥

(५३)

एतन्न युक्तमधुना हृदयस्य कार्श्यं
मुक्त्वा हि तद् भव रणाय समुद्यतस्त्वम् ।
प्रोचेऽर्जुनं य इति योगपतिर्हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(५४)

शोच्यं न यद् भवति शोचसि तत्र पार्थं
शोचन्त्यनित्यमगतांश्च गतान् न विज्ञाः ।
ऊचे हसन्निति तदा य इदं हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(५५)

शीतोष्णदुःखसुखदो विषयेन्द्रियाणां
संयोग एष विदितोऽस्ति विनश्वरो यः
सह्यः शशंस स इति प्रभुरेव तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(५६)

आत्मामरो न हि स याति कदापि नाशं
नित्यं शरीरमिदमस्ति न, तत् त्वनित्यम् ।
युध्यस्व योऽवददिदं परिचिन्त्य तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(५७)

जीर्णं विहाय वसनं हि यथा मनुष्यो
वस्ते नवं वपुरिदं परिमुच्य पार्थ ।
नूत्नं तथेति लभते य उवाच तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(५८)

बुद्ध्यान्वितस्त्यजति पुण्यमपुण्यमूचे
योगाय संलग हृदार्जुन सर्वथा यः ।
योगस्तु कर्मपटुतेति च पार्थ तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(५९)

कामान् विहाय मनुजो लभते हि शान्ति
वीतावलेपविगतस्पृहनिर्ममः सन् ।
इत्थं च यो वदति विश्वपितुर्हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(६०)

लाभञ्च हानिमथ दुःखसुखे विचार्य
तुल्ये रणे भव रतो विजयाजयौ च ।
नाघं प्रयास्यसि य इत्यगदच्च तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(६१)

कर्मं त्वमाचर धनञ्जय सर्वदैव
बुद्धिं निधेहि न फले न च ते कदापि ।
सङ्गस्त्वकर्मणि भवेद् य उवाच तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(६२)

सङ्गं विहाय कुरु कर्म हि योगनिष्ठः
सिद्ध्यां समोऽथ च भवेति समो ह्यसिद्ध्याम् ।
एतच्छशंस भगवानपि यश्च तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(६३)

कर्मेन्द्रियाणि हठपूर्वकमेव रुद्ध्वा
योऽर्थान् हृदा स्मरति मन्दमतिर्मनुष्यः ।
मिथ्याध्वगः स हरिरित्यवदत्तु तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(६४)

यज्ञाय कर्म चर मुक्तिकरं तदस्ति
ह्यन्यच्च बन्धनकरं नितरां जहीहि ।
स्वार्थं स्वकीयमिति यो गदति स्म तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(६५)

स्तेनोऽस्ति यो हि न ददाति जनः सुरेभ्यो
यज्ञैः प्रसन्नमनसो ददते भृशं ते ।
भोगान् प्रियानिति जगाद च यो हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(६६)

श्रेष्ठो यदाचरति तज्जनतापि नूनं तत् तत्
सर्वोऽग्रजस्य कुरुतेऽनुकृतिं नितान्तम् ।
प्रोचे हरिर्यं इति सर्वहिताय तस्मात्
कृष्णात् पर किमपि तत्त्वमहं न जाने ।।

(६७)

आध्यात्मिके हृदि वसन् हि भवन् निराशीः
कर्मार्पितं च विदधन्मयि पार्थ युद्धे ।
युध्यस्व निर्मम इति न्यगदच्च तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(६८)

कर्माणि यस्य भुवि कामविवर्जितानि
ज्ञानाग्निना स बुध एव जनेन येन
दग्धानि तानि य इति न्यगदच्च तस्मात्
कृष्णात् पर किमपि तत्त्वमहं न जाने ।।

(६९)

यज्ञावशिष्टमममृतं मनुजाः पिबन्ति
ये ब्रह्म ते सपदि यान्ति सनातनं वै ।
नायज्ञिनस्त्विवति हरियं उवाच तस्मात्
कृष्णात् पर किमपि तत्त्वमहं न जाने ।।

(७०)

कर्माखिलं परिसमाप्तिमुपैति यज्ञे
द्रव्यादियज्ञविविधाद् य उवाच चेति ।
ज्ञानाभिधो गुरुतरोऽस्ति मखो हि तस्मात्
कृष्णात् पर किमपि तत्त्वमहं न जाने ।।

(७१)

अज्ञानसम्भवमनोगतसंशयं त्वं
ज्ञानासिना झटिति कृन्त तथा च योगम् ।
आतिष्ठ पार्थ इति यो वदति स्म तस्मात्
कृष्णात् पर किमपि तत्त्वमहं न जाने ॥

(७२)

येषां स्थितं सततमेव मनस्तु साम्ये
ब्रह्मस्थिता अभिहिता मनुजा बुधैस्ते ।
प्रोचे य एवमिति सर्वसमो हि तस्मात्
कृष्णान् परं किमपि तत्त्वमहं न जाने ॥

(७३)

ये सर्वभूतहितकर्मसु लग्नचित्ता:
नि:संशया ऋषिजना गतकल्मषास्ते ।
ब्रह्म प्रयान्ति य उवाच मुदेति तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(७४)

भोक्तारमिष्टितपसां सुहृदं समेषां
ज्ञात्वा हरिं सकललोकमहेश्वरं माम् ।
प्राप्नोति शान्तिमिति यश्च जगाद तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(७५)

कार्यं स्वकर्म कुरुते हि फलं विहाय
ज्ञानी स योगनिरतो न निरग्न्यकर्मा ।
योऽब्रूत वाचमिति भूतसुहृच्च तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(७६)

मन्येत कश्चिदधमं न कदापि ना स्वं
स्वं तारयेत् स्वपरमश्रमपूर्वकं सः ।
'आत्मैव बन्धु' रिति यो भणति स्म तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(७७)

भूतानि पश्यति स आत्मनि योगयुक्तो
भूतस्थितं स्वमपि किञ्च समोऽस्ति दृष्ट्याम् ।
ऊचे हरिर्यं इति पार्थमिदं हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(७८)

योगी सदात्मसदृशं भुवि भूतमात्रं
दुःखं सुखं च सममेव हि मन्यतेऽत्र ।
श्रेष्ठः स यो ह्यभिदधाविति साधु तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(७९)

अभ्यासशक्तिमुपयुज्य हि दुर्ग्रहं हृद्
वैराग्यसाधनमुपेत्य करोत्यधीनम् ।
धीरोऽब्रवीद् य इति चक्रधरोऽथ तस्मात्
कृष्णात् परं किमति तत्त्वमहं न जाने ॥

(८०)

कल्याणकृत् पुरुप एति न दुर्गतिञ्च
नाशोऽपि नो भवति तस्य कदापि पार्थ ।
श्रीवल्लभो य इति भाषितवांस्तु तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(८१)

अभ्यन्तरे हि सकलान् भवतीति तुष्टः
स्वीयात्मना त्यजति यो हृदयस्थकामान् ।
गीतोऽस्त्यसौ स्थिरमतिर्निजगाद तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(८२)

दुःखानि यान्ति विलयं सकलानि तस्य
चित्तं प्रसीदति च तत्र मतिः प्रशस्ता ।
यो मामनुस्मरति नित्यमिति प्रवक्तुः
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(८३)

या रात्रिरस्ति जगतोऽसुभृतां हि तस्यां
जागर्ति योगनिरतोऽथ च जाग्रतीति ।
भूतानि सः स्वपिति यो निजगाद तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(८४)

नो ज्ञानवान् न च तपस्विजनोऽपि कश्चित्
कर्मी न कोऽपि न कदापि च योगितुल्यः ।
योगी भव त्वमिति योऽत्त उवाच तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(८५)

भूतानि सन्ति मयि तेषु वसामि नाहम्
अव्यक्तमूर्तिहरिणेति ततं मयैतत् ।
ब्रूते स्म योऽखिलजगद् भगवांश्च तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(८६)

त्वां सर्वथा प्रकृतिशक्तिमहं हि कृत्स्नं
संस्तभ्य भूतनिचयं विसृजामि चेमम् ।
आचष्ट यः प्रभुरिति प्रियमेव तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(८७)

सर्वं जगत् सृजति मामकशासनेन
ह्येषाखिलप्रकृतिरापरिवर्तते च ।
विश्वम्भरो वदति यो भगवांस्तु तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(८८)

भर्ता प्रभुश्च शरणं प्रभवोऽपि चाहं
वीजं सुहृद् गतिलयौ च निधिर्हि साक्षी ।
स्थानाव्ययं य इति पार्थमुवाच तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(८९)

ध्यायन्ति ये मनसि मां तु जना अनन्याः
भारं वहामि सततं ह्यहमेव तेषाम् ।
इत्थं जगाद भगवानपि यश्च तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(९०)

अश्नासि यच्च कुरुषे हि जुहोषि यत् त्वं
दत्से च तप्स्यसि कुरुष्व मदर्पणं तत् ।
पार्थं हरिर्य इति वाचमुवाच तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(६१)

योऽनन्यभाग् यदि जनो भजते भवन् मां
दुष्टोऽपि तं सुजनमेव विदाङ्कुरु त्वम् ।
सन्निश्चयोऽयमिति भाषितवान् हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(६२)

योऽदीदृशत् परममैश्वरविश्वरूपं
योगाधिराज भगवान् हरिरर्जुनं स्वम् ।
भक्तं प्रियं प्रति कृपालुपिता हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(६३)

गाण्डीवचापधरवीरजगत्प्रसिद्धः
रूपं विलोक्य भृशदीप्तहुताशवक्त्रम् ।
कम्पं गतोऽर्जुन इति प्रभयान्वितार्द्धै
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(६४)

सम्प्रेक्ष्य यस्य हि वपुः परमेद्धदिव्यं
भीतोऽवदद् झटिति यं नितरां मनोज्ञम् ।
रूपं प्रदर्शय तदेव तवेश तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(६५)

भक्त्याहमस्मि तु परंतप पार्थ शक्यो
ज्ञातुं प्रवेष्टुमपि तत्त्वत उक्तवान् यः ।
मान्यो जगत्यखिललोकपतिर्हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(९६)

नेजःप्रभावनिधिशाश्वतधर्मगोप्ता
दीप्ताप्रमेयबलपौरुषवेदितन्यः ।
वंद्योऽस्ति यो विधिशिवादिगणस्य तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(९७)

श्रेयोमनोज्ञललितप्रवरप्रकृष्ट-
धामास्ति यः परमपूरुष आदिदेवः ।
वेद्योऽपि यो निखिलसृष्टिपिता च तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(९८)

कृत्वेन्द्रियाणि सकलानि वशंगतानि
सर्वत्र सन् सममतिर्जगतीहितस्थः ।
प्राप्नोति मामिति य ईश उवाच तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(९९)

आधत्स्व नैजहृदयं मयि सर्वथेति
नित्यं निवेशय मतिं भगवान् य ऊचे ।
मय्येव वत्स्यसि सुनिश्चय एष तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१००)

मित्रे रिपौ च सम एव तथापमाने
माने च कर्मणि न कर्त्रभिमानयुक्तः ।
सम्यग् गुणान् स जयतीति य आह तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१०१)

एषोऽस्ति जीवनिवहोऽत्र च जीवलोके
ह्यंशः सनातनहरेः परमेश्वरस्य ।
ब्रह्मैव तद्धि सदसत् सुखधाम तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(१०२)

आशानिबद्धमनुजाः धनसञ्चयस्थाः
कोपान्विता विषयभोगरता नरा ये ।
नूनं पतन्ति नरके वदतो हि चेत्थं
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(१०३)

कामं त्यजेच्च मतिमानथ कोपलोभौ
जह्यादिदं त्रयमपि द्रुतमेव मर्त्यः ।
नारायणो य इति वाचमुवाच तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(१०४)

उत्सृज्य यो जगति शास्त्रविधिं मनुष्यः
स्वाच्छन्द्यमाश्रयति सिद्धिमुपैति नासौ ।
यो भाषते स्म समदृष्टिरिदं हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(१०५)

दानं हि सात्त्विकमदोऽनुपकारिणेऽपि
यत् पात्रदेशसमयानवलोक्य दत्तम् ।
सम्यग् य एतदिति चोपदिदेश तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

(१०६)

हेयं न कर्म सहजं ह्यखिलानि सन्ति
कर्माणि दोषसहितान्यत एव तानि ।
त्याज्यानि नेति भगवान् य उवाच तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१०७)

यज्ञस्तपोऽप्यथ च पावनकर्म दानं
त्याज्यानि सन्ति न सदा सुधिया क्रियेरन् ।
चख्यौ प्रभुर्वच इदं मधुरं तु तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१०८)

माता पिता प्रियसुहृत् सुजनः सुबन्धुः
दाता गुरुः परमपोषणकृत् प्रभुर्यः ।
आर्तार्तिहारिकरुणालुपतिर्हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१०९)

यस्यावलम्बममितं परमप्रकृष्टं
संप्राप्य पाण्डुतनया हि विपत्समुद्रम् ।
तेरुः स्वराज्यमलभन्त महच्च तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(११०)

साधून् ररक्ष भुवि यस्त्वरया ह्यसाधून्
सम्यग् जिहिंस भगवान् हरिराहवेऽत्र ।
धर्मं स्थितं च कृतवान् नृहिताय तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ॥

(१११)

दीनोऽहमेष हृतधीः करुणालुचित्तं
साधुस्वभावशरणागतवत्सलं यम् ।
नौमि प्रभुं सविनयं प्रणतो हि तस्मात्
कृष्णात् परं किमपि तत्त्वमहं न जाने ।।

शुभमस्तु !

श्लोकमञ्जरी

(रचयिता : डा० विन्ध्येश्वरीप्रसाद मिश्रः 'विनयः')

१. मङ्गलम्

वन्दे वृन्दारकाराध्यां वन्दारुजनवन्दिताम् ।
नन्दितां नादनिष्यन्दैर्वाग्देवीं मङ्गलप्रदाम् ।।

चञ्चच्चामीकराभां चलविचलरणत्किङ्किणिक्वाणरम्या-
मानन्दैकाम्बुराशिं मधुकरनिकरैर्गुञ्जितामङ्घ्रिपद्माम् ।
वीणां संलालयन्तीं मृदुरणनविधौ मूर्च्छनां भावयन्तीं
वन्दे कल्याणवल्लीं विविधबुधनतां शारदां शास्त्रविद्याम् ।।

नव्यन्यायनिरूपणापथिपरं पारङ्गतान् पण्डितान्
श्रोतॄन् वा कठिनाक्षरक्षरणतासंवारणायोद्यतान् ।
नानारत्ननिवासगौरवगुणे रम्यस्थले 'सागरे'
लक्ष्मीलक्षणलक्षितस्तदधुना नारायणः पातु नः ।।

पटप्रमोषी घटभंजने पटुः धूमालकश्चाङ्गुलिपर्वपर्वतः ।
अह्नाय वह्निं पिबति स्म यो वने स नीलमेघः स्यतु मेऽघराशिम्

श्रीमारुतिनुतिः

प्रपन्नपरिपालकं दनुजजालसंज्वालकं
मुनीन्द्रवनचन्दनं विनतमञ्जनानन्दनम् ।
कपीन्द्रकुलवल्लभं सततरामचन्द्रप्रभं
नमामि कपिकुञ्जरं कपटवानरं शङ्करम् ।।१।।

ललितमथ सुगायन् क्वापि नृत्यनप्रसन्नः
कलितमुखरवाण्या कीर्त्तयन् रामकीर्त्तिम् ।
चलितवलययुग्मं नादयन् ताललग्नो
मधुररसरसिकोऽयं मारुतिः पातु भक्तान् ।।२।।

मर्कटौघभटं शश्वद्विकटोद्भटसङ्घटम् ।
पिङ्गलाक्षिजटं ध्यायेद्रामायणकथानटम् ।।३।।

नानाकर्कशतर्कजालविपुलध्वान्ताध्वनि प्रस्थितान्
नानावादविवादडिण्डिमनदद्घोषान् स्वपक्षस्थितान् ।
नानान्यायनिरूपणैकधिषणाधौरेयकान् धीमता-
माह्लादेन युनक्ति यत्तु सुतरां तत्तत्त्वमेकं नुमः ।।

२. नुति-षोडशी

जय नलिनीदलनयने धवलितचंद्रांशुमञ्जुलायतने ।
सुचिरविरोधाभासे भाषाभावात्मिके रुचिरे ।।१।।

जय दुग्धाम्बुधिवीचीक्षालितडिण्डीरपिण्डितस्वाङ्गे ।
त्रैलोक्यशब्दसारे सारान्विते त्रिजगद्धात्रि ।।२।।

जय'विन्दु-नाद'-महिते नितरां साहित्यशेमुषीगम्ये ।
रम्ये रम्यविलासे मञ्जुलहासाञ्चिते विमले ।।३।।

जय सङ्गीतसुधानदनन्दितनिष्यन्दरागरंगयुते ।
वीणाक्वणननिलीने कूजत्कलकण्ठिके मुग्धे ।।४।।

मुग्धे दुग्धसुधासिन्धुतरङ्गोज्ज्वलमञ्जुले ।
मङ्गले मन्दबुद्धिं मां स्मर त्वं कविभारति ।।५।।

मिलिन्दमाला मकरन्दनिर्भरा
यथाम्बुजे क्रीडति बद्धडम्बरा ।
तथा तवास्योपरि हास्यसङ्गता
विभे विभातीयमथालकावली ॥६॥

स्फुरच्छरच्चन्द्रमरीचिमेदुरे
त्वदीयचूडामणिचारुमस्तके ।
सरस्वति ! व्योमविकासतारक-
श्रिया बभौ चन्दनविन्दुरञ्जसा ॥७॥

सिते ! तवापाङ्गतरङ्गनिर्झरीं
भ्रुवावपि त्रातुमितो न पारगे ।
अतस्तु पक्ष्मान्ततटे नु वञ्चिते
त्रिवक्रनक्राकृतिके बभूवतुः ॥८॥

तवाधरं बिम्बविडम्बि पाटलं
सुबिम्बितं वीक्ष्य हि दन्तमौक्तिके ।
इयं प्रलुब्धा ननु नासिकाशुकी
ग्रहीतुकामा प्रतिभाति भारति ॥९॥

कपोलपाली तव केशराङ्किता
कलङ्कमुक्तेव शशाङ्कपट्टिका ।
क्व तालपत्रं बत गौरवं श्रयेत्
तव श्रुतिं चेन्निपुणं न भासयेत् ॥१०॥

तव वदननिकुञ्जे पुञ्जिता पूर्णशोभा
तव वदनविरामे रञ्जिता वेदविद्या ।
तव वदनविलासे भासिता च स्वयं श्री-
स्तव वदनविकासे काशते ब्रह्मतत्त्वम् ॥११॥

अमलकमलकोमलाङ्घ्रिशीले
सकलकलानदराजहंसि पुण्ये ।
कविकुलनवकुञ्जकूजिते त्वं
कुरु करुणामिह कोकिलेऽद्य वाणि ।।१२।।

मातः ! कृपामयि विवेकविधानदक्षे
प्रेमालये परममंगलमंजुलास्ये ।
वीणानिनादनिरते स्वरगुञ्जिते मां
दीनं पुनीहि नितरां विमले वरेण्ये ।।१३।।

भास्वच्छशाङ्ककिरणावलिविग्रहे हे
हेलाजिताखिलसुधामधुदुग्धसारे ।
वैदुष्यदानचतुरे चरणाश्रितं मां
दीनं पुनीहि नितरां विमले वरेण्ये ।।१४।।

करुणावरुणालयेऽनवद्ये मुदमाङ्गल्यतरङ्गशोभिगङ्गे ।
तवपादसरोजसम्पुटेऽयं रमतान्मे ननु चित्तचंचरीकः ।।१५।।

तव चिन्तनवन्दने ममैका मतिरम्भोजविलासिनी सुहंसी ।
नितरां तव हंसवामभागे चपलेयं स्थिरतां श्रयेत्कथंचित् ।।१६।।

३. पिक-पञ्चदशी

काचित्कृष्णप्रणयभरिता बल्लवी लग्नचित्ता
याते तस्मिन् व्रजपरिधितस्त्वौग्रसेनीनगर्याम् ।
रम्योद्याने विरहविधुरा भग्नभावा विषण्णा
दृष्ट्वाऽऽयान्तं मधुऋतुपतिं चिन्तयामास भूयः ।।१।।

हन्ताशा मे त्वियमपि गता पूर्ववत् पङ्कजालेऽ-
प्यालेखं वा विधिकृतमहो ! मार्जितुं कः समर्थः ?
मद्भाग्ये हा ! प्रतिदिनमिदं रोदनं चाश्रुपातं
नायातश्चेन्नवघननिभः श्यामलो नन्दसूनुः ॥२॥

कालिन्द्यां यत्पुलिनपटले सञ्चरच्चञ्चरीकै-
र्गुञ्जारावस्फुटितकलिकाः कम्पयन् कुञ्जवल्लीः ।
पश्यालि त्वं तरलितगतिर्वात्यसौ गन्धवाह
इत्थं भावाकुलितवचनैर्बोधयन्ती वयस्याम् ॥३॥

अद्राक्षीत् सा सुरभितशिखां कम्रनम्राम्रशाखां
शाखासंस्थं नवपरभृतं कूजितोन्मादमत्तम् ।
मत्तं चेमं भुवनमखिलं व्यापृतं मोहमन्त्रं
मन्त्राधानप्रवरमथवा मन्त्रिणं मन्मथस्य ॥४॥

स्मृत्वा पूर्वप्रणयिविहितां मञ्जुलां रासकेलिं
श्रुत्वा पूर्वश्रुतकलपदं कोकिलस्यापि बाला ।
दृष्ट्वाग्रे तं सुरभिसमयं कान्तसंरागसिक्तं
तस्मिन्नेव क्षणपरिचयात् किञ्चिदुत्कण्ठिताऽभूत् ॥५॥

"भ्रातः कुञ्जप्रिय ! खगकुलैर्वन्दितो नन्दितस्त्वं
कन्दर्पस्य प्रसरणसखा सारथिश्चाग्रयायी ।
वासन्तिक्यां पवनसरणौ रागसम्भारसेतु-
र्हेतुः सत्यं निधुवनसुखे कामिनामेकबन्धुः ॥६॥

श्रेष्ठस्त्वं भोः पिक ! कलविधौ पञ्चमे लग्नकण्ठः
पञ्चेषोः वा परमदयितः पञ्चबाणप्रतिष्ठः ।
पञ्चप्राणान्हरसि सुतरां किन्तु विश्लेषितानां
पञ्चाग्नौ वा क्षिपसि सततं तत्कथं ब्रूहि हन्त ॥७॥

त्यक्त्वाऽस्मान्नः परमदयितो नन्दगोपालबालः
प्राणाराध्यस्सजलजलदश्यामलः कोमलाङ्गः ।
कुब्जां क्रूरां परमकुटिलां सेवते त्वौग्रसेन्यां
श्रुत्वेत्थं हा विगलितवचो मूकतां किं न धत्से ॥८॥

सेवां कृत्वा विविधविधिना पालिता स्नेहवल्ली
गोपालस्य प्रणयसरणौ सिञ्चिता लालिता या ।
तां प्रोत्तप्तां विरहदहनज्वालितां पाण्डुपर्णां
पश्यामस्त्वं विदलसि पुनश्चित्तमप्यस्मदीयम् ॥९॥

सौम्य ! त्वेतच्छृणु मधुवने कूजने न प्रतिष्ठा
संदग्धानां हृदयदहने कोऽत्र लाभो विहंग !
गत्वा त्वं चेन्मधुपुरपतेश्चित्तमाविष्करोसि
मंस्येऽहं त्वामृतुपतिसखा सत्यमुन्मादकर्त्ता ॥१०॥

एषा धूलीलवविलुलिता पांसुलाऽऽभीरपल्ली
नेयं चामीकरमणिमयी राजधानी वरेण्या ।
क्रोडेऽप्यस्याः विलसति न वा वाटिका कापि रम्या
दग्धं वृन्दावनमिदमहो ! क्षुब्धगोपाङ्गनाली ॥११॥

नास्यां कार्तस्वरभरनता नागरीणां विलासः
किन्तूत्कार्तस्वरभरनता गोपवाटी विषण्णा ।
नेयं लीलाजनितललितारम्भवार्ताऽपि किन्तु
त्वल्लीलासंजनित'ललिता'रम्भनिःश्वासराशिः ॥१२॥

साबाधाऽस्मिन्भ्रमति रुचिरा सन्ततं हन्त ! राधा
संत्रस्ता सा ललितललिता भग्नशाखा 'विशाखा' ।
मुग्धा 'चन्द्रावलि'रियमहो 'रंगदेवी' विषण्णा
रंगानङ्गे क्षिपति विरहव्याधिविक्षिप्तचित्ता ॥१३॥

संचिन्त्यैतत्सकलमधुना याहि तां शौरसेनीं
यस्यां वृष्णिप्रवरनृपतिश्शोभते वासुदेवः ।
तस्योद्याने कुरु कलरुतं कूजनं वाऽतिरम्यं
यस्मिन्नित्यं वसति सशरः सानुजः पुष्पधन्वा ॥१४॥

इत्थं गोपीविरहवचनोद्भूतवक्रोक्तिभङ्गी
श्रीकृष्णस्य स्मरणविधया मञ्जुकल्याणराशिः ।
भावाक्षिप्ता सुकविहृदये कल्पनासङ्गताङ्गी
मन्दाक्रान्ता ललितकवितावृत्तबन्धैर्विभाति ॥१५॥

४. रङ्गपञ्चकम्

वृन्दारण्ये तपनतनयातीरवीथीषु रम्ये
राजत्क्रीडामहसि सुतरां माधवीये विलासे ।
काचित्कुञ्जे वदति मुखरा "शाटिका मे नवीना
मा मा मा मा क्षिप विट ! मुधा श्यामलं स्वीयरङ्गम्" ।१॥

चल सखि नववीथ्यां नीपपुञ्जे निकुञ्जे
विलसति वनमाली यत्र गोपालवृन्दैः ।
प्रहरति किल राधां यन्त्रधाराप्रवाहैः
प्रवहति पथि कुल्यासम्भृतः कोऽपि रङ्गः ॥२॥

अनुसरति मृदङ्गं किङ्किणीनादरम्यः
प्रतिहतवरढक्कां काङ्किणीलास्यलीला ।
नवपिककलकण्ठं वंशिकाऽप्येकताना
विलसति सखि ! वीथ्यां होलिकानृत्यरङ्गः ॥३७॥

हरिरिह नटवेशो गुञ्जपुञ्जावतंसो
विधृतमधुरवेणुश्शोभते वक्रभङ्ग्या ।
सपदि सखि ! तदानीं रङ्गनिक्षेपयन्त्या
कृतमलसविलासैः राधया रागरङ्गः ॥४॥

रङ्गोत्सङ्गात्सुभृङ्गाङ्गैः प्रसरद्भृङ्गमामयः ।
वसन्तोल्लासबालोऽयं जयतात् पञ्चकाश्रितः ॥५॥

५. वसन्तोल्लासः

विलसति मधुमाधवो दिनश्रीः
मधुकरगुञ्जितरञ्जितावनाली ।
विकसितनवमल्लिकावितानं
चलति च मञ्जुलमन्दगन्धवाहः ॥१॥

हरितललितशाद्वलेषु मुग्धा
प्रकिरति पुष्पलता पिशङ्गशोभाम् ।
श्रयति शिरसि कामपीह कान्तिं
मदनसखः सुरसालमञ्जरीकः ॥२॥

कलयति कलकेलिलास्यलीला-
स्तरलतरङ्गवती तरङ्गभङ्गैः ।
रहसि सुरतसीधुसिञ्चितास्ताः
रतिरमणीयनितम्बिनीजनानाम् ॥३॥

मदयति मदविह्वलो वनान्ते
'कुहु-कुहु' कूजित कोकिलोऽतिरम्यः ।
तिरयति तरुणीषु वर्तमानां
गुरुजनगौरवभावितां तु लज्जाम् ॥४॥

कुसुमकलितचापपाणिरेष
प्रसृतविघूर्णितदामपुष्पिताग्रः ।
प्रहरति किल शोभिते वसन्ते
विरहिजनान्नितरां हि पञ्चबाणः ॥५॥

सम्फुल्लिता सुरुचिरा लतिका वनान्ते
संघूर्णिता मधुमयी ननु नर्मदाऽपि ।
संकूजिताऽथ सहकारगता पिकीयं
कान्ते विभासि विमनेव कथं वसन्ते ? ॥६॥

वैदेशिकाः प्रेष्ठजनाः निवृत्ताः
वसन्ति गेहेषु वसन्तकाले ।
त्वं मे वसन् मानसमन्दिरे हा !
कथं बहिर्गच्छसि मुग्ध कान्त !!

सुजनजनमनांस्युन्मादिनी कापि लक्ष्मी-
र्विलसति सविलासा लास्यलीलासु लग्ना ।
मदयति मदपूर्णो घूर्णिताक्षः प्रलीनो
विटपिविटपवृन्ते कोकिलोऽयं वसन्ते ॥८॥

वसन्ते वासन्ती विलसति वनान्ते सुरुचिरा
हसन्ती नृत्यन्ती मधुमुखरकन्दर्पकलना ।
दिगन्तेष्वालिप्ता सखि ! ललितलाक्षारसकला
दिनान्ते संरक्ता हरति नयने कापि सुषमा ॥९॥

६. शरद्वर्णनम्

('सवैया' छन्दसि)

यमुनावटमञ्जुनिकुञ्जघने घनसाररसावलिते विपिने,
विपिने नवनीरजगन्धयुते युतपङ्कजकोषमिलिन्दजने ।
जनमानसमानिनिमानमुदे मुदिताधरपानपुटे कमने ।
कमने ननु रासरसे सुविभाति शरत् सखि ! नैशसरत्पवने ॥

('घनाक्षरी-कवित्त' छंदसि)

कलितकदम्बनिकुरम्बकेलिकुञ्जघने
पुलिने कलिन्दजायाः लघु लघु सा विभाति ।
ललितवनाली परिवेष्टिते नु वृन्दावने
नव्यामेवशोभामावहन्ती तरसा विभाति ॥
वलितनिरभ्रशुभ्रतारकिततारापथ-
सञ्चारामन्दचन्द्रसारसरसा विभाति ।
सरति समीरे सखि ! यामुने गभीरे नीरे
धीरे बलवीरे शरदेषा सहसा विभाति ॥

('दोहा' छन्दसि)

सुतनु ! न सम्प्रति दृश्यते, सरित्पङ्क्तिकला कापि ।
चापल्यान्ननु निर्गता गगनाद् घनच्छटाऽपि ॥

७. शकुन्तविलसितम्

१. शुकसारिका-संवादः

सारिकां प्रति शुकोक्तिः

कान्ते ! किंशुककुड्मलेष्वतितरां किं मृग्यसे सारकं !!
सारासारविवेचने तव मतिर्नैषाऽप्यमुग्धाऽधुना ।
हन्त ! त्वामिदमर्थये पुनरपि द्राक्षारसान्वेषणात् ।
कामं त्वं विरमाधुना शुककुलं मा गर्हय प्रेयसि ॥१॥

सारिकोक्तिः शुकं प्रति

वाचालोऽसि परोक्तिजल्पनपटो ! रे कीर ! का ते कथा ?
स्वात्मानं बहु कत्थसे स्वयमहो ! नान्यं तृणं मन्यसे ।
किं जानासि न निम्बकोटरगतं त्वां सर्वदा सा शुकी
डिम्भादेव तदीयगुच्छकलने माताऽकरोत् पण्डितम् ॥२॥

शुकोक्तिः सारिकां प्रति

श्यामे ! कटूक्तिकुशले वामे तव नाम सारिकेति वृथा ।
भ्रमसि पलाश-पलाशे निःसारे सारकामनया ॥३॥

सारिकोक्तिः शुकं प्रति

शुक ! ते मुखेऽस्ति रागस्त्वन्यत्र नैव दृश्यते क्वापि ।
निम्बफलेष्वनुरागं कुरु, रसिको भव शतञ्जीव ॥४॥

२. अन्योक्तयः

पञ्जरस्थं शुकमवलयोक्य कस्यचिज्जनस्योक्तिः

रुद्धोऽसि लौहसदने सति खेचरत्वे
निष्पक्षतामयसि पक्षयुगं दधानः ।
तुण्डं विखण्डयसि हन्त ! रसानुलिप्तं
वाण्यैकया मधुरया मुषितोऽसि कीर ।।५।।

काकः समुत्पतति दत्तबलिं च भुङ्क्ते
स्वैरं विरौति नहि तस्य कृतेऽस्ति चिन्ता ।
हा हन्त ! लोकसरणीमनवीक्ष्य भद्र !
वाण्यैकया मधुरया मुषितोऽसि कीर ।।६।।

पञ्जरस्थं पठन्तं शुकमवलोक्य कस्याप्युक्तिः

रे कीरीकान्त ! विद्वन् पठ पठ पुरतः शिक्षितं पालकस्य
तावच्छ्लोकं च गीतं ह्यनुसरणविधौ प्राञ्जलं चाटुवृत्त्या ।
तावज्जातीयभाषां विगणयतु भवान् मानुषीवाक्प्रमत्तः
यावद्दास्यापयाते न हि नयनपथं ते विडालो नु यायात् ।।७।।

पञ्जरपालितमवलिप्तं शुकं प्रति मुक्तविहंगमानामुक्तिः

हिरण्मयशलाकया घटितपञ्जरे यद्यपि
प्रकाममुपभुञ्जसे सपदि कीर ! नानारसान् ।
विकीर्णकणभोजकान् यदपि निन्दसेऽस्मादृशान्
न किन्तु परिपश्यसि त्वमिह पक्षहानिं निजाम् ।।८।।

समस्यापूर्तयः

१. भद्रमूर्तिः

प्रोद्वेल्लद्गन्धवारिप्रसरदभिमुखं गण्डयुग्मालवृन्द
न्यक्कर्तुं शुण्डदण्डाप्रचलनरभसोद्विग्नवक्त्रः समन्तात् ।
भ्रान्तिं व्याहन्तुकामः स्फुरदरुणरुचौ शूर्पकर्णौ स्वकीयौ
धुन्वानो वक्रतुण्डः प्रभवतु भवतां भूतये भद्रमूर्तिः ॥

२. गजाननं वन्दे !

अवजानताऽन्तरायान् भवजालं खण्ड्यते येन ।
तमजादिवृन्दवन्द्यं नगजानन्दनगजाननं वन्दे ॥

३. स्मरामि !

क्वचित्तु वृन्दावनकेलिकुञ्जे
क्वचिद्यशोदागृहप्राङ्गणे च ।
क्वचिच्च वीथ्यां सुविहारशीलौ
कृष्णाङ्घ्रिपद्मौ मनसा स्मरामि ॥

४. वागीश्वरी पातु वः

सरिगमपधनि—निलीनां
लीनाङ्घ्रिप्रपन्ननूपुरभृङ्गरुताम् ।
कमलिनीं लसितहंसां
वीणावादनिकां स्मरामः ॥१॥

या कह्लारदलोपमां तनुलतां चन्द्राननेनाञ्चति
हंसे चापि निधाय पादयुगलं या कच्छपीसङ्गता ।
या काञ्चीमणिशिञ्जिताऽप्यनुपदं मौनाब्धिसंस्था परा
सा सर्वाश्रितभावबोधलहरी वागीश्वरी पातु वः ॥

५. सज्ज्ञानचर्चासुधा

माध्वी मोहमलापहा मुदमयी माङ्गल्यमुद्भाविनी
सच्चिद्व्योमविलासवल्गिततरङ्गाकाशगङ्गा परा ।
विद्वद्वृन्दकदम्बकोरककलाकल्याणकादम्बिनी
कैवल्याम्बुतरङ्गिणी विजयते सज्ज्ञानचर्चासुधा ॥

६. वसतु मे वदने सुरभारती

मधुमती रसरीतिसमन्विता
विदितवेदविभावरवर्णिनी ।
स्मृतिपुराणनिकुञ्जविलासिनी
वसतु मे वदने सुरभारती ॥१॥

भरितभावसुधा ध्वनिसंयुता
मधुरताऽऽदिगुणत्रयभूषिता ।
सहृदयादृतवृत्तिविधान्विता
वसतु मे वदने सुरभारती ॥२॥

वाल्मीकिर्व्यासभासौ कविकुलवलये मण्डितः कालिदासः
दण्डी बाणः सुबन्धुः प्रथितपृथुयशा भारविश्चापि माघः ।
श्रीहर्षाद्याः कवीन्द्राः सकलकृतिकृते यां समाराधयन्ति
वन्दे तां ब्रह्मविद्यां श्रुतिसततनुतां संस्कृतां देववाणीम् ॥३॥

७. भिन्नरुचिर्हि लोकः

गूढं समीक्ष्य तिमिरेण जगत्समग्रं
कालाञ्जनाभकलिलं वियदन्तरालम् ।
सप्ताश्ववाहनविटङ्कसमाश्रितश्री-
र्भास्वानुदेति ननु भिन्नरुचिर्हि लोकः ॥

८. न जानीमहे

एके सन्ति निरक्षराः भुवि जनाः मूर्खा इति ख्यापिता-
श्चान्ये वृत्तविखण्डिता बुधजनैस्ते पामराः व्याहृताः ।
एके बुद्धिविवेकशून्यहृदयाः पाशव्यकोटिं गताः
विज्ञा ये हतवृत्तदम्भभरितास्ते के न जानीमहे ॥

९. विद्युल्लता

अज्ञानान्धविजृम्भितान् कलिमलान् सम्मोहयन्ती त्विषा
संदीप्ताऽखिलशब्दशास्त्रनिवहे लुप्ता क्वचिल्लक्षिता।
सच्चित्प्रावृषि मोदधायिनि परब्रह्मैकसंह्लादिनी
राधा पातु मुकुन्दमेघपटले प्रोद्भासिविद्युल्लता।

अस्तम्भूतदिवाकरे दिवि दिपद्ध्वान्तारुणे दिङ्मुखे
वारुण्यां किल कालभूधर इव व्याप्ताभ्रजाले क्वचित्।
घस्रज्योतिमलीमसे त्विह लसद्ब्रह्माण्डभाण्डोदरे
रेखावत् खचिता मयाऽद्य गगने दृष्टा हि विद्युल्लता॥

१०. वारिदाः

दिक्प्रान्ताननुनादयन् गिरितटानुल्लङ्घयन् रंहसा
द्राक् क्षोणीतलसंस्थितान् घनवनानाच्छादयन् मायया।
प्रोषिद्भर्तृकदम्बकान् विधुमुखीसङ्घान् समुन्निद्रयन्
नीपान् कोरकसंहतिं प्रविकिरन् गर्जत्ययं वारिदः॥१॥

सुतनु ! वदने ज्योत्स्नां धृत्वा तदा किल चन्द्रमाः
सपदि तव लावण्यं जेतुं समुत्सहते तदा।
सततकृशतां क्लान्तिं प्राप्तस्त्वयोग्य इति क्रुधा-
श्चिकुरपटलीवर्णैश्छन्नः सुहृत्तव वारिदैः॥२॥

इन्दिरा-गीतिः

(श्री श्रीसुन्दरराजः, आइ०ए०एस०, योजनायोगे
संयुक्तसचिवः, नव दिल्ली-११०००१)

या सन्ततं नयनयोः प्रियदर्शिनीति
तातेन तेन कृतसार्थकनामधेया ।
या श्रीमतीति विदिता भुवि गान्धिनाम्नी
हा हन्त सा गतवती दिवमिन्दिरा नः ॥१॥

नेहरुसुता जनगणाभिमता नयज्ञा
नेत्री न केवलममुष्य हि भारतस्य ।
नेतुं समस्तमपि विश्वमिदं समर्था
नेत्यद्य विश्वसिति नो खलु मानसं मे ॥२॥

सा विश्व एव निखिले प्रथमा प्रधान-
मन्त्रित्वभूतपुरुषगर्वहरा हि नारी ।
भूत्वाऽबलाऽपि सुदृढा स्वमनोबलेन
तन्वी दुरापमपि गौरवमाप पृथ्व्याम् ॥३॥

न व्याधिबाधिततया विकृतान्यभूवन्
नो वा जराक्रमणजानि तदीयदेहे ।
स्वस्था सदा लघुतनुर्युवतीव भूत्वा
स्वस्स्था बभूव निजरक्षकगोलकास्त्रैः ॥४॥

काले कलेः कलहमारणपीडितायाः
भूमेः प्रशासनविधावपि राजतन्त्रे ।
अस्या विलोक्य निपुणत्वमतीन्द्रमस्मान्
दक्षेति रक्षितुमिमाममरा नु निन्युः ॥५॥

९. विद्युल्लता

अज्ञानान्धविजृम्भितान् कलिमलान् सम्मोहयन्ती त्विषा
संदीप्ताऽखिलशब्दशास्त्रनिवहे लुप्ता क्वचिल्लक्षिता ।
सच्चित्प्रावृषि मोदधायिनि परब्रह्मैकसंह्लादिनी
राधा पातु मुकुन्दमेघपटले प्रोद्भासिविद्युल्लता ।

अस्तम्भूतदिवाकरे दिवि दिपद्ध्वान्तारुणे दिङ्मुखे
वारुण्यां किल कालभूधर इव व्याप्ताभ्रजाले क्वचित् ।
घस्रज्योतिमलीमसे त्विह लसद्ब्रह्माण्डभाण्डोदरे
रेखावत् खचिता मयाऽद्य गगने दृष्टा हि विद्युल्लता ॥

१०. वारिदाः

दिक्प्रान्ताननुनादयन् गिरितटानुल्लङ्घयन् रंहसा
द्राक् क्षोणीतलसंस्थितान् घनवनानाच्छादयन् मायया ।
प्रोषिद्भर्तृकदम्बकान् विधुमुखीसङ्घान् समुन्निद्रयन्
नीपान् कोरकसंहतिं प्रविकिरन् गर्जत्ययं वारिदः ॥१॥

सुतनु ! वदने ज्योत्स्नां धृत्वा तदा किल चन्द्रमाः
सपदि तव लावण्यं जेतुं समुत्सहते तदा ।
सततकृशतां क्लान्तिं प्राप्तस्त्वयोग्य इति क्रुधा-
श्चिकुरपटलीवर्णैश्छन्नः सुहृत्तव वारिदैः ॥२॥

इन्दिरा-गीतिः

(श्री श्रीसुन्दरराजः, आइ०ए०एस०, योजनायोगे
संयुक्तसचिवः, नव दिल्ली-११०००१)

या सन्ततं नयनयोः प्रियदर्शिनीति
तातेन तेन कृतसार्थकनामधेया ।
या श्रीमतीति विदिता भुवि गान्धिनाम्नी
हा हन्त सा गतवती दिवमिन्दिरा नः ॥१॥

नेहरुसुता जनगणाभिमता नयज्ञा
नेत्री न केवलममुष्य हि भारतस्य ।
नेतुं समस्तमपि विश्वमिदं समर्था
नेत्यद्य विश्वसिति नो खलु मानसं मे ॥२॥

सा विश्व एव निखिले प्रथमा प्रधान-
मन्त्रित्वभूतपुरुषगर्वहरा हि नारी ।
भूत्वाऽबलाऽपि सुदृढा स्वमनोबलेन
तन्वी दुरापमपि गौरवमाप पृथ्व्याम् ॥३॥

न व्याधिबाधितलया विकृतान्यभूवन्
नो वा जराक्रमणजानि तदीयदेहे ।
स्वस्था सदा लघुतनुर्युवतीव भूत्वा
स्वस्था बभूव निजरक्षकगोलकास्त्रैः ॥४॥

काले कलेः कलहमारणपीडितायाः
भूमेः प्रशासनविधावपि राजतन्त्रे ।
अस्या विलोक्य निपुणत्वमतीन्द्रमस्मान्
दक्षेति रक्षितुमिमाममरा नु निन्युः ॥५॥

स्वातन्त्र्यतः परमभूत्प्रथमप्रधान-
मन्त्री जवाहर इति प्रथितः पिताऽस्याः ।
शास्त्री ततः परमनन्तरमिन्दिरेयं
द्वित्रास्समाः च्युतपदा यदपीह मध्ये ॥६॥

जाता नवे वयसि मातृवियोगतप्ता
लब्धुं न लालनसुखानि शशाक मातुः ।
स्वातन्त्र्ययुद्धनिरतान्न पितुश्च नेह्रोः
सा कर्मतत्परतया किल तस्य नित्यम् ॥७॥

आत्मद्वितीयगतशैशवकारणेन
तिक्तेऽपि सक्तिमियमाप परां विविक्ते ।
वात्सल्यमार्दवदयादिगुणाः प्रकृष्टाः
सिद्धास्स्वयं ववृधिरे हि तथाऽप्यमुष्याम् ॥८॥

विद्यामधीत्य च कवीन्द्ररवीन्द्रनाथ-
सृष्टे पुरा महति शान्तिनिकेतनाख्ये ।
विद्यालये गुरुकुलप्रथया बभूव
बाल्यात्प्रभृत्यतितरां निरता कलासु ॥९॥

गत्वा विदेशमथ शिक्षितवत्यभूत्सा
विद्याः कलाश्च विविधाः प्रहिता स्वपित्रा ।
तामांगिलीमपि तथैव फिरंगभाषां
वैदेशिकान्यदशकत्स्वयमेव वेत्तुम् ॥१०॥

कारागृहे बहुतिथं समयं स्थितेन
स्वातन्त्र्ययुद्धसुभटेन जवाहरेण ।
पत्रं विलिख्य परमामितिहासशिक्षां
सा प्रापिता समभवत्कुशलेन पित्रा ॥११॥

काले पिता दुहितुरुद्वहनं वितेने
गान्धी फ़िरोज़िति ततो युवकेन नाम्ना ।
यस्मादसौ सुरसमौ सुसुतावसूत
राजीव इत्यपि च संजय इत्यपि द्वौ ॥१२॥

स्वातन्त्र्यतः परमसौ पितुरेकपुत्री
तस्यावहद्गृहधुरं विधुरस्य दक्षा ।
तद्राजतन्त्रमपि शासनकौशलञ्च
पार्श्वे स्थिता स्वयमशिक्षत वीक्षमाणा ॥१३॥

भूत्वा क्रमेण निपुणा किल राजतन्त्रे
साह्यं पितुस्स्वयमियं प्रबभूव कर्तुम् ।
शक्ता ततस्समभवच्च यदा प्रधान-
मन्त्रिण्यनन्तरमसौ स्वयमेव जाता ॥१४॥

कस्यापि संमुखगतस्य नरस्य भावम्
अन्तर्गतं झटिति सा प्रबभूव वेत्तुम् ।
येन द्विषस्समवधूय सखीन्समर्था
साऽऽसीत्समूह्य परिपोषयितुं स्वयूथे ॥१५॥

अत्यन्तमास निजदेशसमाजसेवा-
कृत्येषु नित्यनिरता यत एव सा तत् ।
गत्यत्ययेन विकला ह्यबला यथाऽन्या
पत्यौ न मृत्युवशमीयुषि चाप्यतप्यत् ॥१६॥

याते दिवं च तदनन्तरमात्मनोने
ताते जनप्रियजवाहरलालनेह्रौ ।
शास्त्रिप्रधाननवमन्त्रिसदस्यभूता
शास्तिं विभागपरिचालनमभ्यजानात् ॥१७॥

पाकिस्तनेन सह युद्धमजृम्भताथ
'ताष्केण्ट्'गतस्स समयाय कृतप्रयत्नः ।
शास्त्री ततो मृतिमगादथ सा प्रधान-
मन्त्रिण्यभूत्प्रथमसमस्य हि भारतस्य ।।१८।।

संचाल्य राष्ट्रमधिकं तत एकवर्षात्
राष्ट्रप्रशासनकलाकुशला बभूव ।
साधारणञ्च समये समुपागते सा
निर्वाचनं निरदिशच्चतुरा चतुर्थम् ।।१९।।

साधारणाज्जयमवाप्य यदा चतुर्थात्
निर्वाचनात्पुनरुवाह च राष्ट्रभारम् ।
कालस्स राजचरिते प्रथमस्तदीये
पर्याय एष इतिहासविदां मतेन ।।२०।।

सा चीनपाग्रणकृतव्रणकुण्ठितस्य
राष्ट्रस्य शीघ्रगतिमुन्नतिमीहमाना ।
निस्संख्यदीनदलितोद्धरणादृते नः
देशोन्नतिर्भवितुमर्हति नेत्यजानात् ।।२१।।

सा तेन दीनदलितोद्धरणाय नूत्नीं
यां योजनामसृजदाशुफलप्रदाञ्च ।
व्यत्यासतो विगतपूर्वकयोजनाभ्यः
सा योजना पृथगभूत्प्रथिता तुरीया ।।२२।।

दृष्ट्वा द्रुतप्रगतिमार्गगतिं ततो नः
देशद्विषस्समभवन्नसहिष्णवस्ते ।
पाकिस्तनेन पुनरेव बभूव युद्धं
यस्मिन्न संशयमभूद्विजयोऽस्मदीयः ।।२३।।

विच्छिन्नभिन्नतनुरास ततस्स देशः
पाकिस्तनस्समुदियाय च बांगलाख्यः ।
देशोऽवलम्ब्य गणतन्त्रपथं नवीनः
पाकिस्तनस्य हि तदातनपूर्वभागात् ॥२४॥

एवं विजित्य युधि सा पुनरादिदेश
निर्वाचनं विजयमाप च विस्मयार्हम् ।
तद्राजकीयचरिते यदनु द्वितीयः
पर्याय आरभत नूनमिति प्रवाच्यम् ॥२५॥

सा संविधानमनु याः अनुसूचितास्ताः
संपुष्यती पुनरनुन्नतवर्णजातीः ।
यां योजनां समददादनुयोजनाख्यां
तासां तया द्रुतगतिः प्रगतिः कृताऽद्य ॥२६॥

दैवं ततस्समभवत्प्रतिकूलमुच्च-
न्यायालयेन परिशीलयता यदाऽस्याः ।
निर्वाचनं विफलमक्रियताथ साऽऽप-
त्कालं विघुष्य दृढशासनमाततान ॥२७॥

न्यायालये पुनरिदं परिशील्य सर्वं
सर्वोच्च उच्चरितवत्यपि तत्सपक्षे ।
निर्वाचने तदनु तां जनतन्त्रहन्त्रीम्
उद्घुष्य लब्धविजया अभवन्विपक्षाः ॥२८॥

राष्ट्रं विरुध्य बहुधा विहितापराधा
कारागृहे वसतिमर्हति सेन्दिरेति ।
निर्णीय नूनमयतन्त ततो विपक्षाः
तद्दण्डनाय च बभूवुरतिप्रचण्डाः ॥२९॥

राष्ट्रं विरुध्य न कदाऽपि मयाऽपराद्धं
राष्ट्राय जीवनमपि प्रभवामि दातुम् ।
जानन्ति मां मम गुणानपि भारतीयाः
इत्यास सा दृढमतिर्नभयाच्चचाल ॥३०॥

निर्वाचनात्परमपूर्णतृतीयवर्षे
सद्यो मिथः कलहकारणतो विभिन्नम् ।
छिन्नं विपक्षघटनं निपपात पश्चात्
निर्वाचने जयमियाय नवे पुनस्सा ॥३१॥

जानाति शासनपटुर्हितमस्मदीयं
सा दीनबन्धुरपि राष्ट्रहितैषिणी च ।
सूत्रैश्च विंशतिमितैः प्रगतिं ददौ नः
एवं विमृश्य पुनरेव जनैर्वृताऽभूत् ॥३२॥

निर्वाचनात्परमवाप्तजया प्रधान-
मन्त्रिण्यजायत यदापुनरेव सा नः ।
विस्मृत्य शासनमधत्त तदा विपक्षैः
स्वस्याहितं कृतमपि क्षमया च शान्त्या ॥३३॥

राष्ट्रस्य पूर्वमिव नः प्रगतिञ्च शक्तिम्
आहर्तुमार्थिकदशाञ्च कृतैः प्रयत्नैः ।
तद्राजकीयचरिते भरितः प्रकृष्टैः
पर्याय एष हि तृतीय इति प्रबोध्यः ॥४४

यादृच्छिकेन मरणेन विमानपाते
सा संजयस्य तनयस्य नितान्ततप्ता ।
भूत्वा पुनर्दृढमतिर्निजराष्ट्रसेवां
राजीवसाह्यमुपलभ्य पुरेव चक्रे ॥३५॥

पूर्वं यथामति जनोन्नतये कृतानि
सूत्राणि विंशतिमितानि पुनर्विशोध्य ।
अस्माकमस्य विषयस्य हि भारतस्य
सद्यस्समुन्नतिकृते दृढमुद्यताऽभूत् ॥३६॥

राज्येऽसमे विषमविप्लवराजनीत्या
विस्तारितामनभिभाष्य परिस्थितिं सा
शान्त्या नयात् समुपशम्य यथा कथंचिद्
भूयो जनाभिमतशासनमाजहार ॥३७॥

पञ्जाबराज्यमभवद्विषमस्थितं तैः
सीख्धर्मकञ्चुकधरैरतिघोरहिंस्रैः ।
धर्मस्य तत्त्वमनवेत्य समूढशस्त्रैः
अन्योन्यमारणपरैः श्रितराजतन्त्रैः ॥३८॥

संभाषणेन यतते स्म हि शान्तये सा
सोढव्यथा बहुमुखीमविचिन्त्य हिंसाम् ।
दृष्ट्वा क्षमामसफलां विषयैक्यहानिं
सेनामशान्तिदमनाय समादिदेश ॥३९॥

राष्ट्रैकतां बहु विमृश्य कृतं तया तत्
धर्मस्य कस्यचन नैव कृतोऽवमानः ।
ज्ञातुं यथातथमिदं न हि शक्नुवन्तः
भूयोऽपि हिंसनपथे प्रभवन्ति शस्त्रैः ॥४०॥

तातो जनप्रियजवाहरलालनेह्रुः
एकोचिकीर्षुरिह कूटनिरीहदेशान् ।
पूर्वं प्रयत्नमकरोद्यमियं हि तस्मिन्
साधारणेतरमवाप परं कृतित्वम् ॥४१॥

एनां शताभ्यधिककूटनिरीहदेशाः
नेत्रीमकार्षुरिह नेत्रगतापनेत्रीम् ।
अस्याः प्रयत्नमपि विश्वजनीनशान्त्यै
अंगीचकार जगतस्स हि राष्ट्रसंघः ॥४२॥

अस्याः पुनर्बहुमुखी प्रतिभा व्यभासीत्
जानाति यत्स्म भुवि मानवजीवनाय ।
पर्यावृतेर्विपिनपर्वतवारिमय्याः
आवश्यकत्वमयतिष्ट च रक्षितुं ताम् ॥४३॥

क्रीडाप्रियाऽपि नितरां किल सा बभूव
यत्साऽवधारितवती तत एव नृणाम् ।
पुष्टिश्च तुष्टिरपि चित्तविनोदजाता
सख्यं च वृद्धिमुपयाति सहिष्णुता च ॥४४॥

पूर्वैः कदाऽपि न कृतं न विचिन्तितं च
सा भारते प्रथममत्र ससर्ज रम्यम् ।
सर्वैषियानवमखेलविशेषरंगं
क्रीडाप्रियाः प्रमुदिताः किल भारतीयाः ॥४५॥

दिल्लीपुरे समभवत्समनन्तरं तत्
सामान्यराष्ट्रसमितेरधिवेशनं च ।
पूर्वं शताभ्यधिककूटनिरीहदेशाः
अत्रामिलन्किल यतो यश आप राष्ट्रम् ॥४६॥

एतादृशप्रगतिदा भुवि भारतस्य
या सर्वतोमुखसमुन्नतिहेतुरासीत् ।
सा राजतन्त्रकुशला परतन्त्रभूतैः
मूर्खैर्हता कतिपयैरिह भारतीयैः ॥४७॥

या भारतस्य सततं हितमेव मेने
या भारतस्य सततं हितमेव तेने ।
या भारताय सततं हितमेव सेने
तामिन्दिरामिह निहत्य हतं हितं नः ॥४८॥

द्रष्टुं न वल्गु वदनं पुनरिन्दिरायाः
श्रोतुं वचोऽपि मधुरं न हि पारयेम ।
हा हन्त तां हतवता हतकेन नूनं
भाग्यं परं प्रमथितं गतमस्मदीयम् ॥४९॥

नेत्रीममूं समुपलभ्य हि भारतं नः
स्थातुं शशाक जगति प्रथमानभूम ।
अस्माकमेव पुनरन्यतमेन हन्त
सा घातितेति विहसिष्यति विश्वमद्य ॥५०॥

मातेति याममनुताखिलभारतीयः
यातेति साऽद्य निहता निजरक्षकाभ्याम् ।
मात्रा विनाकृत इवात्र जनो विरौति
धात्रा कृतः खलु महानपकार एषः ॥५१॥

तद्रक्षणाय हि भटा बहवो नियुक्ताः
मा तां न कश्चन वधीदिति शासनेन ।
हा हन्त सा विनिहता निजरक्षकाभ्यां
तद्रक्षकावभवतां किल भक्षकौ तौ ॥५२॥

किं व्याहरामि निरपत्रपतां निहन्त्रोः
प्राणैर्निजैरपि गतैरभिरक्षितव्याम् ।
तामेव ताविह वियोजयतस्स्म पापौ
प्राणैः कथं न खलु वर्णयितुं क्षमं तत् ॥५३॥

विख्यातनेहृतनया विपुलात्मपक्षा
विश्वे प्रतिष्ठितबृहज्जनतन्त्रनेत्री ।
विद्रोहतो विनिहता विगतासुभूता
विक्षोभयत्यविशदा भवितव्यता नः ॥५४॥

क्रूरामहो निखिललोकविगर्हणीयां
हत्यां निशम्य निशितां सपदीन्दिरायाः ।
स्तब्धं समस्तभुवनं तिमिरे निमग्नं
वज्राहतादिव विमुह्यति राष्ट्रमेव ॥५५॥

वारो बुधः कथय कीदृश आगतोऽयं
हा रोदनाय भुवनस्य च भारतस्य ।
भारो यथा चिरमधार्यत भारतस्य
हारो न गोलकमदीयत हन्त तस्यै ॥५६॥

सीखेषु विश्वसिमि तेन मदीयरक्षां
सीखाविमौ च कुरुतां मम रक्षिभूतौ ।
स्थानान्तरं च न तयोरिति साऽऽदिदेश
विश्वासघातमिह तौ कथमादधाते ॥५७॥

स्वप्नास्तया प्रगतये भुवि भारतस्य
ये वीक्षिता अभिनवा अतिलोभनीयाः ।
देशो दृढो जगति शक्तियुतो यतस्स्यात्
ते नाम भाविनि पुनस्सफला भवेयुः ॥५८॥

सूर्यश्च चन्दिर इतो जयतो हि यावत्
नामापि ते जयतु तावदिहेन्दिरे नः ।
एवं विलप्य बहवः परिदेवयन्तः
यात्रां विलोक्य रुरुदुश्चरमां तदीयाम् ॥५९॥

हन्तेन्दिरे तव कथं मृदुले शरीरे
हन्ताऽपि गोलकमपातयदस्वमेवम् ।
को नाम निष्ठुरमना अपि पुष्पराशौ
सन्दीप्यमानमनलं स्वकरेण यच्छेत् ॥६०॥

भूत्वा चिरं विपुलभारतदेशनेत्री
त्वं ह्यार्तनादमहरो झटितीन्दिरे नः ।
त्वय्यार्तनादमुचि गोलकवर्षकाले
त्राता न कश्चिदपि तत्र बभूव हन्त ॥६१॥

पाकिस्तनेन युधि लब्धजयेति पूर्वं
संमानिता त्वमिह भारतरत्ननाम्ना ।
त्वां रत्नमद्य विनिपात्य विनाश्य कैश्चित्
मूर्खत्वमेव नियतं प्रकटीकृतं स्वम् ॥६२॥

सा पूर्वपश्चिमसखित्वंकृतोद्यमाय
'यूताण्ट्'-पुरस्कृतिमविन्दत पूर्वमत्र ।
तां पश्चिमे परमपश्चिमवित्तवन्तः
ते पश्चिमत्वमभजन्ननवेत्य नूनम् ॥६३॥

आजीविताचरितभारतदेशसेवा
राजीवगान्धिजननी महतीन्दिरा सा ।
हा जीवितं विनिकृता विजहौ जनानां
राजीर्विधाय विकिरन्नयना विषण्णाः ॥६४॥

भाग्यं परं फलितमद्य दिवौकसां ये
द्रक्ष्यन्ति सुन्दरमहो मुखमिन्दिरायाः ।
श्रोष्यन्ति वल्गु च वचो मधुरं तदीयं
हा वञ्चिता वयमितः किल भारतीयाः ॥६५॥

अस्माभिरद्य वचनं स्मरणीयमस्याः
देशो बली भवितुमेकतयैव शक्तः ।
विस्मृत्य जातिमतभेदमतस्समस्ते
राष्ट्रस्य नः प्रगतये प्रयतेमहीति ॥६६॥

इन्दिरयाऽद्य वियुक्तः
विन्दति नो शर्म दैवनिहतोऽयम् ।
क्रन्दति भारतदेशः
सुन्दरराजस्य तेन कविताऽपि ॥६७॥

(रचनातिथिः १.११.१९८५/ई०)

धातस्त्वया किं कृतम् !

डा० उमाकरण झा, डी० लिट्०
श्रीरणवीर-केन्द्रीय-संस्कृत-विद्यापीठम्, शास्त्रिनगरम्
जम्मूतवी-१८०००४

मोतीलालस्य पौत्री विविधगुणवती मुख्यनेत्री विधात्री,
राष्ट्रस्यार्थं सदा या जनहितकरणे त्यक्तप्राणा प्रधाना।
याऽसील्लोकार्थसिद्ध्यै भरतभुवि रता चिन्तने चातिदक्षा,
सा राष्ट्रस्यास्य माता शिशुजनविमुखी हा गता कुत्र चाद्य ।१।

आसामे या परमजटिला क्लेशपूर्णा समस्या,
पञ्चाबे या त्वजनि सहसा क्रान्तिरेका विशेषा ।
काश्मीरे या सततजटिलाऽसीत्समस्या विशाला,
तामुद्धर्तुं प्रतिदिनमहो या यतन्ती सदाऽसीत् ॥२॥

हृतश्रीः सञ्जाता कुटिलविधियोगेन वसुधा,
दिशा शून्या जाता दिवि समभवद्ध्वान्तपटलम् ।
न जाने कुत्रास्ते सकलजननेत्री सहृदया,
हतेयं दुर्दुष्टैर्भरतभुवि मुख्याद्य सहसा ॥३॥

लोका हा हा रुदन्तः करुणरसभरा अश्रुपूर्णाश्च खिन्नाः,
दृश्यन्ते व्यग्रचित्ताः शिशुयुवकजनाः प्रौढवृद्धाश्च नार्यः ।
किं जातं कैश्च दुष्टैरियमतिसरला हा हता देशमाता,
चेत्थं कारुण्यपूर्णं जनरवजनितं व्याकुलं विश्वमेतत् ॥४॥

नूनं ते करुणैव नास्ति हृदये नो वा क्षमा दृश्यते,
सौजन्यस्य च का कथापि भवतः स्नेहस्य लेशो न ते ।
मन्ये त्वत्सविधे न कापि गणना धीरस्य वीरस्य वा,
येनेत्थं सहसेन्दिराद्य निहता धातस्त्वया किं कृतम् ॥५॥

या नित्यं जनचिन्तने दृढरता नेत्रीन्दिरा पूजिता,
या स्वार्थं सततं विहाय बहुशः सेवामकार्षीन्मुदा ।
हा हा हन्त गता क्व चाद्य सहसा देशस्य धात्री परा,
हा हा चाद्य गता हि सा भगवती सन्त्यज्य लोकं ध्रुवम् ॥६॥

विश्वस्मिन् या प्रचुरमधुरं भावपूर्णं मनोज्ञं,
सन्तेनेऽसौ जनहितकृते मोदपूर्णं विचारम् ।
कीर्तिर्यस्या रुचिरधवला भासते विश्वलोके,
धन्या पूज्या सकलमनुजैरिन्दिरा हा हताद्य ॥७॥

समस्तराष्ट्रं परिचालयन्ती
विश्वस्य मध्येऽतिविचारशीला
त्यक्त्वा गता सा क्व प्रधानमन्त्री,
हा हा हतेयं खलु राष्ट्रमाता ॥८॥

हे लोकमातृपदभाजन ! शक्तिपूर्णे !
लोकोपकारकरणे कटिबद्धचित्ते !
याऽसीस्सदा त्वं क्व विहाय याता,
जनान्निमग्नान खलु दुःखपङ्के ॥९॥

प्राप्यापि वैभवपदं न चकार गर्वम्,
साम्राज्यशक्तिवलितापि न दम्भमागात् ।
सज्जा सदैव खलु लोकहिताय याऽसीत्
श्रद्धाञ्जलीनुपहरामि शमाय तस्याः ॥१०॥

हन्तेन्दिरार्या सहसा प्रयाता !

(प्रा० हरिश्चन्द्र रेणापुरकरः, गुलबर्गा)

शोकाम्बुधौ भारतभूर्निमग्ना धराऽन्धकारे निबिडे निलीना।
कृष्णाभ्रसंछादितमंतरिक्षमस्तं ह्यगाज्ज्योतिरतीव दीप्तम् ।१।
दिगन्तविश्रान्तविशालकीर्तिरनन्यसाधारणधैर्यमूर्तिः ।
प्रधानमन्त्र्युच्चपदाधिरूढा हन्तेन्दिरा सा सहसा प्रयाता ।२।
भिन्द्रानवालोग्रतराध्वनीनैः पृथक् खलिस्तानमभीप्सुसिक्खैः ।
ब्लूस्टारसंकेतितसैन्यकार्याद्दुष्टैर्हता हा ! गुलिकाप्रहारैः ।३।
धर्मान्धताशाठ्यनृशंसतानां क्रौर्यस्य चायं परमावधिर्यत् ।
प्रधानमंत्र्यङ्गसुरक्षकाभ्यां स्वावासभूमौ निहतेन्दिरार्या ।४।
विश्वासघातस्य परा हि काष्ठा यन्नाम रक्षाधिकृताधमाभ्याम्
स्वकीयगेहे निहतेन्दिरार्या वृत्यैव सस्यं खलु भक्षितं हा ! ।५।
राष्ट्रैक्यसामर्थ्यसमृद्धिहेतोरहर्निशं कार्यरताऽविरामम् ।
आसेतुशैलं सततं भ्रमन्ती चैतन्यमूर्तिः सहसा जगाम ।६।
अपूर्वधैर्याद्भुतशौर्यमूर्तिरदम्यदुर्दान्तपराक्रमोर्मिः ।
निःशंकनिर्भीकमनस्विनी हा हन्तेन्दिरा सा सहसा विलुप्ता ७
अमोघवीर्यं महनीयराष्ट्रमूर्जस्वलं भारतवर्षदेशम् ।
विधातुकामा परिपंथ्यभेद्यं वर्चस्विनी हा सहसा जगाम ।८।
अमेरिकादत्तभयंकरास्त्रैः सन्नद्धगर्वोद्धतमत्तपाकम् ।
जित्वा रणे वंगभुवो विमोक्त्री दुर्गेन्दिरा हा सहसा जगाम ९
निर्व्यूहराष्ट्रौघविदग्धनेत्री गोप्त्री सुराणामसुरैकहन्त्री ।
भेत्त्री रिपूणामवदानकर्त्री प्रधानमंत्री सहसा जगाम ।१०।

दारिद्र्यसंपीडितपश्चवर्ग्यान् कृषीवलान् कर्मकरांस्तथैव।
स्वानेकसंयोजनकार्यजातैरुद्धारयन्ती सहसा जगाम।११।
अस्मत्प्रियं भारतवर्षदेशं समस्तभूमण्डलराष्ट्रमध्ये।
उत्तुंगमानार्हपदं नयन्ती तेजस्विनी हा! सहसा जगाम।१२।
अत्यद्भुते वंगविमुक्तियुद्धे दृष्ट्वा यदीयाद्भुतशौर्यधैर्यम्।
समस्तविश्वं चकितं बभूव दुर्गेन्दिरा सा सहसा जगाम।१३।
अधृष्यमोजस्विबलाढ्यराष्ट्रं धन्यं चिकीर्षुः खलु भारतीयम्।
अणवस्त्रविस्फोटमपीह कृत्वा विस्मापयन्ती सहसा जगाम १४
राष्ट्रैक्यसंधारणरक्षणार्थं पञ्चानपि स्वासुवरांस्त्यजन्ती।
हौतात्म्यपूता स्मरणीयगाथा विद्युल्लता हा सहसा जगाम १५
स्फुरत्प्रभा मूर्तिमती नु शोभा संचारिणी दीपशिखा नु भव्या।
भूमौ चरिष्णुश्चपला नु दिव्या तेजस्विनी हा सहसा विलुप्ता।
स्रोतस्विनी नूनमजस्रशक्तेरखण्डचैतन्यमहार्चिरेव।
अदम्यधैर्याध्यवसायमूर्तिः संकल्पशक्तिः सहसा जगाम।१७।
उत्साहमन्त्र-प्रभुशक्तिपूर्णा चाणक्यनीत्यां कुशला नयज्ञा।
समर्पिता भारतगौरवाय वर्चस्विनी हा सहसा विलुप्ता।१८।
राष्ट्रस्य बाह्यान्तरशत्रुकूटं स्वापूर्वसूक्ष्मेक्षिकयाऽऽकलय्य।
निर्भिद्य चापूर्वविदग्धनीत्या राष्ट्रं ह्यवन्ती सहसा जगाम १९
रक्षाविधौ पूर्णतया स्वतंत्रं राष्ट्रं स्वयंपूर्णमजस्रशक्तिम्।
कर्तुं तया दूरदृशा महान्ति शस्त्रास्त्रनिर्माणगृहाण्यकारि।२०।
हिमाद्रितुङ्गं धवलं विशालं तेजस्विभव्योज्ज्वलचारुशीलम्।
राष्ट्रार्पितं पूतमुदात्तसत्त्वं धर्मान्धतादावशिखावलीढम्।२१।
तस्याः प्रमादा अभवन्ननेके प्रमादशून्यो भुवि को बभूव।
दोषास्तु तस्या गुणवृन्दलीनाः सुधांशुपादेषु यथा मृगांकः २२

विरोधदोषाद्गिदरीगुहासु निर्बाधनिर्विघ्नतया प्रधावन् ।
तदीयचैतन्यसरित्प्रवाहो गंगेव नूनं प्रतिभाति भव्यः ।२३।
तेजस्विनी भारतकन्यकाऽसौ आशागभस्तिर्भुवि पीडितानाम्
त्रैलोक्यशान्त्यर्थकृताभियोगा चिरं भवेत्संस्मरणीयकीर्तिः ।।
पृथक् खलिस्तानमभीप्सुसिक्खैः पंजाबराज्ये विगतत्रिवर्षम् ।
प्रवर्तितं यद्धि विघातसत्रं तदीयमेतच्चरमावसानम् ।२५।
दधीचिगांधीशिबिबुद्धभूमौ नृशंसनिर्मानुषनिष्ठुरत्वम् ।
लज्जास्पदं भारतसभ्यतायाः सुसंस्कृतेश्चापि कलंकभूतम् ।।
प्राणान्तकोऽयं गुलिकाप्रहारो न केवले गांधिकलेवरेऽभूत् ।
बभूव नूनं जनतंत्रमूले महत्तमस्य प्रियभारतस्य ।२७।
यतः खलिस्तानमभीप्सुसिक्खैः पंथं च राष्ट्राद् बहुमन्यमानैः ।
जात्यन्धमूढैर्निजपंथहेतोर्निर्मानुषं सा निहतेन्दिरार्या ।२८।
प्रश्नस्ततोऽयं समुदेति नूनं निष्ठाद्वयोर्मानवजीवनस्य ।
गरीयसी स्यात् कतरा स्वदेशे स्वराष्ट्रनिष्ठा ह्युत धर्मनिष्ठा ।
अकालतख्तं ह्युत संविधानं किं सार्वभौमं भवतीह देशे ।
निर्धार्यमेतत्खलु राष्ट्रधुर्यैः खड्गौ हि कोषे न समं वसेताम् ।।
प्रजाप्रभुत्वे भुवने प्रतिष्ठे कस्यानुशास्तिः प्रबला वरिष्ठा ।
धर्मस्य यद्वा विधिशासनस्य निर्णेयमेतत्सकलैः समेत्य ।३१।
कस्याधिपत्यं भवतीह देशे ह्यकालतख्तस्य नु संसदो नु ।
नूनं विधेयोऽस्य विनिश्चियोऽपि ह्यारोढुमश्वौ युगपन्न शक्यम्
समस्तलोकैरवधेयमेतद् धर्माच्च पक्षादपि संप्रदायात् ।
राष्ट्रैक्यकल्याणमखण्डता च सर्वातिरिक्ता विषया भवन्ति ३३
अनन्तदुःखोद्भवमूलहेतुः सकृत् कृतो भारतखण्डनस्य ।
महापराधो हि पुनः कदाचित्केनापि कर्तुं नहि चिन्तनीयः ३४

कूहा

(डा० उमाकान्त शुक्लः, मुजफ्फरनगरम्)

सौभाग्यसारो धरणीतलस्य जगत्प्रसूतेः कमनीयशिल्पम्।
उद्रिक्तसत्त्वस्य विशालराशिर्हिमालयोऽसौ जयति त्रिलोक्याम् ।१।

धातुः कलाया वरिमाऽनवद्यो न्यासो वरेण्यः कुशलः प्रयोगः।
क्षणे क्षणे नूतनतां दधानो हिमालयोऽसौ जयतान्नगेशः ।२।

द्रुतं वहन्त्यो विशदप्रवाहा नद्यो यदीयां करुणां गरन्ति।
दम्भोलिकोटीरपि दम्भयन्त्यः शिला यदीयं द्रढिमानमाहुः ।३।

यत्रोद्गताः पुष्टिमिताश्चलन्त्यो रुद्धाः समुत्प्लुत्य पुनः प्रयान्त्यः।
उत्तालतालैस्तरलैस्तरङ्गैर्गायन्ति नृत्यन्ति नदन्ति नद्यः ।४।

रिङ्गत्तरङ्गाच्छकटाक्षकस्रा तटाद्रियुरोजाहितरम्यरूपा।
नद्यन्तरैः सार्धमतीव हृष्टा यदङ्गणे क्रीडति जह्नुकन्या ।५।

यः खेचराणां निजगौरवेण दृष्टीः समाकृष्य धुनोति गर्वम्।
भूमिस्थितानां पुनरुन्नमय्य चेतोविकासं प्रकरोति नित्यम् ।६।

यस्तूलिकाविभ्रमकारिकूटैः सूचीमुखैः पूरितरागरेखैः।
चित्राणि भावप्रवणानि नित्यं नभःप्रपत्रे लिखतीव चित्रम् ।७।

सारे समग्रत्वविभावनायां कलानिवेशे ललिते विधौ वा।
सौभाग्यराशावभिगम्यतायामधृष्यभावे च निदर्शनं यः ।८।

य औषधीभिर्मणिभिः प्रभावैः पूर्णः समन्ताद् दृढबद्धबन्धः।
ध्रुवं समावर्जनमन्त्र आहो रक्षाकरण्डः खलु भारतस्य ।९।

हैयङ्गवीनाक्षतदुग्धमुक्ताशङ्खेन्दुकार्पासदधिश्रितानाम्।
शौक्ल्यश्रियां यः प्रतिभाति हृद्या दिव्यायतैका विशदा निषद्या १०।

येनैकधारेण महोज्ज्वलेन लसन्नदीजालकपत्रभङ्गैः।
अलङ्कृता भारतभूरजस्रं रोमाञ्चिता सस्यभरैरिवास्ते ।११।

यस्मै वरिष्ठाय सदा त्रिलोक्यां सौन्दर्यलुब्धाः स्पृहयाम्बभूवुः ।
यन्मेखलां स्फीतसरांसि सर्वे द्रोणीर्हिमानीः स्पृहयन्ति सन्तः ।१२।
गृह्णन्ति यस्मात् कवयः कवित्वं शिल्पानि यस्मान्ननु शिल्पकाराः ।
मन्त्राननन्तान् मुनयः प्रसादान् सचेतसो दर्शनमात्तबोधाः ।१३।
यस्येन्द्रनीलद्रवनीलखेन स्पृष्टा हिमानी रचयत्यजस्रम् ।
मिलिन्दमालामिव पुण्डरीके तां कालिकां वापि महेशकण्ठे ।१४।
अभ्रंलिहानां शिखरावलीनां विसर्पि सौभाग्यमवेक्ष्य यस्य ।
विलुप्तगाम्भीर्यभरः समुद्रः पारिप्लव गच्छति दाक्षिणात्यः ।१५।
नतोन्नता शुभ्रविभा विशाला श्रृङ्गावली यस्य विभाति नूनम् ।
केनापि चित्रे लिखितास्तरङ्गाः क्षीराम्बुधेः कारुतरेण दिव्याः १६
पीडेयमाद्यस्य कवेरखर्वा राशीभवत्याश्रितमूर्तभावा ।
आथाम्भिनीं यस्य निभाल्य गूढां संस्थां सचेता भ्रमतो ब्रवीति १७
कर्पूरराशीन्निचिताँश्च लाजानुद्भिन्नतौषारशिलीन्ध्रपुञ्जान् ।
जानन्ति यस्य प्रचितां हिमानीं मोहाद्भ्रमान्मौग्ध्यतया किरात्यः ।
जीवैरसंख्यैः कृतसाधुवादं गुहामुखैश्चाप्यनुगीयमानम् ।
गीतं रसस्यन्दि मनोभिरामं गायन्ति यस्मिन् मधुरं प्रपाताः ।१९।
उन्निद्रवृक्षाक्षरपङ्क्तिरम्या द्रोण्यः समुद्घाटितशास्त्रकल्पाः ।
आभान्ति यस्मिन् परितः स्फुरन्ति सौन्दर्यसूत्राणि सरित्प्रवाहाः ।।
क्रान्तास्तुषारे किरणाः खरांशोर्यस्मिन् सृजन्त्यद्भुतमिन्द्रचापान् ।
कलास्तथेन्दोर्नवपुण्डरीकराजीमुदग्रामिव राजमानाम् ।२१।
वक्राः क्वचित् क्वापि पुनः प्रगाढा नतोन्नताः क्वापि च सान्तरालाः
यत्प्रान्तरेखाः परिभान्ति नूनं हृत्स्पन्दनानीव भुवोऽङ्कितानि ।२२।
शेते धरा यत्र नभोविताने चैतन्यमाप्नोति च यत्र निष्ठाम् ।
शान्तिः पुनर्गायति यत्र मन्द्रं छन्दांसि केलिं वितनोति सर्गः ।२३।

एका नमन्तीव विवृद्धरागात् परोन्नमन्तीव पुनः प्रमोदात्।
दिवस्पृथिव्यौ मिलतः प्रगाढं परस्परं यच्छिखरावलीषु ।२४।
अत्युच्छ्रितं नीलनभोनिखातं हैमं यदीयं शिखरं विरूढम्।
जाग्रत्सितच्छायशिरोरुहाया मुहुर्मुहुः स्मारयतीन्दिरायाः ।२५।
तस्मिन् विमानेन मनोजवेन प्रोच्चैश्चिताभस्म वितीर्य मातुः।
प्रवर्ततेस्म क्रमतो विषण्णां राजीवगान्धी निजराजधानीम् ।२६।
अस्थीनि देशार्चनकृत्यपूतान्यस्याश्चिताभस्म च दीप्रनिष्ठम्।
गङ्गोद्भवेऽङ्के च दृढे स्वकीयेऽग्रहीद्भवानीगुरुरिद्धभक्त्या ।२७।
तदद्भुतं पावनमद्वितीयं प्रकीर्णमीड्यं भसितं हिमाद्रौ।
न्यधायि मौलौ गिरिशेण भक्त्या विलोक्यमानेन भृशं भवान्या ।२८।
भावाञ्जलिं पश्चिममत्र साधुर्यदाऽदिशत् प्रह्वशिरोधरोऽसौ।
अगादि मौनेन तदाऽधरेण व्यथाकथा मातृवियोगजन्या ।२९।
संख्यातिगाभिः स्मृतिभिः प्ररूढः शोकैरवाच्यैः किल दत्तहस्तः।
निरुद्धवेगोऽपि कपोलपाल्यामवातरत् तुन्दिलबाष्पबिन्दुः ।३०।
मातुः प्रणम्यास्थ्यवशेषलेशान् प्रसन्नभूतिं गिरिराजमालाम्।
उत्सं च गाङ्गं परिवीक्ष्य मौनमुपाविशत् स्वासनमिन्दिराजः ।३१।
एकान्तलाभाद् द्रुतिपारवश्याद वियोगसंवित्तिभराद् विशेषात्।
अथाविरासन् श्रुतदृष्टपूर्वा मनःपटे केऽपि कथाप्रसङ्गाः ।३२।
प्रज्ञासकाशात् कृतिरुज्ज्वलेव कृतेरुताहो विशदेव कीर्तिः।
कीर्तेरुत प्रीतिरिव क्वणन्ती जातेन्दिराऽऽसीत् कमलासकाशात् ३३
पुण्यावलीनां स्वपितामहस्य गुरोः पटीयस्तपसां विभूतेः।
मातुर्गरीयोयशसां च सैका त्रिवेणिरासीन्ननु तीर्थराजे ।३४।
प्रयागराजस्य हृदि प्रसन्ना आनन्दवर्णे भवने स्फुरन्ती।
साऽऽसीच्छिशुत्वे निजतन्त्रताया नीराजनामङ्गलदीपिकेव ।३५।

करे गृहीत्वा भ्रमति स्म बापुं तं शैशवे प्रश्नभरानपृच्छत् ।
प्रज्ञाविशेषादचिनोदहिंसामन्त्रं च तं पूततमं महर्षिम् ।३६।
तदीयसन्मन्त्रवचःप्रपञ्चैः सिक्ता सुबद्धा प्रगुणीकृता सा ।
स्वतन्त्रतादैवतमन्दिरस्य द्वारेऽलसद् वन्दनमालिकेव ।३७।
बाल्यात्प्रभृत्येव महोज्ज्वलानामासीत् खनिः सा किल संस्कृतीनाम्
अदीनता निर्भयताऽप्यहिंसा क्षमाऽथ दाक्षिण्यधियोऽत्र रेजुः ।३८।
तस्या नवे मृण्मयपात्रसार्द्रे लग्नाः शिशुत्वे नृपनीतिरेखाः ।
तपोभिरुग्रैरचकासुरूर्ध्वमाजीवनं मञ्जुलचित्ररूपाः ।३९।
आसीद् विनीताऽथ च दुष्प्रधर्षा प्रियंवदाऽऽढ्याऽथ च वाग्मिनीनाम्
शुचिः स्थिराऽथो मधुरा वदान्या शास्त्रैकचक्षुश्च दृढा दयार्द्रा ४०।
न तत्समाऽऽसीद् भुवि रक्तलोका प्रज्ञाकलामानसमन्विता वा ।
बुद्धिस्ततोत्साहसमृद्धिरुग्रा स्फीता स्मृतिः कुत्र नु लोक्यतां सा ४१
जाते स्वतन्त्रे खलु भारतेऽथ प्रधानमन्त्रित्वपदं गतस्य ।
अधत्त साचिव्यपदं स्वबुद्ध्या नित्यं पितुः पण्डितनेहरोः सा ।४२।
दानैः परामर्शपरम्पराणां क्रियाविधेर्वापि निरीक्षणेन ।
सौविध्यसम्पादनतत्परा साभवत् पितुः काऽप्यवलम्बयष्टिः ।४३।
पूर्वं श्रुताऽस्याः कलकीर्तिरेभिः पश्चादमीभिश्च विलोकिताऽसौ ।
इति स्वकर्णान् स्तुवतिस्म पूर्वमक्षीणि पश्चान्निखिलोऽपि लोकः ।।
भङ्गीविशेषैः प्रथितैर्गुणौघैः ख्यातिं गतां भूवलये समग्रे ।
स्वाध्यक्षसिंहासनसंस्थितां तां काँग्रेस-संस्थाऽरमताऽथ दृष्ट्वा ४५
मातामही मे परिवीक्ष्य पुत्रीमुच्चैः पदं प्राप्नुवतीं प्रसन्नः ।
आनन्दसिक्तैर्नयनैश्चकार सुस्वागतं स्नेहभरैश्च शब्दैः ।४६।
अस्तीन्दिरा मे तनया गुणाढ्या ह्यस्यां च मे प्रीतिभरः प्रसिद्धः ।
नुतिः क्रियेताथ च पक्षपातो नोचेद् गुणानां तनुतामुपेक्षा ।४७।

चारित्र्यसम्पत्तिमथापि निष्ठां सहिष्णुतां कार्यविधानशक्तिम् ।
श्लाघ्यां तथाऽस्याः प्रकृतिं विलोक्य मनो मनाङ् मे विदधाति गर्वम् ।
नैतद् विजानामि च मत्सकाशात् संस्कारलेशोऽप्यनयाऽत्र लब्धः ।
मेधाविनी नूनमियं गुणानां मालां सकाशादवृणोत् स्वमातुः ।४९।
अध्यास्त सा सक्रियराजनीतिमञ्चं ततः सिंहमिवाद्यशक्तिः ।
कर्माण्यसाध्यानि तथाद्भुतानि तया कृतान्यद्य जना गृणन्ति ।५०।
सम्भाविता तेषु पदेषु पुम्भिर्लब्ध्वा च साफल्यमसौ समग्रम् ।
ततोऽग्रहीद् दक्षतया प्रधानमन्त्रित्वमावर्जितलोकचित्ता ।५१।
अलब्ध सा षोडशहायनान्तं प्रधानमन्त्रीति पदं स्वदेशे ।
अभ्राजताऽसौ नृपनीतिचक्रे प्रभास्वरः कोऽपि च केन्द्रबिन्दुः ।५२।
सा राष्ट्रभक्त्या परिपूतचित्ता तदेकतां सन्ततमाचकाङ्क्ष ।
शान्तिं परं मानवताविकासमूलं सदाऽगायदनिन्द्यभावा ।५३।
वङ्गान् स्वतन्त्रानकरोदलीनदेशान् कदाचित् सममेलयत्सा ।
तार्तीयविश्वस्य समुन्नतीनां गरीयसी सा किल वैजयन्ती ५४।
कृषिप्रकर्षेऽर्थविकासकार्ये समाजवादे दलितोद्धृतौ वा ।
समाधिकारे सुखसंविधानेऽध्वनि स्तुता ढौकयतिस्म देशम् ।५५।
दुनोति लोकं परिवारदैर्घ्यं नियोजनं तस्य भवेत्सुखाय ।
वैज्ञानिकी शक्तिरुदेतु नित्यं शिवाय नो ध्वंसकृतेऽत्र लोके ।५६।
सा प्रोद्धता धोरणिरायुधानां गिरेच्छनैर्मानववंशमूलम् ।
स्पर्धां जहात्वत्र समोऽपि लोकः करोतु भूमिं लघु चैकनीडम् ।५७।
इतीव सर्वानुदबोधयत्सा जनैः सदा द्राघयति स्म मैत्रीम् ।
इयेष कर्तुं भुवि सुप्रतिष्ठामधिश्रियं मानवतामवन्ध्याम् ।५८।
हृदि क्षमा चक्षुशि दूरदृष्टिः करद्वये कार्यपराक्रमश्रीः ।
अङ्घ्र्योर्गतिः कार्यविधौ दृढत्वमास्ते प्रसिद्धं भुवनेषु तस्याः ।५९।

सा भारते विंशतिसूत्रमालामयच्छदानन्दकरीं जनेभ्यः।
किमार्यभट्टादिकमद्य तस्याः हठत्युदारां विरुदावलीं नो।६०।
ध्रुवेऽद्भुते दक्षिणदिग्विभागे तथान्तरीक्षे नितरामुदारे।
गायन्ति वैज्ञानिकमण्डलानि यशांसि तस्याः शशिपाण्डुराणि।६१।
बाल्ये जनन्या विरहेण पत्युः पितुश्च दूना नवयौवने या।
तां वार्धके पुत्रवियोगयोगात् सहस्रधा संत्रुटितां स्मरामि।६२।
या पुत्रशोकाशनिभिन्नदेहात्रुटद् हृदि प्रारुददक्षिकूले।
परन्तु बद्धा धृतिमास्थितां तां स्मरामि लोकस्य हित दधानाम्।
धर्मान्धतां क्षुद्रतरान् विचारान् दरिद्रतां जातिगतांश्च दोषान्।
अभिद्रवन्तीमभयामदीनां स्मरामि तां मातरमात्मशक्तिम्।६४।
मन्त्रोज्ज्वलां काव्यरसप्रसन्नां स्वास्थ्यप्रदामादृतलोकतन्त्राम्।
स्मरामि तस्या वचनावलीनां लीनामृतामर्थविभूतिमाद्याम्।६५।
अरातिचक्रैः पतितं सुदूरे तं सिक्किमाख्यं परिपोष्य देशम्।
निरीक्षतां विस्मयरक्तपुंसां या भारते नीतिगुणैरबध्नात्।६६।
सहेत सा देशविखण्डनस्य कथं कथोद्घातमपि प्रवृत्तम्।
अतोऽभिनत् पञ्चनदेषु तूर्णं देशद्रुहां जालमरालकेशी।६७।
यदि स्वदेशं खलु सेवमाना हता तदा स्यां विषयः स्मयस्य।
जाने मदीयं प्रतिबिन्दु रक्तं देशोन्नतेर्यास्यति कारणत्वम्।६८।
इत्युत्कलेषु प्रथितां तदीयां वाङ्माधुरी कर्णपुटैः पिबन्तः।
माद्यन्त आनन्दततिं प्रपन्ना, लोका अगाहन्त सुधासमुद्रे।६९।
परन्तु लोकान् सुखिनोऽभिवीक्ष्य मनांसि नासन् सुखभाञ्जि तेषाम्
ततोऽनुदन्नन्तकमादितेया मन्ये समाहर्तुमिमां स्वलोके।।७०।।
आसं बहो राष्ट्रपतिर्विदेशं गतश्च रक्षा-गृह-मन्त्रिणौ तौ।
आस्तां न दिल्यामथ केऽपि मुख्या यात्राप्रसङ्गे क्वचन प्रयाताः७१

लब्धक्षणोऽथो यम आत्मकार्यप्रपञ्चमाधातुमियेष बुद्धौ
प्रवेश्य पात्रं मृति-रूपकेऽसौ मन्ये प्रयोगातिशयं चकार ।।७२।
कैश्चित् किलाप्तैः सह याति यावत् स्वैरं स्वकार्यालयमात्मवासात्
निपत्य मार्गे गुलिकाभिराराद्रक्षानराभ्यां ह ह हा हताऽसौ ।।७३
न केवलं प्राणिवधोऽयमासीदासीद्वधोऽयं खलु सभ्यतायाः
अभूदथैवं किल भारते स्वे विश्वासघातस्य नवावतारः ।।७४।
विश्वासघातं प्रहता तदीयरक्षानराभ्यामिति मेऽस्ति शोकः
पूजाप्रदीपः प्रदहेद् गृहं चेच्छुचे प्रकल्पेत नृणामवश्यम् ।।७५।
दत्त्वा भटाभ्यामथवा कलङ्कमवन्ध्ययत्ना त्रिदशा अभूवन्
स्वर्लोकशोभामभिवर्धितुं तैश्छातं धरायाः कमनीयरत्नम् ।।७६।
अधोगिलामन्नमभीप्सितं या विश्वं सदा शान्तिमयाचताऽऽद्रौ
अरीनुदग्रानरुणद्रणाङ्गं जनानपृच्छच्च शुभं शुभंयुः ।।७७।
अवाचिनोन्मानवधर्ममाप्तान् जनानुदारं हितमब्रवीद्या
स्वीयानशाद्देशपरीष्टिमाद्यां विपक्षराष्ट्राण्यजयत् प्रसादान् ।।७८
देशप्रतिष्ठामनयत् प्रकाशं विकासवीथीमहरत् पुराणि
ग्रामानकर्षन्नवराजमार्गान् नदीरमथ्नादमृतप्रकाशम् ।।७९।
वन्द्यामहिंसामवहद्धरित्रीमदण्डयद्देशरिपूनसून् या
कदाप्यमुष्णाद् द्युतिमिन्दुमच्छां क्रियाफलं याऽपचदिद्धपाकम् ८०
सा व्यश्वसीद् यत्र ततो विघातमासाद्य याता त्रिदिवं विरागात्
प्रायस्तया लोकमिमं त्यजन्त्या कृता वयं सम्प्रति दण्डपात्रम् ।८१
इत्यादिकं व्याहरतां जनानां बाष्पाम्बुभिर्निःश्वसितैः प्रलापैः
निमज्जयन् लोकमशेषमङ्ग सहस्रधारं सरति स्म शोकः ।।८२
निशम्य चैनां निहतां समस्तं जातं जगत् स्तब्धमथावसन्नम्
सञ्चारतन्त्रैर्विविधं पृथिव्यां जनोऽशृणोद् वृत्तमदः स्वकर्णैः ।८३

बाला युवानः स्थविरा गृहस्थाः संन्यासिनो रागिजनास्तथाऽन्ते ।
अवाकिरन्नश्रुचयं पृथिव्यां तत्पार्थिवे पुष्पभरं च देहे ।८४।
मनोव्यथाभिः परितः प्रदीप्ता अल्पेतराभिः करुणाभिराढ्याः ।
कण्ठाज्जनानां सहसाविरासन्नालोकशब्दा नयनाज्जलौघाः ।८५।
यावद् रविस्तिष्ठति यावदिन्दुर्यावच्च तारा धरणिश्च सिन्धुः ।
तावद् यशः स्थास्यति ते धरायां तुषारहारावलिशुभ्रमम्ब ।८६।।
नेयं धरा नापि वपुर्न जीवो न वा स्वकीयो न च पारिषद्यः ।
हा रोचतेऽस्मभ्यमिति ब्रुवाणाः प्राणव्ययं केऽपि जना अकुर्वन् ८७
केचिन्निमग्नाः सलिले तथाऽन्ये निपत्य वह्नौ सुखिनो बभूवुः ।
केचित्पुनः पाशविधिं विधाय प्रच्छन्नभावं परलोकमापुः ।८८।
मन्यामहे तान् पुनरेव धन्यान् येषां मनो दुःखततिं न सेहे ।
इति स्तुवन्ति स्म जनाः पुनस्तान् परासवो हृद्गतिरोधतो ये ८९
रुदन्ति नद्यः प्रतपन्ति वृक्षा जिह्लेति भूर्भूमिधरा द्रवन्ति ।
आशाः कृशाः शोकलवैरमेयैरुन्निद्रतामेति महासमुद्रः ।९०।
मृत्युर्ध्रुवं द्वारमरत्वधाम्नः कलेवरं ध्वंसि समामनन्ति ।
याते पुनर्देहिनि पञ्चभूतान्याप्नोति जीवस्य शरीरमेतत् ।९१।
व्याजाः पुनः केऽपि भवन्ति मृत्योस्तेषामियत्ताप्यवधार्यते नो ।
द्वेष्याः प्रियास्तेऽपि च ये तटस्था जानीमहे नो क्व पुनः प्रयान्ति ।।
आजीवनं साहसमव्ययं यं दैन्यात्ययं चाप्यकरोत् स्वचित्ते ।
परीक्षितं संस्कृतमाश्रितं तमधत्त धृत्या निधनेऽपि माता ।।९३।।
आकल्पमुत्साहततिः सुबद्धो मन्त्रः प्रभावातिशयश्च नित्यम् ।
स्थास्यन्ति कर्माण्यमराणि तस्या नामाजरं स्थास्नु यशश्च भूमौ ।
नित्यं हि साऽस्तिन्ह्यादभ्रसानौ हिमालयेऽनल्पविभूतिरम्ये ।
अमन्यत स्वां तुहिनाचलस्य पुत्रीं निसर्गाद्भुतबोधपूताम् ।९५।

यदा यदाऽऽत्मीयजनैर्नु पृष्टा का ते मनोज्ञास्ति निवासभूमि:।
ईहे हिमानीमहिते हिमाद्रौ वासं तयाऽगादि मनोभिलाष: ।९६।
लोकान्तरं गच्छति तात हंसे किरेर्ममास्थीनि हिमालये त्वम्।
अन्त्येष्टिसंस्कारविधिप्रसङ्गे गान्धीन्दिरा मां बहुशो न्यगादीत्।।
नतोन्नता भीतिकरा निसर्गाद् भूध्रा इमे दूरत एव रम्या:।
इति ब्रुवाणा भुवि सन्ति केचित् परं मनो मे रमते नगेषु ।९८।
न विद्यते पर्वतशृङ्खलानां परम्परा नाम हिमालयोऽसौ।
अयं मनोज्ञा प्रतिमा विभाति महोज्ज्वलादर्शपरम्पराणाम् ।९९।
दिव्याच्छटा कापि महीधराणां सत्येऽध्वनि प्रेरयतीव लोकान्।
उत्कण्ठिशृङ्गेषु च लोक्यमाना भूतिर्विधत्ते खलु तत्त्वबोधम्१००।
निर्माणविध्वंससमस्तशक्तिसमन्वितानां मनुसन्ततीनाम्।
ब्रह्माण्डवर्चस्तुलनाप्रसङ्गे स्थिति: कियन्तं लघिमानमेति १०१।
कायेऽत्र विध्वंसिनि संस्थितोऽसावात्माऽमरोऽसम्भवमानिसर्गात्।
करोत्ययं सम्भविनं मनुष्या इतीव सङ्केतति नो नगेन्द्र: ।१०२।
भवेदसौ वा गदितो वचोभिर्भङ्गीभिराहो ध्वनित: कदाचित्।
इच्छाविशेष: परिपालनीय: पित्रोस्तनूजेरिति दर्शनं मे ।१०३।
अस्थीनि तस्या हिमदेवतायां गङ्गोद्भवे चापि समर्पितानि।
स्वातन्त्र्यदेव्या परिरक्षणाय दम्भोलिवैदग्ध्यमियु: स्वदेशे: ।१०४।
स्वातन्त्र्यदेव्या मधुरस्वरूपसौभाग्यसंवर्धनचूर्णकल्पम्।
तस्याश्चिताभस्म भवेद् विभूत्यै श्रीभारतस्यास्य समग्रतायै ।१०५।
अन्त्येष्टिकार्यै: सममेव तस्या: समाप्यते सम्प्रति लोकयात्रा।
अत: परं वैभवसिद्धिलक्ष्या प्रवर्ततां भारतदेशयात्रा ।१०६।
पदै: पदानां मनसां मनोभिर्मैत्रीं समालम्ब्य चलन्तु लोका:।
दार्ढ्यं विचारेषु मनस्सु चित्ते लभेत निष्ठां जयतु स्वदेश: ।१०७।

दीव्यन्तु कामाः द्रविणानि सन्तु समाजवादो लभतां प्रतिष्ठाम् ।
पुष्यन्तु लोकाः समुदेतु विद्या श्रीभारते क्रीडतु कर्मिणां श्रीः ।।
हिंसा विनश्येत् सुचिराय सर्वे स्वार्था अभद्राः प्रलयं प्रयान्तु ।
चारित्र्यसम्पत्तिरुदेतु नित्यं माद्यन्तु सर्वेऽपि च सम्प्रदायाः ।१०९।
सर्वे युवानः कृतिनो भवेयुर्गुणात्मिका स्यात् परिवृद्धिरत्र ।
आहारपुष्टिर्विहती रुजानां श्रीभारते स्यात् परिवारशस्तम् ।११०।
पुरस्कृतिर्दण्डविधिश्च पुंसां कार्यानुरोधं कुरुतां सदैव ।
क्रीडाश्च शिक्षाश्च लसन्तु नित्यं श्रीभारते नन्दतु कर्मिणां श्रीः ।
उत्पादने सर्वसमत्वभावे ग्रामे पुरे स्त्रीषु नरेषु नित्यम् ।
उद्योगयोगे प्रविकासकार्ये श्रीभारते भातु सदा समृद्धिः ।११२।
शिल्पं सदा शिल्पिगणस्य दिव्यं लेखा मनोज्ञा अथ लेखकानाम् ।
कलाकराणां ललिताः कलास्ताः श्रीभारते सुन्दरतां विदध्युः ।
सुरक्षिता हृष्यतु राजनीतिः स्वस्थाः सदा संस्कृतयो लसन्तु ।
अबाधिता दर्शनपद्धतिः स्याद् धर्मा उदाराश्च समे भवेयुः ।११४।
तस्या वधान्मूढमिवाद्य राष्ट्रं जाने समुत्पिञ्जमिवाति जातम् ।
तथापि शोके विदधातु धैर्यं समोऽपि लोकः प्रणयो ममैषः ।११५।
जने जने सा प्रतिभा नवीना प्रकाशतामैक्यविधानकर्त्री ।
याभिर्भवेच्छान्तिरिहानवद्या भवन्तु दिव्या रचनाः पुनस्ताः ११६।

इत्थं विचारचतुरो निजराजधान्या
आराद् विमानमभिवीक्ष्य निगृह्य शोकम् ।
उत्कैर्जनैः कृतनमस्कृतिराप्तबोधो
याने भुवस्पृशि शनैर्निरगच्छदस्मात् ।।११७।।

अभिनवप्रकाशन-चर्चा

राजेन्द्र-चन्द्रोदय-चम्पूः

लें० डा० रुद्रदेव त्रिपाठी । प्रका० श्रीलालबहादुरशास्त्रिकेन्द्रीयसंस्कृत-विद्यपीठम्, शहीद जीतसिंह मार्गः, नयी दिल्ली-११००१६ । १९८५ ।

संस्कृतभारतीं सेवामाना विद्वांसः प्रत्यहं किमपि नवीनं चिन्तयन्ते, किमप्यभिनवं रचयन्ते, किमपि वास्तविकं विद्योतयन्ते चेति चिरन्तनी भणितिः साम्प्रतमपि तथैव सार्थिका वर्तते । भारतस्य प्रतिकोणं विराजमाना, संस्कृत-साहित्यकाराः साहित्य-सेवायां प्रतिपदं जागरूकाः सन्तो यादृशी कृतीः प्रस्तुवन्ति तद्विषये 'अर्वाचीनसंस्कृत'स्य माध्यमेन वयं निवेदयाम एव । तस्यामेव शृंखलायां राजधान्यां श्रीलालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविद्यापीठस्यानुसन्धान-प्रकाशन-विभागस्याध्यक्षपदे कर्म सम्पादयतो डॉ० रुद्रदेवत्रिपाठिमहाभागस्य सद्यः प्रकाशमायान्ती **'राजेन्द्रचन्द्रोदय-चम्पू'** नाम्नी गद्य-पद्य-मिश्रिता साहित्य-सौहित्य-समन्विता कृतिरस्माकं दृग्गोचरीभूता, विलोक्य चास्या वैशिष्ट्येनाह्लादितान्तरङ्गा वयमात्मनोऽभिन्नान् सुहृदोऽपि परिचाययितुमुत्कास्तद्विषये किमपि प्रस्तुमः ।

कृतिरियं संस्कृत-साहित्यस्य रचनाविधासु **'गद्य-पद्यमयं काव्यं चम्पूरित्यभिधीयत'** इति लक्षणमनुसरति । संस्कृत-साहित्ये सन्ति परःशतानि चम्पूकाव्यानि । तेषामेव सरणिमङ्गीकुर्वता डॉ० त्रिपाठिमहाभागेन कृतिरियं महामहिमराष्ट्रपति-डॉ० राजेन्द्रप्रसादस्य जन्मशताब्दपूर्तिमभिलक्ष्य तस्य महापुरुषस्य जीवनचरित्राञ्चिता विरचिता । अस्या निर्माणे स्वस्याः पूर्वसिद्धाया लेखन्या उपयोगेन सहैव केचन नवीना विधयोऽप्यत्र सन्ति स्वीकृताः । यथा हि—

अस्यां श्रीराजेन्द्रप्रसादस्य जीवन-चरित्रेण साकमेव राष्ट्रियतायाः सञ्चाराः, संस्कृतेरुद्गाराः, नैतिका विचाराः, कांग्रेस-संस्थाया सेवाप्रकाशः सत्याग्रहस्य सविनयावज्ञान्दोलनस्य चावताराः सुभाषितपद्यैः स्वयं च विनिर्मितैः गुम्फिताः । चन्द्रमसस्तान्त्रिक्यः षोडशकला-'अमृताद्या' अत्र षोडश प्रकरणानां नामसु नियोजिताः । प्रत्येकं कलाया आरम्भे वेदस्यैको मन्त्रः प्रकरणविषयानुरूपः प्रथमं शीर्षके उट्टङ्कितः । ततः पद्यद्वारा विषयप्रस्तुतिं विधाय गद्येनानवद्यं प्रस्तुतं वस्तु पुरस्कृतम् । यथा प्रथमं स्वातन्त्र्य-मङ्गलाचरणे :—

आद्यं मानव-संस्कृतेः प्रथमतः स्रोतो यतः प्रावहद्
यस्या विश्वजनीन-विस्तृतिविधौ यत्नश्च सम्पादितः ।
रक्षायामपि नित्यशः प्रहरिवज्जागर्तिरासादिता,
तत्त्वज्ञान-विसारि भातु भुवि तच्छोभारतं भारतम् ॥५॥

ज्ञानं शौर्यं मनोवाक्तनुभिरनुदिनं पौरुषप्राप्तियत्नं,
विज्ञानं यत्र चित्रं प्रथितमतियुतं वीर्य-तेजोऽभिवृद्धम्।
ब्रह्मक्षत्रार्यतुर्याः प्रगतिधिषणया संवसन्तो निषादा,
अध्वन्याः पाञ्चजन्या विदधति नितरां तद्धि धन्यं स्वराष्ट्रम् ॥६॥

साम्यं सौम्यं समेषां सुषमितमखिलं साधु संसाधयन्ती,
सध्रीचीनान् सजोषं समिति-सृति-दिशाऽऽशंसमानाऽसमाना।
सत्ये संयोजयन्ती जयति जगति या साम्मनस्येन सम्यक्,
सा नो भूमिः समन्तात् सृजतु सुखततिं सर्वतन्त्रस्वतन्त्रा ॥७॥

अमृतायां कलायां भारतवर्षस्य प्राकृतिकं सांस्कृतिकं भौगोलिकं राजनीतिकं च चित्रं गद्येनातीव रमणीयतयाऽलङ्कारसक्ततया सरस्वत्या विहितम्। पराधीनतान्धकार-प्रसारमुपवर्णयन् कविः कथयति—

"अस्तं गतवति गभस्तिमालिनि शनैः शनैः सायं सन्ध्या प्रवर्तते। स्वच्छः प्रकाशोऽप्याकाशादवनीतलं यावत् पाटलिमानं गच्छति। नैशं तमः स्तारयति तरसा स्वीया असिता असिततरा असिततमाः क्रमशः पक्षतीः। अञ्जनलिप्ते इव दृश्येते द्यावाभूमी। बाह्येन कालुष्येण सह दुर्जनानामन्तरङ्गमपि कालुष्यमात्मसात् करोति। एवं सर्वत्र प्रसरति साम्राज्यमन्धकारस्य।"

भाषायाः प्रयोग-नैपुण्यं पूर्णतया परिचिनोति श्रीत्रिपाठी। अत एव सरल-सरला भाषैव सर्वत्र प्रयुक्ता तथापि यत्र तत्र चमत्कृति-सौष्ठवमपि दर्शितम्। ग्रामश्रियो दर्शनं कवेरस्य हृदयग्राहि प्रतीयते। यथा—

सानन्दं सुषमाश्रयेषु वसति साधारणं जीवनं,
शुद्धं नीरसमीरसंश्रितशुचि श्यामाञ्चलं चञ्चलम्।
अन्नं वस्त्रमथोपयोगि विमलं प्रेम प्रसादोदयं,
ग्रामश्रीः श्रयते सुखानि सकलान्यत्रैव निर्व्याजतः॥

डॉ० रुद्रदेवत्रिपाठिनं संस्कृत-विद्वांसो भूयसा कालेन जानन्ति। 'मालव-मयूर' नाम्ना संस्कृतमासिकपत्रसम्पादनकालात् १९४७ ई० वर्षादेव अभिनव-संस्कृतगीतिकारत्वेन, विनोदपद्य-निर्मातृत्वेन, शब्दालङ्कार-प्रबन्धलेखकत्वेन, चित्रकाव्यरचयितृत्वेन, अभिनव-क्रीडातरङ्गिणी-चतुर्वेदचरित-चम्पू-पत्रदूत-पुत्र-दूतादिविविधसाहित्यप्रदातृत्वेन तथा मन्त्र-तन्त्रात्मक-प्रौढग्रन्थलेखनसम्पादन-द्वाराऽस्य विदुषो वैशिष्ट्यं बहुमुखि विख्यातम्।

डॉ० राजेन्द्रप्रसादमहाभागानां जीवनं वस्तुतो भारतस्य दास्यकाले चन्द्रोदय

इवाभवदिति प्रतिपादनाय कविर्लिखति—

सत्यत्यागतपःसमत्वशुचितानिर्भीकताः शिक्षयन्,
कर्तव्यं प्रतिबोधयन् स्वचरितैरन्तर्बहिः स्पष्टयन् ।
राष्ट्रव्याप्ततमस्ततिं च तिरयन् दीनान् समाह्लादयन्
स्वच्छे व्योम्नि सुधांशुभिर्लसदभूद् 'राजेन्द्रचन्द्रोदयः' ॥

इत्थं दिल्लीस्थेन संस्कृतविद्यापीठेन प्रकाशनं प्राप्तवत्याः 'शोध-प्रभा'-ऽभिधानायास्त्रैमासिकपत्रिकायाः प्रायोऽष्टवर्षेभ्यः सुसम्पादकेन श्रीत्रिपाठिना बहुशो विशेषाङ्काः, कानिचन प्राचीनानि नाटकानि, विद्यापीठे प्रतिवर्षं सम्पद्यमानानि शारदव्याख्यानानि च पुस्तकरूपेण प्रकाशितानि ।

इमां "राजेन्द्रचन्द्रोदय-चम्पू" निर्माय डा॰ रुद्रदेवत्रिपाठिना संस्कृत-साहित्ये राष्ट्रिय-साहित्यस्य या श्रीवृद्धिः क्रियते सा सत्यमेव स्पृहणीयतामर्हति । एतदर्थं कवये धन्यवादान् वितीर्य ग्रन्थावलोकनाय विदुषोऽभ्यर्थये ।

(२) गुरुमाहात्म्यशतकम्

रच० डा० कैलाशनाथ द्विवेदी । **प्रका०** सुबोध प्रकाशन, कानपुर । **संस्क०** प्रथमं १९८१ ई० ।

अस्मिन् शतककाव्ये डा० कैलाशनाथ द्विवेदिना विषयावतरणम्, विषयप्रतिपादनम, प्राचीनकाले आदर्शगुरूणां निदर्शनम्, आधुनिककाले गुरूणां (शिक्षकानां) स्थितिः, उपसंहारश्चेति षट्सु शीर्षकेषु गुरुमवलम्ब्य १०९ मुक्तकानि रचितानि । गुरोर्महत्त्वं प्रकाशयन् रचनाकारः कथयति—

अपनयति तमो यः सर्वदा ज्ञानदीप्त्या
मथयति परिशुद्ध्यै चित्रवृत्तीः दयालुः ।
वितरति वरविद्यां यः सदा साम्यरीत्या
गुरुजनसदृशः को विद्यतेऽस्यां धरायाम् ॥ (४५)

एषु पद्येषु डा० द्विवेदिना गुरु-शिष्याभिभावकविषयिण्योऽनेकाः समस्यास्तासां समाधानानि च प्रस्तुतानि । संस्कृते शुद्धं मुद्रणं विरलमिव दृश्यते । अस्माभिरपि प्रत्यङ्कं मुद्रणगतास्त्रुटीः संशोधयितुं पाठका विनिवेद्यन्ते । '**गुरुमाहात्म्यशतकस्य**' पाठका अपि '**उन्नतिर्खलु**' '**गुर्र्हि**'—प्रभृत्यनेकानि मुद्रणप्रमादस्खलितानि समाधातु प्रार्थ्यन्ते । अत्र रचनाकारस्य न दोषोऽपितु प्रकाशकस्यैव सीमा ।

शुद्धरूपेण छात्रेषु संक्रान्तानि इमानि पद्यानि नूनमेव तेषु गुरुभक्तिं जनयिष्यन्ति गुरूँश्चापि आत्मालोचनाय प्रचोदयिष्यन्तीति आशास्यते ।

(३) अग्निशिखा

रचयित्री : डा० पुष्पा त्रिवेदी । **प्रकाशक :** ऋतम्भरा-प्रकाशनम्, बी-५, पचपेढ़ी, सरस्वती - विहारः, जबलपुरम् (म०प्र०) । प्रथमं संस्करणम् १९८४ ई० । **मूल्यम्** ३५ रूप्यकाणि सामान्यस्य, ५० रूप्यकाणि आङ्ग्लानुवादयुतस्य ।

डा० पुष्पात्रिवेदिमहाभागया **अग्निशिखायां** संकलितानां गीतानां रचना आयासेन नैव कृता । स्वतः समुच्छलितानां भावानामहमहमिकया प्रस्तुतिरत्र संकलितेषु गीतेषु जाता इत्येव प्रतीयते ।

विप्रलम्भे यथा प्रेमिका दूरस्थं प्रियमुपालभते, यथा च मनोगतं तं स्वमनोदशां दर्शयति, यथा च तमनुरुणद्धि, यथा च तस्मिन्ननन्यां प्रीतिं धारयति, यथा च तं विना शून्यमिव पश्यति जगत्, तत्सर्वमेव सरलया सरसया रीत्या डा० त्रिवेदिमहाभागया 'अग्निशिखायां' व्यक्तीकृतम् ।

पश्यन्तु भावुकाः, कथं स्वाभाविकतया मुग्धतया च मनोगतं प्रियं प्रेमिका उपालभते :—

अयि दयित ! हृदये वसन्नपि दर्पितो दयसे न किम् ?
तव मनो दम्भोलिघटितं पीडया व्यथते न किम् ?

आधुनिकेऽनेहसि कयापि कवयित्र्या संस्कृते एतादृशानि सहजभावोद्गारपूर्णानि विप्रलम्भगीतानि अद्यावधि न रचितानीति मया निःशंकं वक्तुं शक्यते ।

शिल्पमपि नवीनम् । न केवलं नवीनमेव अपितु मनोज्ञमपि । यदि नामाधुनिक्यो विश्वविद्यालयीयाश्छात्रा (असंस्कृतज्ञा अपि) एतानि गीतानि शृणुयुस्तदावश्यमेव ता एतानि कण्ठस्थानि करिष्यन्तीति निर्द्वन्द्वं वक्तुं शक्यते यतो हि ता अवश्यमेव एतेषु तत्तत्त्वमनुभविष्यन्ति यद्धि कदाचिदवश्यं तासां जीवने पदमधात्, धत्ते धास्यति वा । न केवलं विश्वविद्यालयीया अपितु प्रौढा अपि स्वमनोभावानेतेषु गीतेषु साक्षात्करिष्यन्ति । कानिचन वाक्यानि प्रस्तूयन्ते, सहृदया मात्सर्यमुत्सार्य वदन्तु किमेतानि एकवारं श्रुतानि विस्मर्तुं शक्यन्ते कयापि केनापि वा ?

(१) अयमेव मेऽपराधस्त्वमवेक्षितो मया किम् ? (पृ० ६४)

(२) न श्रुता नोत्प्रेक्षिता नैवानुभूतेयं स्वता ।
यादृशी जनिता मनसि समुपेत्य तव दर्शनपथम् । (पृ० ३२)

(३) निर्निमेषं यामिनी गमिता मया ।
दर्शनं स्वप्नेऽपि नो दत्तन्त्वया ।। (पृ० २६)

(४) वीथिका सा वृथा त्वं न लब्धो यया
सैव वीथी यथा त्वन्मनो गम्यते । पृ० (१३)

यदि नामैतेषां गीतानां सस्वरमङ्किता ध्वनिपट्टिका: (कैसेट टेप) प्रस्तूयेरँस्तदा विद्युद्गत्या युवजनेषु संस्कृतस्य प्रसारो भविष्यतीति निःसंशयं विश्वसितुं शक्यते ।

क्वचन फिल्मगीतानां प्रभावोऽपि एतेषु अवलोक्यते परं सोऽपि सरस-संस्कृतशैल्यां विलीन एवाभाति ।

भक्ता: पुनरेतेषु कानिचन गीतानि रहस्यवादमार्गेण भगवन्तं प्रति प्रयोक्तुं तथैव स्वतन्त्रा: यथा ते मीराया गीतानि प्रयुञ्जते ।

यद्यपि आंग्लानुवादेनेयं संवलिता कृतिः असंस्कृतज्ञानां सहृदयानामपि हृदयंगमां भविष्यति तथापि अस्या स्वारस्यं कामयमानैः पाठकैः मूल-कृतिरेव सस्वरं पठितव्या ।

अधिगतकतिपयाक्षरा लेखनी अपरिमितभावराशिमुद्गिरन्त्या मधुर-पीडामय्या शालीनाया अस्याः कृतेः सकलान्यपि वैशिष्ट्यानि समुद्घाटयितुं नालम् । नूनमियं कृतिः संस्कृत-साहित्ये कामपि नूतनां विच्छित्तिं धत्ते। यदि पण्डिताः संस्कृतस्य सत्वरं प्रसारमभिलषन्ति तर्हि एतस्या कृतेः पाठ्यक्रमे निर्धारणमावश्यकम् । कवयित्री भूयो भूयो वर्धाप्यते अग्नि-शिखाया रचनार्थम् ।

(४) संस्कृत-शिक्षण-सरणी

ले० आचार्य राम शास्त्री । प्रका० मयङ्कप्रकाशन, ६२६ डी०डी०ए० फ्लैट्स्, कालकाजी, नयी दिल्ली-११००१६ । संस्क० प्रथमम् १६८३ ई० । मूल्यम् रु० ८५/- (सजिल्दस्य) रु० ७५/- (अजिल्दस्य) ।

६०० पृष्ठमयेऽस्मिन् ग्रन्थे सरलरीत्या व्यावहारिकदृशा आचार्यरामशास्त्रि-महाभागैः संस्कृत-शिक्षणविधिरुपदिष्टः । कारक-विभक्ति-क्रिया-शब्दरूप - सर्व-नाम - विशेषण-तिङन्त-सुबन्त - प्रत्यय - प्रक्रिया-समासादीनां हिन्दीमाध्यमेन सोदाहरणं विवेचनं कृतम् । संस्कृतानुवादमवजिगमिषूनां कृते ग्रन्थोऽयं परमो-पकारकः ।

(डा० रमाकान्त शुक्लः)

देववाणी-परिषद्वार्ता

(१) अर्वाचीनसंस्कृतस्य फिलाडेल्फियायां समुन्मीलनम्

१५-१०-१९८४ ई० तारिकायां फिलाडेल्फियायां षष्ठविश्वसंस्कृत-सम्मेलनावसरे प्रो० रामचन्द्र नारायणदाण्डेकरमहाभागैः अर्वाचीनसंस्कृतस्य षष्ठवर्षपूर्त्यङ्कः समुन्मील्य शिकागोविश्वविद्यालयस्य संस्कृत-विभागाचार्येभ्यः डा० एड्विन गैरो-महाभागेभ्यः समर्पितः। अस्मिन्नवसरे नैकैर्भारतीयैरन्य-देशीयैश्च संस्कृतविद्वद्भिः पत्रस्य प्रकाशनार्थं देववाणी-परिषदभिनन्दिता। पत्रस्य प्रधानसम्पादकेन डा० रमाकान्त शुक्लेन संक्षेपतः पत्रस्येतिहासः समुपस्थापितः।

(२) ध्वनिपट्टिकायां सम्पूर्णगीतापाठः

देववाणी-परिषदो नवमस्थापनादिवसे १३.१२.१९८४ ई० तारिकायां परिषदध्यक्षैः आचार्यरमेशचन्द्रशुक्लैः डा० रमाकान्तशुक्लस्य स्वरे सम्पूर्ण-गीतापाठं दधाना ध्वनिपट्टिका (Cassette) प्रवर्तिता।

(३) संस्कृत-साहित्ये इन्दिरागान्धी

देववाणी-परिषदस्तत्त्वावधाने १९-११-१९८४ ई० तारिकायां डा० रमाकान्त शुक्लेन 'संस्कृत साहित्ये इन्दिरा गान्धी' इति विषयमवलम्ब्य वार्ता प्रस्तुता।

(४) त्रिदिवसीये सारस्वतसमारोहे मौरिशस-संस्थाभ्यः ध्वनिपट्टिका-समर्पणं, ग्रन्थोन्मीलनञ्च

मकरसंक्रान्त्यां (१४-१-१९८५ ई० तारिकायां) देववाणी-परिषद-स्त्रिदिवसीयः सारस्वत-समारोहः प्रारब्धः।

अस्य प्रथमदिवसे केन्द्रीयशिक्षामन्त्रिणा श्रीकृष्णचन्द्रपन्तमहाभागेन परिषत्पक्षतः उपहारस्वरूपं 'मौरिशस-सनातनधर्म-मन्दिर-परिसङ्घ (फैडरेशन)'-अध्यक्षाय श्रीपरमानन्द रामलखन-महाभागाय एकशतं ध्वन्यंकितपट्टिकाः (Cassette) समर्पिताः। एतासु ध्वनिपट्टिकासु संस्कृतश्लोकानां सस्वरं पाठो ध्वन्यंकितोऽस्ति।

अस्मिन्नवसरे शिक्षामन्त्रिणा परिषत्प्रकाशितं डा० रमाकान्त शुक्ल-प्रणी 'भाति मौरीशसम्' नाम काव्यमपि समुन्मीलितम् । मौरिशसमवलम्ब्य संस्कृ भाषायामिदं हि सर्वप्रथमं काव्यं वर्तते यस्य रचना कविना १७.३.१९८४ ई दिनांके मौरिशस एव कृतासीत् । अस्यापि एकशतं प्रतिरूपाणि परिषत्पक्ष शिक्षामन्त्रिणा श्रीरामलखनमहाभागाय उपायनीकृतानि ।

समारोहेऽस्मिन् शिक्षामन्त्रालये अपरसचिवपदमलंकुर्वती डा० कपि वात्स्यायन-महाभागा, संस्कृतोपशिक्षापरामर्शदाता डा० स्वामिनाथ-महाभाग राष्ट्रियसंस्कृत संस्थाननिदेशको डा० मण्डनमिश्र-महाभागः, भारतीयभाषा विभागनिदेशिका डा० आदर्शमिश्र-महाभागा तथान्येऽपि शिक्षाविदः समुपस्थि आसन् ।

समारोहस्य द्वितीये दिवसे, अद्य १५.१.१९८५ ई० तारिकायां, डा० मण्डनमिश्र-महाभागः अर्वाचीनसंस्कृतस्य सप्तमवर्षीयमिमं प्रथमांकं समुन्मील यति ।

तृतीये दिवसे श्वः (१६.१.१९८५ ई० तारिकायां) डा० सुलेखचन्द्रशर्मण **'साधारणीकरण और समानान्तर चिन्तन'** इत्येतत्परिषत्प्रकाशितं ग्रन्थं केन्द्रीय हिन्दी-निदेशालयस्य निदेशकः श्रीराजमणितिवारी महाभागः समुन्मीलयिष्यति ग्रन्थमवलम्ब्य प्रो० तारकनाथवाली-डा० सुन्दरलालकथूरिया-महाभागौ विमर्शं विधास्यतः । दिल्लीविश्वविद्यालयस्य हिन्दीविभागाध्यक्षः प्रो० महेन्द्रकुमार-महाभागः समारोहस्याध्यक्ष्यं निर्वक्ष्यति ।

संस्कृत-जगद्वार्ता

फिलाडेल्फियायां षष्ठं विश्वसंस्कृत-सम्मेलनं सम्पन्नम्

संयुक्तराष्ट्रामेरिकादेशे फिलाडेल्फिया-नगरे पेन्सिल्वानिया-विश्वविद्याल १३.१०.१९८४—२०.१०.१९८४ तारिकासु षष्ठं विश्वसंस्कृतसम्मेलन सम्पन्नतामगात् यत्र नानादेशागतैर्विद्वद्भिः द्विशतप्रायाणि शोधपत्राणि प्रस्तुतानि । सम्मेलनस्योद्घाटनं प्रो० रामचन्द्रनाराणदाण्डेकर-महाभागैः कृतम् । अस्मिन्नवसरे 'आदिशंकराचार्य' चलच्चित्रस्य प्रदर्शनं, कु० एलन-कृ सितारवादनं, पुस्तकप्रदर्शनी, 'शारदा'-पत्रिका दैनिकसंस्करण-'जगन्नाथज्योतिः' 'अर्वाचीनसंस्कृत' - पत्राणां विमोचनानि, विश्वसंस्कृतकविसम्मेलनं चापि समायोज्यन्त ।

कविसम्मेलनस्याध्यक्षतां भारतीय-शिष्टमण्डलनेता डा० मण्डनमिश्रमहाभागः संयोजनं च देववाणी-परिषन्महासचिवो डा० रमाकान्तशुक्लश्चक्रतुः । डा० प्रभाकरनारायण कवठेकर - डा० सत्यव्रतशास्त्री - डा० रमा चौधुरी-डा० रसिकविहारी जोशी-डा० भास्कराचार्य त्रिपाठी-डा० माधव देशपाण्डे-प्रभृतयः काव्यपाठमकार्षुः ।

श्री० भि० वेलणकरस्याभिनन्दनम्

मुम्बापुर्यां विगतेऽक्टूबरमासे देववाणी-मन्दिराध्यक्षः श्री० भि० वेलणकर-महाभागः संस्कृत-सपर्यार्थं समभिनन्दितो बभूव । अनेन महानुभावेन संस्कृत-प्रचारार्थं नैकानि कार्याणि अनुष्ठितानि । तत्सम्पादिताः **'पुराणवाङ्मय-परिचयः', 'नाट्यकथासागरः', 'सूत्रवाङ्मयदर्शनम्'** इत्येतदादिकाः, तत्प्रणीताः **'श्रीलोकमान्यस्मृतिः' 'प्रीतिपथे'** इत्येतदादिकाश्च ग्रन्थास्तस्य सारस्वत-साधनायाः निदर्शनभूताः । श्रीवेलणकरमहाभागस्याभिनन्दनं वस्तुतः संस्कृतं प्रति सात्त्विकश्रद्धाया एवाभिन्दनमस्ति । अयं महानुभावो जीवेत् शरदः शतम् ।

लोकसभाध्यक्षेण श्रीरामशास्त्री सन्मानितः

विगतेऽक्टूबरमासे लोकसभाध्यक्षेण श्रीबलरामजाखड-महाभागेन चतुर्णवतिवर्षदेशीयो जनुषा प्रज्ञाचक्षुः, आचार्यरामशास्त्रिमहाभागः, तल्लिखितं **'संस्कृतशिक्षण-सरणी'**तिनामधेयं पुस्तकमधिलोकसभं विमोचयता, एकोत्तर-पञ्चभिः सहस्रैः रूप्यकैरुत्कीर्णसंसद्भवनराजतपात्रेण च सन्मानितः ।

देववाणी-मन्दिरस्य दशवर्षाणि

१९७४ तमेशवीयेऽब्दे मुम्बापुर्यां स्थापितं देववाणी-मन्दिरं १९८४ तमेशवीयेऽब्दे दश वर्षाणि पारितवत् । अस्मिन्नन्तराले मन्दिरेण संस्कृते संगीतसभा-संगीतस्पर्धा-काव्यरचना-शिक्षावर्ग-नाट्यप्रयोग-प्रकाशन-दूरदर्शनसहभागयनृत्य - वेदपठनादिविविधानां कार्यक्रमाणां ५२० आयोजनानि कृतानि । **'गीर्वाणसुधा'** नाम्नी मासिकपत्रिकापि १९७९ तः मन्दिरेण प्रकाश्यते । **'बालगीतं रामचरितं'** विदेशेष्वपि मन्दिरेण प्रस्तुतम् । मन्दिरस्य सदस्या एवमेव संस्कृतसेवापरा भवन्त्विति परमेश्वरः प्रार्थ्यते ।

संस्कृत-सेवा-संस्थानस्य दशवर्षाणि

दिल्लीस्थं संस्कृत-सेवा-संस्थानं दश वर्षाणि पूरयति । १९८५ तमेशवीयेऽब्दे संस्थानेन **'दशाब्दि-स्मारिका'** प्रकाश्यते यस्यां दिल्ल्याः संस्कृत-संस्थानां विवरणं प्रस्तूयते । संस्थानस्य सचिव आचार्यरामदयालुशास्त्री

यथा संस्थानस्य कार्यकलापानग्रे सञ्चालयति तदर्थमसौ महानुभावः साधुवादानर्हति ।

संस्थानेन, नवदिल्ल्याम् उत्तमनगरस्थे 'गुड्विल चिल्ड्रन पब्लिक स्कूले' ३-१२-१९८४ ई० तारिकायां स्व० डा० राजेन्द्रप्रसादस्य जन्मदिवसः सम्मानितः । अस्मिन्नवसरे संस्कृत-श्लोक-गायन-प्रतियोगिता, चित्रकलाप्रतियोगिता बालनाटकानि च समायोजन्त यत्र द्विशतप्रायैर्विद्यार्थिभिः सहभागित्वं सम्पादितम् । सरस्वत्याः प्रतिमाया अनावरणेन समारोहस्योद्घाटनं डा० रमाकान्त शुक्लः, पुरस्कारवितरणं च केन्द्रीयशिक्षामन्त्रालये संस्कृतोपशिक्षापरामर्शदाता डा० स्वामिनाथमहाभागश्चक्रतुः ।

किशोराणां संस्कृत-वाग्व्यवहारः

उत्तरप्रदेशे मुजफ़्फ़रनगरस्य कैश्चित्किशोरैः दैनन्दिनव्यवहारे संस्कृतस्योपयोगार्थं निश्चयः कृतः । अरविन्दनाभशुक्लेन प्रेरितैः आनन्दवर्धन-अभिनव-प्रज्ञा-सुस्मिता-वन्दना-शिवप्रकाशप्रभृतिभिश्छात्रैरिदं कार्यं प्रारब्धमेव । असंस्कृतज्ञैरपि एतेषां किशोराणामनुकरणेन संस्कृतं यथाशक्ति समुत्सुकतया अङ्गीक्रियते । मुज़फ़्फ़रनगरस्थसनातनधर्मकालेज-संस्कृतविभागाध्यक्षेण डा० रमेशकुमार लौ-महाभागेन एते बालकाः साधुवादैः सभाजिताः सन्ति ।

पण्डितभगवद्दत्तवेदालंकाराय पुरस्कारः

जयपुरस्थ-'संघड़-विद्या-सभा-न्यासेन' १९८५ तमे वर्षे प्रकाण्डवेदविदुषे पण्डितभगवद्दत्तवेदालंकार-महाभागाय एकसहस्ररूप्यकात्मकः **'आचार्यगोवर्धनशास्त्रिपुरस्कारः'** समर्पयिष्यते ।

विश्वभाषाया रम्यरूपम्

विश्वसंस्कृतप्रतिष्ठानेन वेदपुरीतः सचित्रं **'विश्वभाषा'** संस्कृत-पत्रिका प्रकाश्यते । विगतेऽङ्के गीतामाश्रित्य प्रकाशिता सचित्रसामग्री बालानामपि प्रिया भविष्यतीति विश्वस्यते । वर्धापनमर्हन्ति सम्पादन-प्रकाशनकर्मणि लग्नाः सज्जनाः ।

(रमा शुक्ला)



एकता – हमारा संकल्प

हम सभी एक ही परमेश्वर के उपासक हैं जिसकी हम अलग-अलग नामों से पूजा कर हैं। इसलिए हमें अपनी आधारभूत एकता को अवश्य बनाए रखना होगा तथा छुआ-छूत त्याग करना होगा। इसके साथ ही साथ मनुष्यों के बीच ऊंच-नीच की भावना का त्याग अत्यन्त आवश्यक है।

बापू ने यही सीख हमें दी थी। उपेक्षित लोगों की सेवा में बापू ने स्वयं को पूरी तरह समर्पित कर दिया था। उनका संदेश था "सम्पूर्ण समाज की भलाई।"

सभी लोगों को सामाजिक न्याय प्रदान करना हमारा राष्ट्रीय लक्ष्य है जिसे विभिन्न वि कार्यक्रमों और विशेषकर 20-सूत्री कार्यक्रम के माध्यम से प्राप्त करने के लिए हम सतत प्रयत्नशील हैं।

प्रधानमंत्री श्रीमती इंदिरा गांधी के शब्दों में देश के विकास के लिए बनाई जाने वाली योजनाओं का उद्देश्य देश के आर्थिक आधार को मजबूत करना है ताकि जितनी जल्दी हो सके अपने देश से हम गरीबी को उखाड़ फेंकें और समाज में व्याप्त आर्थिक पिछड़े को दूर कर सकें।

पिछड़ापन दूर हो – हमारा निरन्तर प्रयास


अपने दोनों बच्चों के बी
तीन वर्ष का अन्तर रखे
निरोध
कापर टी
ओरल पिल
NIRODH
कोई भी तरीका अपनाए
davp 84/225

स्वाधीनता
एक वरदान और एक सौभा

आज से 37 साल पहले हमने अपनी पराधीनता की बेड़ियां तोड़ डालीं और हमारी गिनती स्वाधीन देशों में हुई।

तब से जीवन के हर क्षेत्र में हमने तीव्रता से प्रगति की है।

*आज देश की आवश्यकताओं के लिए हमारे किसान भरपूर अनाज उगाते हैं।

*आज दुनिया के औद्योगिक देशों में हमारा गौरवपूर्ण स्थान है।

देश के बच्चे-बच्चे को सामाजिक और अ न्याय दिलाने के लिए बीस सूत्री कार्यक्रम एक व बनकर आया है।

इस सौभाग्यशाली लक्ष्य की प्राप्ति के लिए प्रगति का क्रम जारी रखना है और आंतरिक बाहरी खतरों से अपनी स्वाधीनता और अखण्डत रक्षा करनी है।

आइए ! अपनी स्वाधीनता के 38 वें साल हम मेहनत और एकजुट होकर काम करने का प्रण इसीके माध्यम से हम अपने घोषित लक्ष्य प्राप्त सकते हैं।

"अगर मैं देश की सेवा करते हुए मर भी जाऊं तो भी मुझे इस बात का गर्व होगा। मुझे उम्मीद है कि मेरे खून की हर बूंद इस देश की प्रगति के काम आएगी और इसे मजबूती तथा गति प्रदान करेगी।"

30 अक्तूबर 1984 — श्रीमती इंदिरा गांधी

अर्वाचीनसंस्कृतम

(R·N· 34554/79)

❀

१. प्रकाशन का स्थान — नयी दिल्ली

२. प्रकाशन की आवधिकता — त्रैमासिक

३ मुद्रक तथा प्रकाशक का नाम, राष्ट्रीयता तथा पता — डा० रमाकान्त शुक्ल (देववाणी-परिषद्, दिल्ली-कृते) ६, वाणी-विहार, नयी दिल्ली-११००५९

४. सम्पादक का नाम, राष्ट्रीयता तथा पता — डा० रमाकान्त शुक्ल
भारतीय
६, वाणी-विहार. नयी दिल्ली-११००५९

५. उन व्यक्तियों के नाम और पता जो इस पत्रिका के मालिक या साझेदार हैं अथवा जो इसको सारी पूँजी के एक प्रतिशत से अधिक के हिस्सेदार हैं। — देववाणी-परिषद्, दिल्ली
६. वाणी-विहार, नयी दिल्ली-११००५९

मैं, डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल
महासचिव, देववाणी-परिषद्, दिल्ली
प्रकाशक

माननीयः केन्द्रीयशिक्षामन्त्री श्री कृष्णचन्द्रपन्त-महाभागः
१४.१.१९८५ तारिकायां देववाणी-परिषत्प्रकाशितं
'भाति मौरीशसम्' काव्यं समुन्मीलयति
(विवरणं ७७-७८ पृष्ठयोः)

(वामतो दक्षिणम्) १. काव्यप्रणेता डा० रमाकान्त शुक्लः, २. काव्यसमुन्मीलन-कर्त्ता शिक्षामन्त्री श्री कृष्णचन्द्र पन्त., ३. श्री सूर्यमूर्तिः ४. श्रीपरमानन्द रामलखनः (मौरिशस-सनातनधर्म-मन्दिर-परिसङ्घाध्यक्ष.)

'देववाणी-परिषद् दिल्ली'-कृते डा० रमाकान्त शुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहार, नयी दिल्ली-११००५९' तः प्रकाशितम् अर्वाचीनसंस्कृतम् (७/१)। प्रधानसम्पादकः—डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५.१.१९८५।

र्वाचीनसंस्कृतम्

वामिनाथ-विशेषांकः

ववाणी-परिषद्, दिल्ली

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

स्वामिनाथ-विशेषांकः

(सप्तमवर्षे द्वितीय-तृतीय-संयुक्तांकः)

१५ अप्रैल --१५ जुलाई १९८५

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम०ए०, पीएच०डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

प्रकाशिका

देववाणी-परिषद्, दिल्ली

ई॰ वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

अर्वाचीनसंस्कृतम् (७/२-३)
स्वामिनाथ-विशेषांक:
(अप्रैल-जुलाई १९८५ ई० संयुक्ताङ्क:)

प्रकाशनतिथि: १५ अप्रेल १९८५ ई०

सम्पादक: : डा०रमाकान्त शुक्ल:

प्रकाशिका : देववाणी-परिषद्, दिल्ली
६, वाणी-विहार:, नयी दिल्ली-११००५९

मुद्रक: : देववाणी प्रिण्टर्स
उत्तम नगर, नयी दिल्ली-११००५९

Arvācīnasaṁskṛtam (7,2-3) Svāminātha-Viśeṣaṁka

(Joint II & III number of Volume VII April-July 1985)

Issued on 15.4.1985

Chief Editor : Shukla, Dr. Rama Kant

Pudlished by : Devavani Parishad, Delhi
6, Vani Vihar, New Delhi-110059

Printed at : Dev Vani Printers
Uttam Nagar, New Delhi-110059

अनुक्रमः

१.	सम्पादकीयम्	डा० रमाकान्त शुक्लः	७
२.	भारतस्य महामहिमोपराष्ट्रपति-श्री रामस्वामी वेंकटरामन्-महाभागानां सन्देशः		९
३.	प्रधानमन्त्रिणः सूचनापरामर्शदातुः श्री एच०वाई० शारदाप्रसाद-महाभागस्य सन्देशः		१०
४.	सहर्षमभिनन्दनम्	आचार्य विश्वनाथ शास्त्री	११
५.	सन्देशः	डा० जयमन्त मिश्रः	१२
६.	राजतां मोदतां तद्विशिष्टं महः	डा० कृष्णकान्त शुक्लः	१३
७.	सन्देशः	श्री स० रामकृष्णन्	१४
८.	सन्देशः	श्री सी०आर० पट्टाभिरामन्	१५
९.	सन्देशः	श्री ईश्वर भाई पटेलः डा० एन. एम. कंसारा	१६
१०.	श्रीस्वामिनाथप्रशस्तिः	श्री वि० रघुराम शास्त्री	१७
११.	श्रीयुत. शात्तपुर-रामकृष्ण स्वामिनाथः	श्री अ० कुप्पुस्वाम्यार्यः	२०
१२.	डा० स्वामिनाथः—एकं दिव्यं जीवनम्	आचार्य रामदयालु शास्त्री	२२
१३.	एकोऽपि कर्मभिरनेकः डा० स्वामिनाथः	डा० हर्षनाथ मिश्रः	२५
१४.	डा० सी०आर० स्वामिनाथन् : स्वातन्त्र्योत्तर संस्कृत प्रगति के सूत्रधार	डा० मण्डन मिश्र	२९
१५.	श्रीपादसप्ततेः डा० स्वामिनाथकृता 'श्रीपादपराग' व्याख्या	आचार्य सोहनलाल गौडः	३३

१६.	डा० सी० आर० स्वामिनाथ-प्रणीतस्य 'श्रीबदरीशसुप्रभात'-स्तोत्र-काव्यस्य समीक्षा	आचार्य रमेशचन्द्र शुक्ल:
१७.	स्वामिनाथरचनात्रयसमीक्षणम्	आचार्य रमेशचन्द्र शुक्ल:
१८.	श्री स्वामिनाथ ! भवतामपि सुप्रभातम्	कविरत्न श्रीकृष्णप्रसाद घिमिरे
१९.	वर्धते स्वामिनाथः	श्री श्रीसुन्दरराज:
२०.	डा० स्वामिनाथानां शासन-सेवा-निवृत्ति-समये	डा० प्रभाकरनारायण कवठेकर:
२१.	श्लोकनवकम्	डा० स० सु० जानकी
२२.	श्री स्वामिनाथं प्रति	श्री० भि० वेलणकर:
२३.	दिवास्वप्नः	महाकविः अविकत्तम्
२४.	आर्याऽऽर्यः	पं० आनन्द झा
२५.	श्री स्वामिनाथः सुधीः	डा० रमाशंकर त्रिपाठी
२६.	कुसुमाञ्जलिः	पं० मोतीलाल पुष्कर:
२७.	डा० सी० आर० स्वामिनाथ-महोदयाय उपहारप्रसूनानि	प्रो० वटुकनाथ शास्त्री खिस्ते
२८.	जयतात् स्वामिनाथः	श्री भरत पिषारटिः
२९.	स्वामिनाथं नमामि	डा० उमाकान्त शुक्ल:
३०.	शुभाशंसा	आचार्य रमेशचन्द्र शुक्ल:
३१.	श्रीस्वामिनाथाभिनन्दनम्	श्री रत्नेश्वर झा
३२.	श्रीस्वामिनाथं नुमः	आचार्य विष्णुकान्त झा
३३.	शुभाशंसनम्	डा०व०रा० लक्ष्मीकान्त शर्मा
३४.	कस्य नो हितचिन्तकाः	आचार्य देवदत्तः
३५.	अभिनन्दनम्	डा० उमारमण झा
३६.	भव्यं व्यक्तित्वम्	डा० वि० वेङ्कटाचलम्
३७.	Dr. C. R. Swaminathan : A Real Scholar	Prof. N. H. Ansari
३८.	शुभाशंसा	श्री बी० आर० शर्मा
३९.	आशंसा	प्रो० पी०सी० वासुदेव एलयत्
४०.	अभिनन्दनोक्तिः	प्रो०एन. एस. रामानुजताताचार्यः
४१.	स्वामिनाथो विपश्चित्	डा० इच्छाराम द्विवेदी

४२.	क्रियासिद्धिस्सत्त्वे भवति महतां नोपकरणे	श्री शास्तृल विश्वनाथ शर्मा	८१
४३.	संस्मरणम्	डा० उमारमण झा	८२
४४.	अभिनन्दनपत्रम्	एकरसानन्दमहाविद्यालय:, मैनपुरी	८५
४५.	अभिनन्दनपत्रम्	सस्कृतविद्यासमिति:, मद्रास:	८७
४६.	अभिनन्दनपत्रम्	लालबहादुरशास्त्रिकेन्द्रीय-संस्कृतविद्यापीठम्, दिल्ली	८९
४७.	डा० स्वामिनाथाय पत्रम् (१)	कविरत्नश्रीअमीरचन्द्रशास्त्री	९२
४८.	" " (२)	गोस्वामी हरिकृष्ण शास्त्री	९३
४९.	" " (३)	के०पी० उर्मीम्	९५
५०.	अभिनन्दनम्	श्री भगवानदाससंस्कृत-महाविद्यालय:, हरिद्वार	९७
५१.	नववर्षीयमभिनन्दनम्	श्री श्रीजीवदेव शर्मा	९९
५२.	स्वागतपत्रम्	आचार्य रामविलास शुक्ल:	१००
५३.	डा० स्वामिनाथन् के प्रति	श्री त्रिलोकीनाथ धर	१०१
५४.	मूर्तिमती वेदसंस्कृतभक्ति:	श्री नट्टुविल पषेट्टु नारायणन् नम्पूतिरि:	१०३
५५.	विद्याविनयसम्पन्ना: स्वामिनाथा:	श्री साम्बदीक्षित:	११२
५६.	देववाणी-परिषद्वार्तासु स्वामिनाथ:	श्रीमती रमा शुक्ला	११३
५७.	कविचूडामणे: स्वामिनाथ-महोदयस्यकर्णभूषणम्	श्री भरत पिषारटि	१२१
५८.	स्वामिनाथरचनापरिचय:	डा० रमाकान्त शुक्ल:	१२३
५९.	सहृदयवयस्य स्वामिनाथ:	डा. टी. एन. धर्माधिकारी	१२६
६०.	विरुदसम्मानपत्रम्	सं०सा०प०, त्रिची	१२७
६१.	Message	V. S. Nani Iyer	१२८
६२.	स्वामिनाथ-रचनावली	डा० मी० आर० स्वामिनाथ:	१२९
	पशुपतिपञ्चाश्यस्तव:		१२९
	जीर्णोपधानम्		१३१
	काकग्राही		१३४

वेदविद्भ्यो नमः १३
व्यासस्तुतिः १३
देशिकरूपिण्यै मात्रे नमः १३
आचार्यस्तवमणिमाला १४
आचार्यसूक्तिमुक्तावली १४
जयति जयेन्द्रः १४
श्रीराघवः पद्मभूषणम् १४
श्रीपाददामोदरसातवलेकराभिनन्दनम् १४
शंकर एकेडमी १४
गुरुपवनपुरेशस्तवः १४८
गुरवे नमः १५०
वात्सल्यम् १५२
शिवायनम् १५३
जातकदोषः १५५
अन्यापदेशाः १५
वंशीविलासः १५८
जयन्तु नृहरेर्नखाः १६
शिशुविलासः १६
नीरदोऽस्मि न तु शारदाभ्रकः १६
कलिविलासः १६
वातेशानन्दलहरी १७
गणेशाय नमः १७

६३. चित्रपरिचयः १७२-१७

६४. चित्राणि १७७-१८

६५. देववाणी-परिषद्वार्ता १८५

६६. संस्कृत-वार्ता 122

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य सप्तमवर्षीयो द्वितीयस्तृतीयश्च संयुक्ताङ्कः 'डा० सी० आर० स्वामिनाथविशेषांक'-रूपेण प्रकाश्यते ।

डा० शास्त्रपुरम् रामकृष्ण स्वामिनाथः देववाणी-परिषदः अर्वाचीन-संस्कृतस्य च जन्मनः प्रभृत्येव, उभयत्र बद्धप्रेमा वर्तते । देववाणी-परिषदः कार्य-कलापेषु यथा अयं महानुभावः सहभागित्वं निरवहत् तस्योल्लेखोऽस्मिन्विशेषाङ्के 'देववाणी-परिषद्वार्तासु डा० स्वामिनाथः' इति शीर्षकेण श्रीमत्या रमाशुक्लया कृतः । परिषदायोजितेषु अक्षरश्लोककार्यक्रमेषु अखिलभारतीयसंस्कृतकविसम्मेलनेषु, नाट्योत्सवेषु, विद्वदभिनन्दनेषु, अन्येषु च तेषु-तेषु गतिविधिषु डा० स्वामिनाथः सोत्साहं सस्नेहं सादरं च भागमभजत । एतद्रचितं नाटकशोकगीतिप्रबन्धात्मकरचनात्रयं 'कर्णभूषणं' इति शीर्षकेण १९८० तमे ईशवीयेऽब्दे 'देववाणी-परिषद् दिल्ली'तः प्रकाशितं बभूव । तदनु १९८३ तमे ईशवीयेऽब्दे एतत्प्रणीतं 'श्रीबदरीशसुप्रभातं' नाम स्तोत्रकाव्यं श्रीपादसप्तते 'श्रीपादपराग'-व्याख्या च प्राकाश्यमगच्छताम् । इत्थं भारतवर्षस्थितानां विविधसंस्थानाम् कृते भारत-सर्वकारस्य शिक्षामन्त्रालये सहायकपरामर्शदातृरूपेण उपपरामर्शदातृरूपेण च प्रायशो विज्ञातः सन्नयं देववाणी-परिषत्प्रकाशानानां पाठकानां कृते संस्कृतकवि-नाटककार-व्याख्याकार-रूपेणाऽपि सुज्ञातोऽजायत ।

यदा ३१-३-८५ तारिकायामयं शासनसेवातो विरतिं भजतेस्म तस्मिन्नेपि दिने अयं महानुभावः दिल्लीविश्वविद्यालयस्य टैगौर-सभागारे देववाणी-परिषदा-योजितस्याखिलभारतीयसंस्कृतकविसम्मेलनस्य अध्यक्षतां कुर्वन् स्वसंस्कृतं रचनाभिः श्रोतृवृन्दं काव्यरसेनाप्लावितं करोति स्म ।

१०-३-१९२७ ई० तारिकायां केरलराज्यान्तर्गत'पालघाट'नाम्निस्थाने समुत्पन्नः एम० ए० - साहित्याचार्य-एम० लिट्०-पीएच० डी० - प्रभृत्युपाधि-विभूषितः 'कर्णभूषणं' 'श्रीपादपरागव्याख्या' 'गीताभाष्यविवेचनम्' इत्याद्यनेक-ग्रन्थप्रणेता, वेदाध्ययनपरम्परायाः उन्नायकः, विद्वत्समादरव्यसनी, अभावग्रस्त-पण्डितानां समवलम्बः, शिष्यवत्सलः, सकारात्मकमार्गानुयायी, सामगायी, श्री स्वामिनाथमहाभागः स्वगुणैः केषां नाभिनन्दनीयः ? यथा ह्ययं महानुभावः शासनपदासीनः सन् लोकानामादरभूमिरासीत् तथैव अथवा ततोऽप्यधिकतरं समादरभूमिरयं विद्वज्जनानां शासनसेवातो विरतस्सन्नपि राजते ।

डा० स्वामिनाथस्य संस्कृतसेवामुपलक्ष्य नैकाभिः संस्थाभिरस्याभिनन्दनं कृतम् । काश्चित् संस्था अस्य शासनसेवातो विरतिमभिलक्ष्य विसृष्टिपूजामपि

व्यदधु: । देववाणी-परिषद् अस्य सौप्रस्थानिकमभिनन्दनं नायोजितवती यतो हि ततोऽस्य सुप्रस्थानं नैव भवति, भविष्यति वा । अत एव देववाणी-परिषदा ३१.३.१९८५ ई० तारिकयां कविवरस्वामिनाथस्य अखिलभारतीयसंस्कृत-सम्मेलनस्याध्यक्षरूपेण अभिनन्दनं कृतम् । कामयते च देववाणी-परिषद् यदयं महानुभाव: अस्या: परिषदस्तेषु तेषु कार्यकलापेषु अतीतादनेहसोऽपि अधिकतरं संलग्नो भूत्वा देववाण्या प्रचारे प्रसारे समधिकतरं संलग्न: स्यात् ।

अर्वाचीनसंस्कृतस्य 'स्वामिनाथविशेषाङ्के' डा० स्वामिनाथस्य व्यक्तित्वं कर्तृत्वं चावलम्ब्य नैकेषां विदुषां गद्यपद्यमया लेखा: संकलिता: सन्ति, येषु विदुषामकैतवभावानामभिव्यक्ति: साक्षात्कर्तुं शक्यते । अभिनन्दनदोक्ति-संस्मरण-समीक्षात्मकेषु एतेषु लेखेषु डा० स्वामिनाथस्य व्यक्तित्वं प्रतिफलितं सद् विलोक्यते । कानिचित्पत्राण्यपि अत्र संकलितानि यानि तत्तद्विद्वद्भि: समये समये अमुं प्रति प्रहितान्यासन् । एतेनैतद् विलोकयितुं शक्यते यदसौ महानुभाव: केवलं शासकीयटिप्पणी: एव न लिखति वाचयतिस्म वा अपितु कवीनामुक्ती: अपि सादरं प्रत्युदगच्छतिस्म । अस्मिन्नङ्के 'स्वामिनाथरचनावली' शीर्षकान्तर्गतं डा० स्वामिनाथस्य काश्चन पद्यरचना अपि प्रकाश्यन्ते या अनेन पञ्चविंशतिवर्षकालान्तराले समये समये रचिता: । एतासु रचनासु स्वामिनाथस्य गुरुभक्ति:, देवभक्ति:, विद्वद्भक्ति:, साहित्यिकविनोदशीलता, रचनापाटवं, कवेर्निरंकुशवृत्तित्वं च समवलोकयितुं शक्यन्ते ।

सहृदया एतासां रचनानामास्वादनाय सादरमनुरुद्ध्यन्ते । अस्मिन्नङ्के कानिचन चित्राण्यपि सपरिचयं प्रदीयन्ते, येषु डा० स्वामिनाथस्य देववाणी-परिषद: कार्यकलापेषु रुचि: बहो: कालात् अवलोकयितुं शक्यते ।

अर्वाचीनसंस्कृत-परिवार: डा० स्वामिनाथस्य दीर्घायुष्यं, सरस्वतीसेवापरत्वं च कामयते ।

सर्वेऽपि ते लेखका: धन्यवादार्हा सन्ति यैरस्मत्प्रार्थनां सनाथीकृत्य स्वामिनाथ-विशेषाङ्काय स्वलेखा: रचनाश्च यथासमयं मुद्रणाय प्रेषिता: ।

विदुषामाश्रव:

(रमाकान्त शुक्ल:)
प्रधानसम्पादक:

६ वाणी-विहार:
नयी दिल्ली-११००५९
१५-४-१९८५

भारतस्य महामहिमोपराष्ट्रपति-श्रीरामस्वामीवेंकटरामन्-महाभागानां सन्देशः

उप राष्ट्रपति, भारत
नई दिल्ली
VICE-PRESIDENT
INDIA
NEW DELHI

मार्च १५, १९८५

मुझे यह जानकर प्रसन्नता है कि देववाणी-परिषद्, दिल्ली के तत्त्वावधान में "अर्वाचीनसंस्कृतम्" के सप्तम वर्ष का द्वितीय अंक "डा० स्वामिनाथ - विशेषांक" के रूप में दिनांक १५ अप्रैल, १९८५ को प्रकाशित होने जा रहा है। मैं इस विशेषांक की सफलता के लिये अपनी हार्दिक शुभकामनायें भेजता हूं।

हस्ताक्षर
(आर० वेंकटरामन)

सत्यमेव जयते

एच० वाई० शारदा प्रसाद
प्र० मं० जी के सूचना
सलाहकार

प्रधान मंत्री कार्यालय
नई दिल्ली - 110011
PRIME MINISTER'S OFFICE
NEW DELHI - 110011

12 मार्च, 1985

पत्र सं० (10)/85 पी० एम० पी०-I

प्रिय श्री शुक्ल,

आपके 1 मार्च, 1985 के पत्र के लिए धन्यवाद।

मुझे खुशी है कि डा० स्वामिनाथन् के सम्मान में ,'अर्वाचीनसंस्कृतम्" का एक विशेषांक प्रकाशित्त किया जा रहा है।...

सस्नेह,

आपका,

एच० वाई० शारदा प्रसाद

डा० रमाकान्त शुक्ल,
प्रधान सम्पादक, "अर्वाचीनसंस्कृतम्"
देववाणी-परिषद्, 6, वाणी विहार,
नई दिल्ली - 110059

सहर्षमभिनन्दनम्

(राष्ट्रपतिसम्मानित आचार्य विश्वनाथ शास्त्री, खन्ना, पंजाब)

विद्वत्प्रवरस्य एम्०, ए०एम्० लिट्०, पीएच्०डी० न्यायासहित्याचार्यप्रभृति-विरुदविभूषितस्य कार्यकारोपाह्वस्य श्रीमतो डा० सी० आर० स्वामिनाथमहाभागस्य अनितरसाधारणीं सुरभारतीसेवामभिलक्ष्य देववाणी - परिषदा 'अर्वाचीनसंस्कृत' पत्रिकायाः प्रकाश्यमानाभिनन्दनविशेषाङ्कद्वारा सादरं क्रियमाणोऽयमभिनन्दन सम्मानः सुरभारत्या भारतीय-संस्कृत-समाजस्य चाभ्युदय-मभिव्यञ्जयन् समेषामप्यस्माकं संस्कृतविदुषां भवति महते प्रमोदय ।

शुभावसरेऽस्मिन् डा० स्वामिनाथमहाभागान् हर्षातिरेकपरिपूर्णेन हृदा सप्रेमादरमभिनन्दयन्तो वयं देववाणी · परिषदमपि भूरिशो धन्यवादैः सभाजयामः समुचितनिर्णयाय ।

परमभागवतो डा० स्वामिनाथमहाभागो हि संस्कृतभारतीसमुन्नायकानां विदुषामग्रणीः, अद्भुतप्रतिभाधनी, काव्यकलाकुशलः, भगवद्गीता भाष्याणां पर्यालोचने लब्धप्रतिष्ठः, प्रकृत्या मधुरः, सरलोऽपि गंभीरः, स्मितवदनो मितभाषी, सम्मानयिता विद्वद्गुणानां, केन्द्रीय-शिक्षाविभागे परामर्शदातृपदाधिष्ठितः सुरभारती-समुन्नयनाय सततं प्रयतमानः परमोपयोगिनः परामर्शान् प्रदाय तदनुसारं कार्यक्रमान् साभिनिवेशं प्रावर्तयत्, येन सर्वत्र भारते संस्कृतभविष्यविषये निराशाग्रस्तस्य संस्कृतज्ञसमाजस्य मानसे सन्तोषावह उत्साहोऽजन्यत । कं कमस्य कार्यकलापं सद्गुणगणं चाभिनन्दयाम, सर्वमप्यस्य महाभागस्याभिनन्दनीयम् !

विद्वन्मूर्धन्य,

जन्म तेऽभिनन्दनीयं कुलं तेऽभिनन्दनीयम्
विद्या तेऽभिनन्दनीया भक्तिस्तेऽभिनन्दनीया ॥
बदरीशसुप्रभातं काव्यं तेऽभिनन्दनीयम्
किं ते नाभिनन्दनीयं सर्वं तेऽभिनन्दनीयम् ॥

अथ शुभाशंसनम्—

सौमनस्यं चिरायुष्यं स्वास्थ्यं ते जीविताविधि ।
स्यादध्यात्मप्रसादश्च बदरीशानुकम्पया ॥

१५-३-८५

विश्वनाथः
सरस्वतीसंस्कृत महाविद्यालयः
खन्ना (पंजाब)

डा० जयमन्त मिश्र
कुलपति
कामेश्वरसिंह दरभंगा संस्कृत
विश्वविद्यालय दरभंगा

कामेश्वरनगर दरभंगा (बिहार)
दूरभाष [कार्यालय : २३४०
आवास : २२१७

दिनांक : १८-३-१९८५

महदिदं प्रमोदस्थानं यद् देववाणी-परिषदा "अर्वाचीनसंस्कृतस्य" सप्तमवर्षीयद्वितीयाङ्कः डा० स्वामिनाथविशेषाङ्करूपेण प्रकाश्यते।

"वाग्जन्मवैफल्यमसह्यशल्यं गुणाद्भुते वस्तुनि मौनिता चेत्।"

इति महाकवि श्रीहर्षस्य यथार्थं कथनं संस्मृत्य परिषदा मनसा वाचा कर्मणा च भारतीयसंस्कृतेः सम्पोषकस्य डा० स्वामिनाथमहाभागस्य देववाणी-समर्चा विधीयते इति सर्वथा समुपयुक्तम्।

एतन्महाभागस्य गुण-गण-वर्णने परगुणश्लाघासु वाचंयमा अपि वसुधातलविद्वांसः समुल्लासं वाचां विलासं विधास्यन्तीति निश्चितम्।

महामहिमशालिना एनेन मनीषिणा सह कृता सज्जनानां मित्रता दिवसस्य परार्द्धभिन्ना छायेव दीर्घाभवतीति मित्राणामनुभवः एतस्य स्वभावं सौजन्यं च साधु व्यनक्तितराम्।

देववाणीसमुपासकस्य मनीषिणोऽस्य आजीवनसंस्कृत-सेवा जायतां जगन्मङ्गलाय जनमानसपरितोषाय सहृदयहृदयानन्दायेति शम्।

जयमन्त मिश्रः
कुलपतिः
कामेश्वरसिंह दरभङ्गा संस्कृत विश्वविद्यालयः
दरभङ्गा

॥ श्रीहरिः ॥

डा० कृष्णकान्त शुक्ल
साहित्याचार्य, एम.ए. (संस्कृत)
एम.ए. (हिन्दी)
पी एच्०डी०, साहित्यरत्न

अध्यक्ष, संस्कृत-विभाग
बरेली कालेज, (रु.वि.वि)
बरेली-२४३००१

आवास : आचार्यपीठ, कुवँपुर, बरेली-२४३००१

क्रमाङ्क

दिनाङ्क १५-३-८५

राजतां मोदतां तद्विशिष्टं महः ।

सुरभारतीसमर्पितजीवनानाम्, अधिगतसकलशास्त्रसाराणां, नैकग्रन्थ-प्रणेतॄणां, संस्कृतप्रचारप्रसारचणानां, कुशलप्रशासकानां श्रीमतां परमादरणीयानां श्रीस्वामिनाथमहाभागानां यशः संस्कृत-जगत् सर्वतो धवलीकरोति । स्वविशिष्टविभूतिमत्त्वेन "यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्" इति भगवद्वचनं संस्मारयतां तेषां दर्शनेन, स्मरणेन, सङ्गेन, भाषणेन च कोऽप्यपूर्व एवानन्दनिस्पद आत्मानं सन्तर्पयति ।

निर्लोभाः, अगृध्नवः, सौम्यमूर्तयः, सहृदयधुरीणाः अविकत्थनाः, आस्तिकाः, तपस्विनः, कर्तव्यपरायणाः, संस्कृतविदुषामुन्नायकाः, सरलहृदयाः, भारतीयसंस्कृतेः सजीवमूर्तयः, मानधनाः, उत्साहराशयः, परिहृतमात्सर्यदर्पद्वेषाद्यवगुणाः, सन्तुलितवृत्तयः, विश्वासभूमयः, स्वजन्मना पवित्रितवसुन्धराः, कवयः, वाग्मिनस्ते कस्य न देशाभिमानधनस्य वन्द्याः ?

तेषामभिनन्दनावसरे लोकविश्रुता देववाणी-परिषत् स्वार्वाचीनसंस्कृतपत्रस्य विशिष्टमङ्कं प्रकाशयतीति परमप्रमोदास्पदम् । विशेषविदुषामेतेषां समभ्यर्चनया देववाणीपरिषद् वस्तुतो ऋषिऋणमपाकरोति, सर्वथा पावयति चात्मानम् ।

अस्मिन्नवसरे तेषामारोग्यं, दीर्घायुष्यं कर्मठत्वं च कामयमानेन जनेनानेन स्वकीयाः प्रणामकुसुमाञ्जलयः सनतमौलि तत्कृते सविनयं समर्प्यन्ते । अमोघवरदः पार्वतीजानिश्च ज्योतिष्पिण्डेनैतेन संस्कृत-जगच्चिराय समुद्योतयितुं मुहुर्मुहुः सादरं प्रार्थ्यते ।

—कृष्णकान्त शुक्लः

Gram : 'Bhavidya' Bombay
Girgaon

Phone : [351461
351462

Bharatiya Vidya Bhavan

[Founded in 1938 by Kulapati Dr. Munshi]

President :
Shri Girdharilal Metha
Vice-Presidents:
Shri C. Subramaniam
Shri Pravinchandra V. Gandhi

MUNSHI SADAN
KULAPATI MUNSHI MARG
BOMBAY-400 007

११-३-८५

संदेशः

'अर्वाचीनसंस्कृतम्' डॉ० स्वामिनाथविशेषाङ्कं प्रचिकाशयतीति विदित्वा प्रमोदामहे।

डॉ० शास्त्रगुरं रामकृष्णः (C. R. Swaminathan) अस्माकं चिरपरिचितं मित्रं वर्तते। अद्यत्वे संस्कृते प्रीतिभाजां शास्त्रपारदृश्वनां विदुषां संख्या ह्रासमानाऽऽलक्ष्यते। भारतशासनं च संस्कृतविद्यापरम्परां रक्षितुं यथासम्भवं प्रयतते। डॉ० स्वामिनाथमहोदयः संस्कृतसम्बन्धिनीनां प्रवृत्तीनां साह्याय प्रकल्पिते शिक्षाविभागे उच्चैः पदमधिरोपित इति नूनं युक्तरूपमुत्पश्यामः।

स्वयं शास्त्रविद्वान्, शास्त्रेषु संस्कृतसंस्कृतौ च परमास्थः श्री स्वामिनाथः संस्कृतविद्वद्भ्यश्छात्रेभ्यश्चोचितं मार्गं निदर्शयन् साह्यञ्च वितन्वन् संस्कृतसमाजस्य परमसौहार्दं भजति। संस्कृतसमाजश्च तस्मायधमर्णीकृतमात्मानं कलयति। एवमेव शासनद्वारा स्वतो वा संस्कृतोपकारं कुर्वन्नयं महाभागश्चिरं दृढदेहो विलसतादिति भूतभावनं परमेश्वरं प्रार्थयामः।

भावत्कः
स रामकृष्णन्

Bharatiya Vidya Bhavan
Executive Secretary

C. R. Pattabhi Raman
Barrister-at-Law.,

The Grove, Teynamet,
Madras-18

9-3-1985.

Dear Dr. Suhkla

I thank you for your kind letter and I am happy to note that you are taking steps in recognition of the services rendered to Sanskrit language and our ancient culture by my friend Dr. C. R. Swaminathan. In honouring him, we are honouring ourselves. I look forward to the publication of your Journal in connection with the Abhinandana Patrika.

Dr. Swaminathan has been tireless not only in the preservation and advancement of Sanskrit language but also in the preservation of Vedic culture and our ancient texts. With the advances in modern science, it is gratifying to note that our ancient thoughts have been a marvellous analysis of the great truths, spiritual and material.

With warm regards and wishing your Journal many years of useful life,

Your Sincerely

C. R. Pattabhi Raman

Dr. Ramakant Shukla,
Editor,
Arvācīna Saṁskṛtam,
6, Vani Vihar,
New Delhi-110059

I AHARSHI ACADEMY OF VEDIC SCIENCES
(a P. G. Institute recognised by Gujarat University for Ph.D.)
[a Public Trust No. E-4556/Ahmedabad : Donations exemt under section 80 (G) 5]

Ishwarbhai Patel
President
Tel. 413711

41, Shyamal, Behind Yoga shrama
and Manek Bag Societies
Ahmedabad-15

संदेशः

डॉ० स्वामिनाथमहाभागा न केवलं प्रशासकीयसेवायामुच्चपदाधिकारित्वेन विद्यमाना इति हेतोर्महत्त्वं समश्नुवते, किं च तदधिकारस्य सुतरां सम्यगुपयोगं कृत्वा, भारतीयसंस्कृतेः प्राणभूतानां वेदानां संहिता-ब्राह्मणादिग्रन्थान् मुखोद्गतरूपेण परम्परया कण्ठस्थीकृत्य तत्परम्परां च शिष्यपरम्परया संवर्धयितुं स्वजीवनं तपश्चर्यारूपेण व्यतीयमानानां वेदपाठीनां विषये सम्यगन्वेषणं कृत्वा कारयित्वा च, के के वेदपाठिनः कस्याः वेदशाखायाः कण्ठगतरूपेण संरक्षणमद्यापि कुर्वंते इति महता प्रयत्नेन प्रत्येकेषां वेदपण्डितानां कौतस्कुत्यं सम्प्राप्य, तेषां वार्षिकाणि सम्मेलनानि योजयित्वा, समधीयमानानां च्छात्राणां शलाकापरीक्षां समायोज्य, महतीं वेदसेवां कृतवन्त इति हेतोरपि तेषां संस्मरणं वेदसेवापरायणानां मनीषिनां मध्ये महत्त्वपूर्णमिति मन्ये ।। इति

ईश्वरभाई पटेलः
अध्यक्षः,
महर्षिवेद-विज्ञानाकादमी

श्री रमाकान्त शुक्ल,
प्रधान सम्पादक, "अर्वाचीनसंस्कृतम्"
देववाणी-परिषद्,
६, वाणीविहार,
नयी दिल्ली-११००५९

N. M. KANSARA
Director,
Maharshl Academy of
Vedic Science

॥ श्रीस्वामिनाथ-प्रशस्तिः ॥

(रचयिता—श्रौतरत्नाकर-विविधकल्पागमसूत्र - प्रयोगमर्मज्ञः श्री०
वि० रघुराम शास्त्री, श्रीवेदवेदार्थश्रौतविद्याशाला,
श्रीरङ्गम् - ६२०००६ (तमिलनाडु))

वेदेश्वरं वेदविभागदेवं वेद्यं च वेदैः पुरुषं महान्तम् ।
प्रयोगकर्तॄनथ सूत्रकारानाचार्यपादानपि नौमि नित्यम् ॥

केरलप्रान्ततिलकः स्वामिनाथमहाशयः ।
शास्त्रीपुरग्रामजन्मा विद्वच्छ्लाघ्यः कविः सुधीः ।

स्वकाले ह्युपनीतश्च सामशाखामधीतवान् ।
बाल्य एव रुचिस्तस्य संस्कृताभ्यसने ह्यभूत् ॥

श्रीकाञ्चीकामकोट्याख्यपीठाधीशा महत्तमाः ।
राजन्ते वेदशास्त्रादिप्रचारणधुरन्धराः ॥

येषां दर्शनमात्रेण क्षीयन्ते तापराशयः ।
तेषु नैर्सिगकी भक्तिः स्वामिनाथस्य वर्तते ॥

गुरुभक्त्या महत्या च कुसुमाञ्जलिनामकम् ।
चक्रे श्रीपरमाचार्यस्तुतिरत्नमनुत्तमम् ॥

आङ्गलभाषाविदप्येष बहुभाषाविशारदः ।
तत्राप्यमरभाषायां निष्णातो राजते भृशम् ॥

रामायणे भारते च तथा श्रुतिपुराणयोः ।
सम्यक् तत्त्वं विजानाति मेधावी प्रतिभानवान् ॥

गङ्गाप्रवाहसंकाशे गभीरे रसगर्भिते ।
निरर्गले हृद्यतमे दक्षः संस्कृतभाषणे ॥

स्वीये च भाषणे सोऽयं सप्रमाणं सयुक्तिकम् ।
प्रकाशयति वर्यस्य संस्कृतस्य प्रकृष्टताम् ॥
नेपाले राज्यकार्यार्थं गमनावसरे ह्यसौ ।
गुह्येश्वरीस्तोत्ररत्नं भक्त्या तत्राकरोत्सुधीः ॥
महतो बदरीशस्य सुप्रभातस्तुतिं तथा ।
कामकोटिमठाधीशबालाचार्यस्तुतिं पराम् ॥
स्वकीयबुद्धिसामर्थ्यात् गीतामालोड्य सर्वतः ।
गीतातत्त्वविमर्शाख्यं निबन्धं कृतवान् सुधीः ॥
तं ज्ञात्वा मुदिताः सर्वे विदेशीयाश्च पण्डिताः ।
प्रदाय डाक्टर्विरुदं मानयामासुरादरात् ॥
अन्यैश्च नानाविरुदैः तत्र तत्र सुमानितः ।
तदीयज्ञानपारम्यगुणोत्कर्षप्रबोधकैः ॥
संस्कृतज्ञान् तथा वेदशास्त्रविज्ञतमानपि ।
प्रोत्साहयति वित्तस्य दापनेन मुहुर्मुहुः ॥
वेदशास्त्रतदभ्यासविदुषामभिवृद्धये ।
नानाविधानुपायांश्च दर्शयत्युचितानसौ ॥
अत्यन्तं संस्कृतप्रेमबद्धचित्तस्य धीमता ।
प्रयत्नेनास्य वर्धन्ते वेदशास्त्रालया भुवि ॥
स्वामिनाथोपकारेण राजकीयं धनं बहु ।
लब्ध्वा शिष्याश्च गुरवः प्रहृष्टमनसः सदा ॥
शिष्याश्चाध्ययने नित्यं प्रीत्युत्साहसमन्विताः ।
अध्यापनेऽप्युपाध्याया राजन्ते तद्वदेव हि ॥
वेदशास्त्रश्रौतविद्याशालाया वार्षिकोत्सवे ।
सप्तमे स्वामिनाथार्यः स्थित्वाध्यक्षपदे स्वयम् ॥
स्वीये च भाषणे नैकान् विषयानुपदिश्य च ।
व्यतरत् बहु वित्तं च छात्रेभ्यः पारितोषिकम् ॥

विद्याविभागे किल राजकीये
समुन्नतं स्थानमलंचकार ।
श्रीस्वामिनाथो मतिमान्यदाऽयं
तदाप्रभृत्येव परां विवृद्धिम् ॥

श्रीवेदशास्त्रागमपाठशालाः
सर्वप्रदेशेष्वपि भारते नः ।
यान्तीह तस्माद् विबुधा महान्तो
वेदेषु शास्त्रेष्वपि संप्रथन्ते ॥

स्वामिनाथार्यसन्दिष्टा पद्धतिः शुभकारिणी ।
वेदशास्त्रादिजीवातुः वर्धतामभिवर्धताम् ॥

सर्वदेशसुविख्यातः स्वामिनाथमहाशयः ।
भारतीयकलाभिज्ञश्चिरं जीवतु भारते ॥

इत्थं श्रीवेदवेदार्थश्रौतविद्यालये मुदा ।
प्राध्यापकेन रचितं स्वामिनाथप्रशंसनम् ॥

श्रीयुतः शात्तपुर-रामकृष्ण-स्वामिनाथः

(गुरुकैङ्कर्यमणि श्री अ. कुप्पुस्वाम्यार्यः)

नारिकेलक्रमुकादि - नानातरुगणपरिवृते केरलप्रदेशे द्रमिडसीमाप्रान्ते विराजते पालक्काडु नाम नगरम्। तन्नगरस्य निकटे प्रवहति पश्चिमां दिशं पोन्नानिनामको नदः। तस्य तीरे दक्षिणे, पालक्काडुनगरात् प्रायशः क्रोशदूरे वर्तते शात्तपुरनामको अग्रहारः। तत्र दक्षिणाभिमुखो द्योतमानः गणपतेः देवालयः सुप्रसिद्धः। एतदग्रहारवासिनो विप्राः श्रीकावेर्याः तीरप्रदेशमयूरक्षेत्रात् श्रीकाञ्चीप्रदेशाच्च पूर्वकाले अत्र समागता प्राचीनप्रथित-पुरुषपारम्पर्याः प्रथन्तेतराम्। मयूरक्षेत्रवत् शात्तपुरग्रामे च तुलामासान्तिमदिन एव गणपत्यालये रथोत्सवः प्रवर्तमानः उत्सवानुष्ठानैकरूपतः एतद्ग्रामस्थानां पूर्वपुरुषाः विप्रजनाः मयूरक्षेत्रात् समागताः इत्यमुं विषयं सत्यापयति।

एतस्मिन् शात्तपुराग्रहारे धनधान्यसमृद्धितः वितरणभूम्ना धर्मानुष्ठाने महत्या श्रद्धया च दिगन्तविख्यातकीर्तिमत्कुटुबं कार्यकारनामकमप्रतिमं विराजते। एतच्छताब्देः पूर्वभागे "स्वामिनाथ भट्ट" इति कार्यकारः सदाचारसंपन्नः धर्मिष्ठः ब्राह्मणोत्तमः अस्य कुटुम्बस्य प्रधानतम आसीत्। एतेषां महत्गृहस्य उद्याने मधुमदवारिनिष्यन्दविलसत्कपोलाः दन्तिनः नियन्त्रितास्तदा आसन्। अस्य कुटुम्बेन परिपालितं अन्नसत्रमप्येकः मोंकोम्बुनामके ग्रामे आसीत्।

तादृशस्य स्वामिनाथभट्टस्य तनयः रामकृष्णः। तस्य भार्या लक्ष्म्यम्बा। तयोस्तनूजोऽयं स्वामिनाथः। पूर्वस्मिन् शताब्दे कोयंपुत्तूर् नगरे, सुप्रसिद्ध न्यायवादी (वाक्कील्), पश्चात् विविध - वेदान्त - ग्रन्थप्रकाशकः विल्लवरम्बत्तु कुप्पुस्वाम्यार्यो नाम। अस्य स्वामिनाथशर्मणः माता, लक्ष्मी, कुप्पुस्वाम्यार्यस्य दौहित्री।

स्वामिनाथस्तावत् बाल्य एवोपनीतः स्वीयां सामवेदशाखां किञ्चित् अधीतवान्। आधुनिकविद्यास्वपि प्रकृष्टतमो विद्यार्थीति प्रथामलभत।

कलाशालायां विद्यामभ्यस्य क्रमेण 'एम्० ए०' विरुदभागभूत् । अनन्तरं चेन्नपुरीय - राजकीयकलाशालायामध्यापकपदवीमलङ्कृतवान् । कतिपयसंवत्सरानन्तरं मध्यराजकीय संस्कृतविद्याविभागे पदवीमङ्गीकृत्य स्वामिनाथः दिल्लीनगरे न्यवसत् । क्रमेण तु उत्तरोत्तरं समुन्नतसमालोचकादिपदमलभत । संस्कृतविद्याप्रचारणे, वेदविद्याभिवर्धने, वेदशास्त्रविदुषां पोषणे, तत्प्रोत्साहने, वेदशास्त्राध्यापन-प्रधानक-नानाविद्यालय स्थापने च बद्धकङ्कणोऽभूत् स्वामिनाथः इत्येतत् विदितमेव समेषाम् ।

स्वामिनाथः पूर्वस्मिन् संवत्सरे त्रिशिरःपुरीय - संस्कृतसाहित्यपरिषदा "संस्कृतप्रसाररक्षकः" इति विरुदप्रदानेन संमानितः । श्रीकांचीकामकोटिपीठाधीशानां श्रीशन्द्रशेखरेन्द्र सरस्वती - स्वामिनां चरणसरोजभृंगायमाणमानसः स्वामिनाथः । दिल्लीनगरनिवासमध्यकाले गीतातत्त्वविमर्शाख्यं निबन्धं प्रणीय 'डाक्टर' विरुदमपि अलभत । गुह्येश्वरीस्तोत्रं बदरीशसुप्रभातं इत्यादि स्तोत्राण्यपि अनेन विरचितानि ।

गीर्वाणभाषायां भाषणे, लेखने, प्रवचने च नितरां समर्थः, श्लाघनीय-गुणसंपन्नः एषः पुरुषः । विरामोत्तरमपि अविच्छेदेन भारतीयकलाचारमूलाधारभूत संस्कृतपरिपालने बद्धादरः चिरंजीवी नीरोगः सर्वातिशायितसमस्तैश्वर्यसंपन्नः सर्वत्र सफलोद्यमश्च भूयादिति श्रीमन्तं मारमणमुमारमणं, श्रीमदाचार्यपादांश्च संप्रार्थये ॥

5-बी/2, रामचन्द्रपुरम्
तेन्नूर, तिरुचिरापल्ली-620017

डा० स्वामिनाथः - एकं दिव्यं जीवनम्

(आचार्यः रामदयालुः शास्त्री, मन्त्री, संस्कृत-सेवा-संस्थानम्, दिल्ली)

वेद्म्यहं पुण्यराशिं जन्म-जन्मनाम्, आशिषं पूर्वपुरुषाणाम्, सत्क्रियां यज्ञ-वताम्, भावनां संस्कृतज्ञानाम्, रुचिं संस्कारवताम्, शीलतां शीलवताम्, संलग्नतां कार्यशैलीनाम्, आश्चर्यं कलिकर्मिणाम्, भूषणं दाक्षिणात्यानाम्, त श्रीमन्तं शास्त्रपुरं रामकृष्ण-स्वामिनाथमहाभागं शताब्द्येकचरणात् ।

को नाम न प्रहृष्यते भवेनास्य, यथा हि—जन्मनः प्रागेव प्रसीदते स्म परेशः, पितरौ हि जन्मधारणेन, संस्कारकर्तारः संस्करणेन, बालसहचराः सहचारेण, गृहस्थानानि निवासेन, विद्यावन्तोऽस्य शिष्यत्वेन, अवस्थाश्चास्य परिवर्तनेन, वर्णाश्रमधर्माः परिपालनेन, सम्बन्धिनः सम्बन्धेन, भार्या हि पतित्वेन, सुत-सुताश्च पितृत्वेन, शिष्याः शिक्षकत्वेन, सर्वकारोऽस्य सेवाकरणेन, संस्था सम्बोधनेन, संस्कृतज्ञाः संस्कृतकार्यकरणेन, साहित्यं प्रचार-प्रसारेण, याचका दान-प्रदानेन, जीवभूता अस्यदर्शनेन, भूतकालोऽस्य वर्धापनेन, वर्तमान स्वागतेन, भविष्यं चास्यागमनेन, वयं सर्वे हि स्वामिनाथसम्मेलनेन प्रसन्ना स्मः ।

महोदयोऽयं छात्रेषु छात्रतामापादयति, शिक्षकेषु शिक्षां विचारयति, पदासी नेषु पदमलङ्करोति, गोष्ठीषु वैदग्ध्यमातनोति, अधिकारिष्वधिकारम् अधिरोहति संस्काराणाम् अङ्कुर इव प्ररोहति, विद्वत्सु विशेषज्ञ इव भाति, दिव्यात्मसु स्वत इवायाति, सर्वात्मना स सत्पुरुषः आत्मना चाप्तपुरुषः गुणगणधूसर भूवलयभूसुरः सुरः ।

प्रकाशतेऽसौ महानुभावः स्वसंस्कृतकृत्यैः, विलासतेऽसौ सेवापरैः भृत्यै चकाशतेऽसौ पवित्रचरित्रचित्रैः, भासतेऽसौ वेदध्वनिमन्त्रैः आस्तेऽसौ समः समयाहूतयज्ञसत्रैः, प्राशतेऽसौ यत्र तत्र विहितकर्मभिरेकत्रितैः, उल्लासतेऽ उत्तमोत्तमजनितमित्रैः ।

सञ्चरन्त्यस्य नाडीषु सुरवतप्रवाहाः, हृदि स्फुरन्ति सत्यशिवभाव विचरन्ति मनसि सुविचारधाराः, प्रसरन्ति बुद्धौ शुद्धप्रकारा, भान्ति आत्म सुविवेकविवेकाः, आयान्ति मस्तिष्के संस्कृति-शैत्यसेकाः, सिद्ध्यति वा

साक्षात्सरस्वती, उत्पद्यते वारं वारं सुमतिः, विलसत्यन्तःकरणे परमात्मा, भवन्ति दृष्टौ स्पष्टमार्गाः, कर्माणि भवन्ति स्वयमेव पावनानि, उद्भवन्ति त्वरितं गूढरहस्यानि । विराजन्तेऽस्य तनुषि मूर्तिमन्तो देवाः, सेवन्ते समवेत-सत्त्वगुणाः, पलायन्ते संगिनामपि खेदाः, उच्छ्रियन्ते च समासमभेदविभेदाः ।

अपसरन्ति अस्मात् कलिकालदुष्प्रभावाः उत्कोचजन्यरावाः, अकर्मण्य-जनितदोषाः, अनुचितभावरोषाः, समयहानिसमुद्गतगदाः, त्रोटस्फोटमदा-संकरकलितविरोधाः, कामाक्रान्तदुरोधाः, अनवधानविकाराः, द्रोहप्रतिकार-प्रकाराः, संकीर्णकर्मक्रियाः, प्रकीर्णभावविक्रियाः, परसम्पत्तिसुविधानामप-सारणानि, संयुक्तेषु विदारणानीति ।

अस्मिश्च विप्रवरे तपोऽस्ति तेजस्विनाम्, शैत्यमस्ति हिमांशूनाम्, गाम्भीर्य-मुदधीनाम्. क्षमाऽस्ति क्षितीनाम्, धैर्यमस्ति धराणाम् । पुरुषोत्तमानां स्वभावः, मुनीनां प्रभाव , अज्ञानानभावः, सुमतीनां भावः, हृदयानां विशुद्धिः, कर्मणां संशुद्धिः, अहर्निशं शुभकामना, परेषां भद्रभावना, कर्मयोगिनां सदाचारः, सत्त्वगुणानां प्रसारः, अपरिमितसाहसः, शिष्टानां व्याहसः, इत्यादयो गुणग्रामाः अस्मिन्नेवोपसंहरन्ति । अत्र 'कु' इति शब्दस्य जन्मैव न जातम्, दुरित्यस्य नामैव नायातम् ।

व्यक्तिरियं सद्भावानां प्रवेशे, सत्कर्मणां सन्निवेशे, परिष्काराणां हेतुभूते, संस्काराणां सेतुभूते, संसृतितरणे प्रवीणतायाम्, भक्तिभावेषु लीनतायाम्, उच्चावचेषु धीरतायाम्, चिन्तनमुद्रासु गभीरतायाम्, देवानां पुरतो नमने, कर्तव्यपथि गमने, समयोचित-सन्ध्यावन्दने, विदुषामभिनन्दने, वाग्देव्या आराधने, ऐश्वर्याणां सम्पादने कियती शोभते !

इमे आकारेण सौम्याः, प्रकारेण धौम्याः, परिधानेन आधुनिकाः, अन्तःकरणेन संस्कृतिनिष्ठाः, वाचा विदग्धाः, तनुषा मध्यमाः, इन्द्रियैः संयमिताः, मनसा परमोत्तमाः, चेष्टाभिः सत्तमाः आसन्, सन्ति भविष्यन्ति चेति । इमे लोके

सन्तोऽप्यलौकिकाः, कलौ युगेऽपि सत्ययुगीनाः असल्लोकेऽपि सल्लोका, अधर्म - भावेऽपि धर्मधुरीणाः, परिवारेऽपिस र्वजनीनाः, नरवपुष्वपि नारीश्वराः, स्थूल-शरीरेऽपि सूक्ष्मशरीराः, साकारा अपि निराकारभूताः सन्ति ।

अस्य कृते सांसारिकवस्तूनां भोगस्तु केवलं यात्रार्थमेव वस्तुतोऽयम् आध्यात्मिकं सेवते, पयःपानं केवलं पानार्थमेव वस्तुतोऽयं स्नेहपानं करोति, श्रवणं केवलम् उत्तरार्थमेव अन्यथा त्वयं ऋतमेव शृणोति, वचनं केवलं व्यापा-रार्थमेव अन्यथा त्वयम् भगवन्तमेव स्मरति, दर्शनं केवलं दृष्टिप्रयोगायैव वस्तु-

तोऽयम् अनाद्यन्तमेव पश्यति, पादाभ्यां चलनं न केवलं शरीरवहनम् अपि सन्मार्गगमनमेव ।

पदासीनेषु एतेषु गौरवम् अनुभूयते स्म, देववाणी-प्रसार-द्वाराणि-उद्घाट्यन्ते स्म, संस्कृत - संस्था उपक्रियन्ते स्म, संस्कृतज्ञाः सनाथीभूयन्ते स्म, संस्कृत-कार्याणि विलसन्ते स्म, सम्यक् प्रयोगेण धनानि धन्यानि भवन्ति स्म, उत्साह-साहस-प्रेरणादयो वितीर्यन्ते स्म, समयोचित संस्कृतविधाः विधीयन्ते स्म, नूतनानि संस्थानानि जायन्ते स्म, वेदवचनानि मुहुर्मुहुः श्रुतिपथम् आयान्ति स्म, संस्कृतगोष्ठ्यः पुनः पुनः भान्ति स्म, विविधाः संस्कृत-कार्यक्रमाः सम्पाद्यन्ते स्म ।

दुर्भाग्यवन्तस्ते यैरस्य दर्शनं न कृतम्, सम्मेलनं न विहितम्, आलापमपि नालपितम्, चरणस्पर्शेन तनुर्न पूतम्, भाषणं नाकर्णितम्, सहगमनं नाचरितम्, लेखनं न पठितम्, शिक्षाभिः न शिक्षितम्, भावनाभिर्न प्रभावितम्, नमस्कारैर्नाभिनन्दितम्, सत्कारैर्नाभिभूतम्, आज्ञापालनेन नोपकृतम्, सुभत्सर्नं न सोढम्! कृत्स्नं जन्म व्यर्थमिति ।

किञ्च दृशस्तं मुहुर्मुहुरक्षिलक्ष्यीकर्तुं वाञ्छन्ति, श्रोत्राणि तं पुनः पुनः श्रोतुमिच्छन्ति, वाचस्तमभिधातुमीहन्ते, हस्ताः तमभिलेखितुम् अभिलषन्ते, पादास्तमेवानुधावन्ते, हृदयानि तेनाभिषिञ्च्यन्ते, मनांसि तमेवानुमन्वते, बुद्धौ तस्यैव विचारणा, अन्तःकरणे तस्यैव धारणा, संस्कृत-जगति तस्यैव माननास्ति।

प्रणामाः सन्तु तद्भावनाभ्यः, धन्यवादास्तेषां प्रेरणाभ्यः, कुशलकामनाऽस्तु तेषां स्वास्थ्याय, मंगलभावनास्तु तेषां भविष्याय, हितमस्तु तेषां परिवाराय, जीवनमस्तु तेषां कार्यक्षमतायै, सम्पादनमस्तु तेषां धीरतायै, साफल्यमस्तु तेषामिच्छायै, संगमः स्यात् सदृशेषु, प्रीतिः स्यादस्मादृशेषु, भक्तिः स्याद् भगवति, विरक्तिः स्याद् रजसि, अक्षयोऽस्तु यशसः, अभयोस्तु व्यक्तिशः, अर्पयामि तेभ्यो हृद्गतानि भावनाप्रवणप्रसूनानीति ।।

एकोऽपि कर्मभिरनेक : डा० स्वामिनाथः

(लेखकः—डा० हर्षनाथ मिश्रः, नयी दिल्ली)

दिल्लीविद्यापीठस्य व्याख्यातृपदे नियुक्तिकालादेव मयाऽस्य महानुभावस्य यः परिचय उपलब्धः स दिनस्य परार्धगतो वृक्षच्छायायाम इव प्रवर्धमानः साम्प्रतं घनिष्टसौहार्दे परिणतः। न केवलमयं जनः किन्तु सर्वं संस्कृतजगदस्य कीर्तनीयैर्गुणैरुपकारैश्च वशंवदायते। अतीतेषु दशपञ्चदशेषु वर्षेषु संस्कृतस्य संस्कृतेश्च क्षेत्रे विहितं किमप्येकमपि कार्यमीदृशं नास्ति यस्मिन्नस्य हस्तो न भवेत्।

शुद्धस्वरेण यथा मन्त्रद्रष्टारो मन्त्रमुच्चारयामासुस्तथैवोच्चारिता मन्त्राः फलन्ति अन्यथोच्चारिताः पाठकं घ्नन्ति इति यथेन्द्रशत्रुः स्वरतोऽपराधादित्यादिना विदितमेव। अत एव मन्त्रदष्टृकृतोच्चारणरक्षा एव वेदानां सुरक्षा। एकदाचार्यच्छात्रमौखिकपरीक्षावसरे मया व्याकरणस्य प्रयोजने पृष्टे छात्रेण "रक्षार्थं वेदानामध्येयं व्याकरणमिति" कथिते द्वितीयेन मत्सहयोगिना परीक्षकेण किं भवान् वेदमन्त्रं यथास्वरमुच्चारयितुमर्हतीति, पठ, कमपि मन्त्रमिति कथिते नाहं पठितुमर्हामि इति सत्यमवादीत् परीक्षार्थी। तदा कीदृशी रक्षा श्रुतेर्भवति व्याकरणाध्ययेन, अत्रानेन सूत्रेणोदात्तः, अत्र चानुदात्तः, गृभाय इत्यत्र वैदिकप्रयोगे शानचः स्थाने शायजपि प्रयुज्यते हकारस्य च भकारो भवतीति ज्ञानमात्रेण तु वेदा न सुरक्षिताः स्युरिति तेन परीक्षकेण कटुसत्यमभाणि। वस्तुस्थितिरियं वेद-संरक्षणजागरूकेण स्वामिनाथमहोदयेन विलोकिता वेदसंरक्षणाय सर्वविधानां वैदिकशाखानामध्यापनाय वेदपाठशालाः देशे स्थापिताः। वैदिकसम्मेलनं च प्रतिवर्षमायोज्य वेदाध्यापकाध्येतृणां योगक्षेम-प्रयत्नाश्च विहिताः। अनेन कार्येण लुप्तेव वेदाध्ययनपद्धतिः पुनरुज्जीविताऽनेन।

अभावग्रस्तपण्डितानां वित्तीयसहायताल्पतरा, सा चानेन प्रयत्य वर्धिता। सा च सहायता दिवंगततादृशपण्डितभार्ययापि प्राप्यताम् इतीदृशी भावना

सर्वप्रथमं डा० स्वामिनाथ-महोदयस्य मनस्येव प्रादुरभूत् । यै पण्डितैः सर्वविध-जीवनसौख्यमवहेल्य बुभुक्षितैर्भूत्वापि स्वकर्तव्यबुद्धिप्रेरितैर्वेदादिशास्त्रं संरक्षितं सस्वराभ्यासेन तत्तच्छास्त्रतात्पर्यप्रकाशकटीकादिना च, तेषां कृते तत्परिवारसदस्यानामभावग्रस्तानां च कृते प्रजातन्त्रीयसर्वकारस्यापि किमपि कर्त्तव्यमस्तीति समाजकल्याण-शिक्षा-मन्त्रालयस्य ध्यानं भवतैवाकृष्टं तदर्थञ्चानवरतं प्रयत्नं संघर्षं च विधाय तदर्थमपि साहाय्यं संचालितम् । इदमपूर्वं कार्यं भवत औचित्य-चिन्तन-भावनां तस्याः कार्यान्वियन-योग्यतां स्वकर्तव्यनिष्ठां चावगमयति ।

आदर्शपाठशालानां स्थापनया भवता संस्कृतस्य परम्परीणपारावरीणोभय-पद्धतिसमवेतशिक्षणव्यवस्थया संस्कृतस्तरोन्नयनस्य मार्गो निर्मितः ।

साम्प्रतिकाः संस्कृताध्यापका अर्वाचीना न तथा शास्त्रप्रौढिं भजन्ते यथा प्राचीना विद्वांस इति दिनानुदिनं क्षीयमाणं संस्कृतवाङ्मयज्ञानं विलोक्य सर्वे संस्कृतानुरागिणश्चिन्तिताः । तेषां चिन्ताशमनोपायश्चूडामणिपरियोजनाऽस्यैव दूरदर्शिन उद्भावना । अस्यां परियोजनायां बहवो ज्ञानवृद्धा वृद्धा विद्वांसो महाविद्यालयविश्वविद्यालयादर्शपाठशालाविद्यापीठादौ नियुक्ताः । तेभ्योऽधीत्य साम्प्रतिकाः शिक्षकाः स्वसंशयमपाकुर्वन्ति ज्ञानपिपासां शमयन्ति पाण्डित्यप्रौढिं चाधिगच्छन्ति । अनेन भवतः कार्येण ह्रासमुपगच्छच्छास्त्राज्ञानं सुरक्षितं विलोक्य सर्वे वयं भवन्तं यत्स्तुमस्तत्सहेतुकमेव ।

दुर्लभग्रन्थप्रकाशनं कारयित्वा समुचितेन स्वल्पेन मूल्येण तदुपलब्धि-व्यवस्थां च विधाय भवता महदुपकृतं संस्कृतजगत् । निर्णयसागरप्रकाशनं यथा संस्कृतवाङ्मयभेदप्रभेदानुविद्धत्वात्परिपूर्णं तथैव स्व विशुद्धये प्राचीनटीका-सम्पत्तये च स्पृहणीयम् । तेषां दौर्लभ्यं कं न दुःखाकरोति स्म । तत्सौलभ्य-सम्पादकोऽयं भवतः प्रयत्नः सर्वैर्भूरि भूरि प्रशस्यते ।

तिरुपतिविद्यापीठस्य संस्कृतविश्वविद्यालयास्पदत्वप्रदानप्रस्तावो भवदीय-कृतिरेव तत्साहचर्याच्च दिल्लीविद्यापीठमपि संस्कृतविश्वविद्यालयत्वमध्यगच्छत् विश्वविद्यालयगौरवं लभमानमिदं विद्यापीठद्वयं भवत्कार्तज्ञं स्वीकरोति ।

काव्यशास्त्रविनोदेन कालो गच्छति धीमतामित्यस्य निदर्शनमपि भवान् भवति । तथाविधमधिकारिणं पण्डितं दृष्ट्वा भवान् सर्वदा तादृशं प्रसं

प्रस्तौति येन कापि काव्यरसधारेव शास्त्रविचारधारा प्रवहति। वेदान्तसदृश-चिन्तनप्रधानदर्शनचर्चायामपि भवता प्रस्तुतायां काव्यानन्द इवालौकिकानन्दः समुद्भवति। एकदा यात्रावसरे पुष्कले समये लब्धे मयाऽपि य आनन्दो लब्धः स भूतो न भावीति सर्वदा स्मर्यते। तत्र यात्रायामन्वर्थनामा श्री विद्यानिवास मिश्र महोदयः समवेत आसीत् यथा वत्समुखव्यापारेण व्यापृता गौर्दुग्धामृत-धारया तदधिकारिणं तर्पयति तथा भवतो जिज्ञासया व्यापृतो मिश्रमहोदयः स्वोपार्जितज्ञानामृतधारया संमिश्रितां त्रिवेणीं निर्माय यात्रां परमानन्दमयी-मकरोत्। अनयोर्मिश्र - स्वामिनाथमहोदययोः कतरस्य वाग्धारा गाङ्गेयी कतरस्य च यामुनेयीति न कथयितुं शक्यते उभयोरपि यथावसरमुभयरूपत्वात्, ममापि सरस्वती कदापि उद्भूता तत्र कमपि सहयोगमकरोत्। अनिर्वचनीया सा रसधारा वस्तुतः रसस्य प्रसिद्धानिर्वचीयत्वं सत्यापयति स्म। तत्र यात्रायां यदा श्रीमद्भागवतप्रसंगः समागतस्तदोभयोः सहृदययोः कण्ठादुद्भूतानां श्लोकानां गानेन तत्र तत्र काव्ये संस्कृततदितरभाषानिबद्धतत्तत्प्रसंगीयपद्यानां गीतानां तुलनात्मकसमीक्षया च "पिबत भागवतं रसमालय" मित्यत्र प्रतिपादितं भागवतस्य सर्वोत्कृष्टपेयत्वं समुद्भूतम्।

सहृदयशिरोमणिरयं प्रबुद्धो भावकोऽपि सन् कविरिति कवित्वमाचार्यत्व-ञ्चैकत्रास्मिन् दृश्यते। एकं करुणरसं काव्यं भक्तिपरकमपरं स्तोत्रकाव्यं लघुनाटकञ्च प्रकाशितमस्य कवित्वं साधयति।

चित्रकलाप्रावीण्यं विना न कोऽपि सफलः कविर्भवितुमर्हति। दृश्यते चात्र चित्रचित्रणचातुरी। विद्यापीठप्रकाशित-परिभाषेन्दुशेखरस्य मुखपृष्ठे दृश्यमानं नटराजचित्रं त्रिमुनिव्याकरणमिति प्रसिद्धि यत् प्रत्यक्षयति तदस्यैव निदर्शनस्य फलम्। चित्रमस्यैव चिरंजीविना पुत्रेण यथायथं पितुर्निदर्शनमवाप्य रचितम्।

पूजाकाले गृहे चन्दनचर्चितभालोऽपि जनः कार्यालये परिहासभयाद् भाल-मन्यथाकृत्यैव गच्छति परन्त्वयम्—"न जातु कामान्न भयान्न लोभाद् धर्मं त्यजेज्जीवितस्यापि हेतोः" रितिवचनस्य निदर्शनमिवावर्तत।

यथावदात आकृत्या द्राघीयान वपुषा भवान्।
तथैव मनसा स्वच्छः कर्मणा च समुन्नतः ॥१॥

भवान् विभाति भालेन विशालेन तथा तथा ।
औदार्येण चरित्रेण व्यवस्थापाटवेन च ॥२॥

कालिदास-शब्दाननुसृत्यात्र शक्यते वक्तुम्

व्यूढोरस्को वृषस्कन्धः शालतुङ्गो महाभुजः ।
आत्मकर्मक्षमं देहं वैप्रो धर्म इवाश्रितः ॥३॥

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भः आरम्भसदृशोदयः ॥ ॥

स्वामिनाथमहाभागः संस्कृतेः संस्कृतस्य च ।
सेवको मनसा वाचा कर्मणा जयतात्सदा ॥५॥

इति शिवम्

श्रीलालबहादुरशास्त्रिकेन्द्रीयसंस्कृतविद्यापीठम्
नयी दिल्ली-११००१६

डा. सी.आर. स्वामिनाथन् : स्वातंत्र्योत्तर संस्कृत प्रगति के सूत्रधार

(डा० मण्डन मिश्र, निदेशक, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली)

डा० सी० आर० स्वामिनाथन् से मेरा २५ वर्ष पूर्व परिचय हुआ था। यह २५ वर्षों का इतिहास स्वातन्त्र्योत्तर संस्कृत की प्रगति का उज्ज्वल इतिहास है—जिसके सूत्रधारों में डा० स्वामिनाथन् का अपना एक विशिष्ट स्थान है। मेरा सौभाग्य है कि दक्षिण भारत के विद्वानों से मुझे सहज स्नेह मिला है। मैं उसी पुण्य क्षेत्र के एक आचार्य का विद्यार्थी हूँ और उसके बाद भी मेरे विकास में तथा मेरे द्वारा प्राप्त की गई सफलताओं में इस पवित्र प्रदेश के निवासियों का महत्त्वपूर्ण योगदान है। एक ओर गुरु के रूप में आचार्य श्री पट्टाभिराम शास्त्री और दूसरी ओर मित्र के रूप में डा० सी० आर० स्वामिनाथन् इन समस्त सफलताओं के मूल पुरोधा हैं। इन सफलताओं में जिस प्रकार गुरु के रूप में आचार्य श्री पट्टाभिराम शास्त्री जी की देन के बारे में सारा देश परिचित है, उसी प्रकार मित्र के रूप में डा० सी० आर० स्वामिनाथन् के साथ मेरे सम्बन्ध भी सर्व विदित हैं। आश्चर्य तब होता है कि जब कई बार हम दोनों मिलकर भी यह घोषणा करें कि हम किसी एक प्रश्न पर वैमत्य रखते हैं या मेरे सदा यह कहते रहने पर भी कि डा० स्वामिनाथन् जी सरकारी प्रक्रियाओं में मुझे भी नहीं बख्शते हैं, इन तथ्यों पर संस्कृत-जगत् का कोई भी व्यक्ति विश्वास नहीं करता। हम दोनों को दो शरीरों में विद्यमान एक आत्मा के युगल के रूप में सब लोग मानते आये हैं और स्वभाव, व्यवहार और कार्यविधि में अन्तर होते हुए भी ईश्वर द्वारा प्रस्तावित अद्वैत के हम दोनों साक्षात् रूप समझे जाते रहे हैं। मैं इसको अपना परम सौभाग्य मानता हूं।

जब मैं राजस्थान से यहाँ आया और दिल्ली में संस्कृत का काम प्रारम्भ किया, उससे कुछ ही समय पहले डा० सी० आर० स्वामिनाथन् दिल्ली में आये थे। मेरी काम करने की पद्धति से बहुत लोग अधिक आशावान् नहीं

थे। कुछ तो ऐसा भी कहते थे, जैसे हम कोई निष्ठावान् लोग नहीं हैं, कि उत्सव करके स्वार्थ सिद्ध कर जल्दी ही चले जाने वाले हैं। मैं इस बात गर्व के साथ उल्लेख करता हूँ कि जब हमारे सारे काम और कार्यक्रमों लोगों ने गम्भीरता से नहीं लिया, तब भी डा० सी० आर० स्वामिनाथन् ऐसे व्यक्ति थे—जो मंत्रालय में बैठकर हमारा समर्थन करते थे और इस लिए कई बार लोगों से उनको संघर्ष भी करना पड़ता था—जो परम्परा कि न किसी रूप में आज तक भी जारी है।

एक आस्तिक और सम्भ्रांत ब्राह्मण परिवार में जन्म लेकर का शंकराचार्य जी की छत्र-छाया में जो उदात्त संस्कारों की सम्पत्ति इनको मि है, ऐसे भाग्यशाली बहुत कम लोग होते हैं। यही कारण है कि लगातार बीसवीं शताब्दी में भारत की चकाचौंधमयी राजधानी में रहते हुए भी उन ब्राह्मणत्व तन मन से अक्षुण्ण रूप में देदीप्यमान है। यह अपने आप में उन व्यक्तित्व की एक उल्लेखनीय विशेषता है। उनका पांडित्य बहुमुखी है। की विभिन्न शाखाओं के उच्चारण से लेकर कर्मकाण्ड की विभिन्न विधा धर्मशास्त्र के मूलभूत सिद्धान्तों, शंकर दर्शन के तत्त्व ज्ञान, विशिष्ट तांत्रि साधनाओं के परिज्ञान के साथ-साथ मधुर और कोमल रस-सिद्ध कवि के में एक ही व्यक्ति में सब कुछ संग्रहीत मिलता है। इस समन्वित और विक व्यक्तित्व ही का नाम डा० सी० आर० स्वामिनाथन् है। इस प्रकार इतना अद्भुत समागम बहुत कम देखने को प्राप्त होता है। विद्या की प्राचीन परम्परा के साथ संस्कृत, अंग्रेजी, तमिल, तेलगू, मलयालम और हिन्दी जैसी अनेक भाषाओं पर उनका अच्छा अधिकार है। उनके वेद पाठ और उ बाद अंग्रेजी जैसी भाषा के माध्यम से उसका व्याख्यान श्रोताओं को मंत्र-मु करता है। भगवान् ने बड़ा विशाल और भव्य आकार प्रकार भी उनको दि है और इस दृष्टि से भी वे आकर्षण के केन्द्र रहे हैं। यह आकर्षण विश्र ग्रहण तक की आयु में भी सुरक्षित है—यह उनकी भक्तिभावना का प्रतिफ है।

वैसे सामान्य रूप से अधिकारी आते हैं और चले जाते हैं, लेकिन ब कम व्यक्ति ऐसे होते हैं जिनके बारे में अभिनन्दन ग्रंथ निकलते हैं और वि के समय जिनका विशेष सम्मान किया जाता है। उन व्यक्तियों का सेवा सामान्य सेवा की तरह नहीं होता, अपितु उससे बढ़कर उनकी निष्ठा उस दायित्व के प्रति समर्पण की भावना होती है। भारतीय संस्कृति की विशेषता है कि जो कम से कम लेकर अधिक से अधिक दे, वह इस राष्ट्र

लिए वन्दनीय होता है। इस दृष्टि से डा० सी० आर० स्वामिनाथन् बहुत ही यशस्वी और उल्लेखनीय व्यक्ति हैं। उन्होंने सेवा से अपना निर्वाह तो किया, लेकिन सहस्र गुण अधिक संस्कृत को दिया। इसलिए वास्तव में वे हमारे लिये अभिनंदनीय हैं।

वे सदा एक जीवित जाग्रत अधिकारी रहे हैं। उन्होंने प्रत्येक योजना में प्राणाधान किया। मंत्रालय द्वारा जितने भी कार्यक्रम संचालित थे, उनको तेजस्विता प्रदान की और मंत्रालय में संस्कृत की आवाज को सदा बुलन्द रखा। उनके योगदान के बारे में बहुत कुछ लिखा जा सकता है, लेकिन मैं उनकी विशेष उपलब्धियों में सबसे पहली उपलब्धि यह मानता हूं कि उन्होंने व्यक्तिगत परिचय और प्रभाव के द्वारा ऐसे क्षेत्रों में संस्कृत को जीवित रखा-जहाँ राज्य सरकारें कुछ नहीं कर पा रही थी। संस्कृत के ऐसे लोगों की सहायता की—जो चारों ओर संस्कृत और भारतीय संस्कृति विरोधी वातावरणों से ग्रसित हैं और जिनका कोई आश्रय नहीं है। उन्होंने संस्कृत की सेवा और प्रचार प्रसार को सबसे पहला राष्ट्रीय कर्तव्य माना और सांस्कृतिक एकता के लिए संस्कृत की अनिवार्यता पर जो हम भाषण देते हैं, उसको क्रिया में परिणत करने का आजीवन प्रयत्न किया। उनकी दूसरी उपलब्धि वेद संरक्षण कार्यक्रम का प्रवर्तन और उसके लिए प्रतिष्ठान स्थापित करने के प्रयासों में सफलता प्राप्त करना है। आज भी इन योजनाओं के अन्तर्गत हम सैकड़ों छोटे-छोटे वटुकों को पारम्परकि पद्धति पर वेद पाठ करते हुये देखते हैं तो ऐसा लगता है कि हमारा प्राचीन गौरव अभी तक संरक्षित है। उनकी तीसरी उपलब्धि तिरुपति विद्यापीठ को विश्वविद्यालय स्तर प्रदान करने के बारे में उनका प्रस्ताव है जो अब सिद्धांत रूप में स्वीकार कर लिया गया है। उनकी चतुर्थ उपलब्धि आदर्श विद्यालय योजना का संचालन है—जिसके अन्तर्गत २० के लगभग विद्यालय देश के विभिन्न भागों में काम कर रहे हैं। ये केन्द्रीय संस्कृत विद्यापीठों के लघु संस्करण है—जो आगे चलकर केन्द्रीय विद्यापीठों के लक्ष्यों की पूर्ति करेंगे। यह एक ऐसा विकल्प है जिसके द्वारा हम बहुत जल्दी प्रत्येक राज्य में पहुँच पायेंगे। उनकी पंचम उपलब्धि शास्त्र-चूडामणि-योजना का निर्माण है जिसके अन्तर्गत मूर्धन्य वयोवृद्ध विद्वानों की सेवायें देश के प्रतिष्ठित विश्वविद्यालयों, विद्यापीठों और महाविद्यालयों को प्राप्त हो रही हैं। जिस प्रकार वेद संरक्षण योजना ने वेद के प्राचीन अध्ययन की रक्षा करने में योगदान दिया है, इस योजना ने प्राचीन वैदुष्य के संरक्षण की ओर भारत सरकार का ध्यान आकृष्ट किया हैं। उनकी छठी विशेष

उपलब्धि दुर्लभ संस्कृत ग्रन्थों का सस्ते मूल्यों पर प्रकाशन है। इस योजना के अन्तर्गत सौ से अधिक संस्कृत ग्रन्थ सुरक्षित और सुलभ हो गये हैं जो कि एक प्रकार से संस्कृत के क्षेत्र से दुर्लभ होगये थे। उनकी सप्तम उपलब्धि साधनहीन संस्कृत विद्वानों की निर्वाह वृत्ति को उनकी विधवाओं तक पहुँचाना है जिसके द्वारा दो हजार के लगभग संस्कृत पंडितों की विधवायें सम्मान के साथ अपना जीवन निर्वाह कर रही हैं।

मैं नहीं समझता कि डा० स्वामिनाथन् हम से विदा हो रहे हैं। मैं यह मानता हूँ कि शास्त्री-भवन से निकलकर एक अधिक शक्तिशाली व्यक्ति के रूप में वे संस्कृत के लिए उभरेंगे; जो योग्यता, अनुभव और प्रताप उनको संस्कृत से मिला है, उसका अधिक लाभ अब संस्कृत को ही वे देंगे। फिर भी जो सात उपलब्धियाँ उनकी हैं, वे सप्तर्षियों की भेंट के रूप में उनके सेवाकाल का सदा स्मरण कराती रहेंगी।

श्रीपादसप्ततेः डा० स्वामिनाथकृता 'श्रीपादपराग'-व्याख्या

(आचार्य सोहनलाल गौडः, नई दिल्ली)

श्रीनारायणभट्टपादविरचिता श्रीपादसप्ततिः संस्कृत-स्तोत्र-साहित्ये एकामनिर्वचनीयाम् भावसम्पत्तिमाधत्ते। अस्मिन् काव्ये भावकल्पनयोः मणिकाञ्चनसंयोगोऽवलोक्यते। अस्य काव्यस्य विषयः मुक्तिपुरीस्थायाः गिरीन्द्रतनयायाः श्रीपादस्य स्तवनमात्रमेव। उक्तमपि कवित्रयैः 'पार्वत्याः पदमत्र दृश्यमिति वा पादे भवत्त्वेन वा'। यदा कश्चिन्महाकविः कमपि संक्षिप्तम् विषयमवलम्ब्य काव्य-रचनायाम् प्रवर्तते तदा काव्ये विच्छित्तिविशेषस्य श्लेषालंकार-चमत्कृतेः उक्तिवैचित्र्यस्य भाषाचातुर्यस्य शास्त्रान्तरसन्निवेश-कौशलस्य च प्रयोगेण क्वचिन्नैसर्गिकम् क्वचिच्च प्रयत्नकृतम् काठिन्यम् आपद्यते। महाकवीनाम् वर्णनस्थलेषु एतत् सुस्पष्टम् प्रचुरतरञ्च अधिगम्यते। उक्तमपि त्रिविक्रम भट्टेन।

वाचः काठिन्यमायान्ति भङ्गश्लेषविशेषतः।
नोद्वेगतस्त्र कर्तव्यो यतो नैकरसः कविः॥

एतत्काव्यस्थलानाम्—अर्थावबोधने व्याख्याने वा कश्चित् समर्थः काव्यरसमर्मज्ञो विपश्चिदपश्चिमः बहुश्रुतः भावुकश्च कविपुङ्गव एव क्षमः न कोऽपि साधारणः पण्डितंमन्यः। तथा चोक्तम् —

विद्वानेव हि जानाति विद्वज्जनपरिश्रमम्।
न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम्॥

अस्यां पृष्ठभूमौ यदा वयं श्रीपादपरागम् समीक्षामहे तदा टीका-कर्त्तुः भावविश्लेषण पटुतांदर्शम् दर्शम् काव्यकलासमाकलन-दक्षताञ्च स्मारं स्मारं नितराम् परितोषमनुभवामः। व्याख्यायां

सर्वत्र टीकाकर्त्तुः बहुज्ञता बहुश्रुतता वा प्रस्फुटीभवति। काव्यस्य भावसाम्यं ग्रंथान्तरसंकेतैः संपोषयन् सः भावस्य प्रेषणीयताम् आस्वाद्यताञ्च संवर्धयते। निदर्शनार्थम् कानिचित् स्थलानि उद्ध्रियन्ते। द्वितीयपद्यव्याख्याने "यदादाय न्यस्तं दृषदि दमयन्नेव मनसा" इति सौन्दर्यलहरी, तृतीये 'चित्ते कृपा समरनिष्ठुरता च दृष्टा इति सप्तशती, दशमे 'कुटिलशशिचूडालमुकुटम्" इति सौन्दर्यलहरी "अष्टमीचन्द्रविभ्राजदलकस्थलशोभिता" इति ललितासहस्रनामस्तोत्रम्' "अश्मानमिममारोह अश्मेव त्वं स्थिरा भव' इति वैदिकमंत्रम् "यज्ञाद्भवति पर्जन्यः" इति गीता इत्यादयः अनेके ग्रन्थाः समुद्धृताः सन्ति।

महाकवयः सर्वशास्त्रपारदृश्वानो भवन्ति, अत एव तेषाम् रचनासु विविधशास्त्राणाम् संनिवेशेन भावाववोधने काठिन्यमापद्यते। केचित् तु प्रयत्नपूर्वकम् एतादृशम् निबन्धनमाबध्नन्ति। "ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया' इति श्रीहर्षस्य वचनमत्र प्रामाण्यमावहति। अस्यां स्थितौ तत्तद्ग्रन्थिविमोचनम् टीकाकर्त्तुः स्कन्धयोरापतति। एतदर्थम् तस्य वैदुष्यम् निकषोपले कृष्यते।

तस्य बहुज्ञता निपुणता वा उपज्ञाशाणे उल्लिह्यते। अस्मिन् काव्येऽपि कवेः एतादृशः चमत्कारोऽनेकशः उपनिबध्यते। तत्र सर्वत्र टीकाकारः सफलजागरूक इव ग्रन्थान्तरग्रन्थिम् सम्यक् विस्फोटयति। दिङ्मात्रमुपन्यस्यते—

बिभ्राणेन मनोज्ञयावकरसम् मञ्जुध्वनिं नूपुर-
श्लेषालंकृतिशालिना नखमणि जातप्रसादश्रिया।
एकेनैव पदेन देवि महिषध्वंसे महीयस्तरः
श्लोकोऽयं रचितस्त्वयेति विबुधास्संश्लाघनं कुर्वते॥

अत्रैकपदेन महिषध्वंसव्यतिकरे काव्यलक्षणानां सन्निवेशः श्लेषमहिम्ना साध्यते। काव्यस्य रसः आत्मा, तस्य धर्माः गुणाः, शोभाधायकाः धर्माः अलंकाराः, व्यङ्ग्यार्थचमत्कारातिशयशालिताऽ

ध्वनिः इत्येते काव्यसौन्दर्यसाधकाः धर्मविशेषाः अत्र संनिविष्टाः सन्ति। अत्र टीकाकारः—

"काव्यलक्षणानां कथं सन्निवेश इत्युच्यते बिभ्राणनेत्यादिना। मनोज्ञयावकरसम् बिभ्राणेन मनोहरं लाक्षारसं वहता। श्लोकपक्षे य-आ-व-क इत्यक्षराणां मनोज्ञरीत्या संघटनेन क्+आ-व्+य इति काव्यपदवाचकत्वं भवति। तस्य रसः काव्यरसस्तं बिभ्राणेन। अभिधालक्षणाभ्यां व्यतिरिक्तः व्यञ्जनात्मकः रसध्वनिरेव यः काव्यात्मभूतः स एवात्र पादरूपे काव्येऽपि लाक्षारसरूपेण वर्त्तते। मञ्जुध्वनिं बिभ्रता काव्यविषये चित्ताह्लादजनकध्वनिविशिष्टः पाद-पक्षे नूपुरध्वनिं वहता। नूपुरश्लेषालङ्कृतिशालिना अलंकार-रूपमञ्जीरघटितत्वाद् ध्वनिं कुर्वता। काव्यपक्षे श्लेषालंकार-युक्तेन तन्मूलाभिव्यञ्जननिष्ठध्वनिविशिष्टेनेत्यर्थः"। कियता सारल्येन टीकाकारः श्लेषनिबधनम् विस्फोटयन् जिज्ञासूनाम् पाठ-कानाम् साधुवादमर्हति। सर्वत्र तस्य काव्यशास्त्रीयनैपुण्यम् श्लाघ्य तमम् विभाति। एवमेव निम्नाङ्किते पद्येऽक्षरसमाम्नायसंघटनेव भगवत्याश्चरण उपमीयते। तत्र टीकाकर्तुः व्याकरणशास्त्रकौशलं प्रस्फुटीभवति--

त्वत्पादोऽयमजाश्रितश्च रुचिरस्पर्शान्वितो योगिना-
मन्तस्थाकृतिरुष्मभाक् च महिषप्रध्वंसनप्रक्रमे।
एवं खल्वखिलाक्षरात्मकममुं शैलेन्द्रकन्ये कथम्
भाषन्ते नतवर्गबन्धुमपवर्गालम्बनं चाम्बिके॥

अक्षरसमाम्नायस्तावत् एवम् गण्यते "अचः स्वराः, कादयो मावसानाः स्पर्शाः, यवरलाः अन्तस्थाः, शषसहाश्च ऊष्माणः। अस्मिन् पद्ये देव्याः पादः सकलाक्षरप्रपञ्चात्मकः विराजते इति प्रतिपाद्यते। तत्कथम्। अत्र टीकाकारः—कथमिति चेदजाश्रितः अजः ब्रह्मा तस्याश्रयः अथवा अचो अच् संज्ञाकानां स्वराणामाश्रयः। अकारादिक्षकारान्ताः सर्वे वर्णाः वीजाक्षरा देवीवाचका इति मन्त्र-शास्त्रे प्रसिद्धम्। रुचिरस्पर्शान्वितः मार्दवत्वात्सुखस्पर्शावहः।

ककारादारभ्य मकारान्तैः पञ्चविंशतिस्पर्शवर्णैरन्वितः। योगि चित्तकमले सदा सन्निधत्त इति हेतोरन्तःस्था आकृतिः यस्य सः देव्या पादः। अन्तःस्थसंज्ञकानाम् आकृतिः यरलवानामाकृतिर्यस्य पादस्य महिषप्रध्वंसनप्रक्रमे महिषासुरध्वंसनोद्यमे ऊष्मभाक् शौर्योष्माणम् वहति अथवा श ष स इति ऊष्मवर्णास्त्रयोऽपि भजन्ति अथ शषसवर्णात्मकं भवति पदम्। एवमक्षरसमाम्नायरूपं खलु ते पदम् तथापि कथमेनम् नतवर्गबन्धुम् त थ द ध न इति तवर्गस्य बन्धु भवतीति भाषन्ते ? नतानाम् वर्गाणाम् प्रणमतां भक्तानाम् बन्धु रिति विरोधपरिहारः। एवमेव अपवर्गास्पदं प फ ब भ इति पवर्गस्यास्पदं न भवतीति भाषन्ते। अपवर्गस्य मोक्षस्यास्पद मिति विरोधपरिहारः।"

अत्र किमु वक्तव्यम् यत् टीकाकारः कियता कौशलेन उभयो सारूप्यं विशकलयति तेनैव सार्धम् व्याकरणशास्त्रस्य प्रयोगं च सम्यक् संयोजयति। श्लोकावगमने यदपेक्षितम् तत् सर्वम् अत्र विद्यते अनपेक्षितः शब्दाडम्बरः परिहृतः। व्याख्यामनुसरतः पाठकस्या पद्यार्थः हस्तामलकवत् प्रकाशते।

एवमेव षड्विंशतितमे पद्ये न्यायसिद्धान्तानाम् चत्वारिंशत्तमे पद्ये तन्त्रशास्त्राङ्गभूतानाम् वशीकरणादिकर्मणाम् विशिष्ट विवरण प्रदीयते। वशीकरणादितान्त्रिकप्रयोगाणाम् लक्षणानि अतिसरल शैल्योपन्यस्तानि। तद्यथा "वशीकरणं नाम सर्वस्य विश्वस्य प्रयो क्तुर्वशे आनयनम्।" "उच्चाटनं नाम प्रयोक्तुश्शरीरे आविष्टानां भूतप्रेतादीनामुच्चाटनमपोहनम्" इत्यादयः। एवमन्यत्राप्यनेक स्थलेषु भावोन्मीलनोदर्का प्रतिभा चकास्ते। एकचत्वारिंशत्तमे पद्ये "किं पञ्चायुधवाण... प्रिये" पञ्चाङ्गुलीषु पञ्चायुधबाण पञ्चकत्वम्, कल्पद्रुमपञ्चकत्वम्, तन्मात्रपञ्चकत्वञ्च, प्रमाण पुरस्सरं ससाध्यते। पाठकानाम सौविध्याय पञ्चकल्पवृक्षाणा परिचयोऽपि अमरकोशोक्तः संनिबद्धः। 'कारणपूर्वकः कार्यगुणो दृष्टः

इति सांख्यसिद्धान्तमुद्धरता तेन सूक्ष्मतन्मात्राणाम् पञ्चानाम् प्रपञ्च-कारणत्वमपि स्पष्टीकृतम् ।

शब्दार्थयोः संनिविष्टाः अलंकाराः काव्यसुषमां पुष्णन्ति । महाकविः नारायणभट्टपादः, सर्वत्रालङ्कृतामेव भारतीम् आतनुते । टीकाकारश्च यथावसरमलङ्काराणां सङ्गतिम् प्रदर्शयतितमाम् । एवञ्च विरोधाभासः श्लेषानुप्राणितः, कारणोत्प्रेक्षा फलोत्प्रेक्षा, उल्लेखः, व्यतिरेकः, श्लेषानुप्राणिता उपमा, रूपकम्, इत्यादयः अलङ्काराः यथास्थानम् उट्टंकिताः वर्तन्ते । अलंकारप्रदर्शनशैली चाति सरला । यथा द्विपञ्चाशत्तमे पद्ये "कथमयं वार्तामिमां श्रुत्वा कण्टकवेधनं यथार्थम् मन्वामः प्रतिक्रियां करिष्यति" इति परीक्षितुम् ततः परिहासितुं चेच्छया व्याजोक्त्या निवेदयन्ति ।" त्रिपञ्चाशत्तमे पद्ये "पञ्चानाम् त्रिदशोत्पादनं च विरोधः । पञ्च एव कामबाणाः लक्षत्वं च जनयन्तीत्याश्चर्यम्" पञ्चपञ्चाशत्तमे श्लोके उल्लेखस्य षड्पञ्चाषत्तमे च व्यतिरेकध्वनेः प्रदर्शनम् क्रियते "मुखकमलादपि पदकमलमेवाराध्यतरमिति ध्वनिः ।

किं बहुना प्रतिपद्यम् संस्यूताः अलङ्काराः क्वचिद् नामनिर्देशपुरस्सरम् क्वचिच्च संकेतशैल्या संकेतिताः वर्तन्ते । अनेन टीकाकारस्य सफलेन प्रयासेन काव्यरसास्वादः काव्यरसपिपासुभिः पाठकषट्पदैः आतृप्ति आस्वाद्यते ।

प्रायो व्याख्याकाराः पर्यायवाचकशब्दसंयोजनमात्रेणैव आत्मानम् कृतकृत्यं मन्यन्ते । कवीनाम् शब्दप्रयोगः साधारणजनापेक्षया विलक्षणतरो भवति । यद्यपि सिद्धकवीनाम् पुरस्तात् शब्दाः अहमहमिकया समुपस्थिताः भवन्ति । कविश्च तान् सम्यक् परीक्ष्य तेषाम् भावप्रेषणाशक्तिमत्ताञ्च लक्ष्यीकृत्य कमपि शब्दविशेषम् परिचिनोति । अर्थसाम्येऽपि शब्दा अभिव्यक्तौ भिद्यन्ते । योऽर्थः कलशशब्देनाभिव्यज्यते नाऽसौ कुम्भशब्देन घटपदेन वा । संक्षेपतः कवीनाम् शब्दचयने विशिष्टोऽभिप्रायो वर्तते । तञ्चाभिप्रायम्

कश्चिद् शब्दार्थयोरन्यूनानतिरिक्तत्वम् सहभावम् परिचित्य भावुक व्याख्याकारः एव प्रकटयितुम् क्षमः। श्रीपादपरागे सर्वत्र भावाभिव्यक्तौ टीकाकारस्य प्रेयान् प्रयासः वरीवर्तते। प्रथमं तावत् पर्यायैः वाच्यार्थम् विशकलयति। तदनन्तरञ्च यथाशक्यम् परिमितैरेवाक्षरैः शब्दस्य विशिष्टार्थम अभिव्यनक्ति। यावच्च कवेरा प्रायः पाठकानाम् पुरतः न स्फुरति तावदसौ न तुष्यति। यदि अन्ये भावाः शब्दमहिम्ना गुम्फिताः वर्तन्ते तर्हि तान् मुहुर्मुहुरुद्घाटयति अस्मिन् प्रयासे भाषा अतीव प्राञ्जला भावावबोधनक्षमा शैली प्रसादगुणमयी भवति। व्याख्यातृकुलधुर्यतां गतेन मल्लिनाथसूरिणा स्वव्याख्याप्रस्तावे प्रतिज्ञातम्—

इहान्वयमुखेनैव सर्वं व्याख्यायते मया।

नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥

कदाचित् एनाम् प्रतिश्रुतिमेव मनसि कृत्य श्रीपादपरागस्य लेखः स्वकर्मणि प्रवृत्तः। व्याख्यायाम् एकमपि वाक्यम्, एकमपि वा एतादृशम् न वर्तते यत् निष्कास्यमानम् स्वन्यूनतां न प्रकाशयेत् उपयुक्तैः पदनिचयैः, सुस्पष्टैः वाक्यविन्यासैः, सूक्तीभूतैः निष्क वाक्यसमूहैश्च स्वगद्यनिबन्धनमापूरयन् असौ महानुभावः "महीयां प्रकृत्या मितभाषिणः" इति माघोक्तम् यथार्थयति। अस्य ग्रन्थ प्रतिपद्यम् वक्रोक्तिचातुर्यसंवलितं भावशबलतया सनाथीकृतमास्ते अस्याः व्याख्यायाः सहकारेण एषः ग्रन्थः साधारणपाठकानाम् कृते सुगमः कृतः, विदुषां कृते काव्यमर्मप्रकाशः जातः, भक्तानाञ्च हृदयाह्लादकरः भगवतीचरणरेणुप्रसादः सुलभीकृतः।

एतदन्यदपि श्लाघनीयमास्ते। मध्ये मध्ये एतादृशाः संदर्भाः आयान्ति यत्र निरन्तरानभ्यासवशात् विदुषामपि विस्मृतिः जायते। एकादश रुद्राः के, पञ्च कल्पवृक्षाः के, नव निधयः के, एतादृशाः अनेके प्रसंगाः पाठकानाम् स्मृतिमतिक्राम्यन्ति। एषः टीकाकारः पाठकैः सह स्वसहृदयताम् आरिरक्षिषुः अपेक्षतिम् प्रामाण्यम् सम

स्थापयति। वामदेवः, ज्येष्ठः, श्रेष्ठः, रुद्रः, कालः, कलविकरणः, बलः, विकरणः, बलप्रमथनः, सर्वभूतदमनः मनोन्मनः, इत्येकादश रुद्राः।

'महापद्मश्च पद्मश्च शंखो मकरकच्छपौ। मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव' इति नव निधयः। 'पञ्चैते देवतरवो मन्दारः पारिजातकः, सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्।' इति पञ्चकल्पवृक्षाः। स्थाने-स्थाने च संकेतितानाम् पुराणकथाप्रसङ्गानामपि मूलग्रंथानुसारी सारसंक्षेपः कृतः। संक्षेपेण एतदेव वक्तुम् शक्यते यत् स्ववैदुष्यस्य संयतम् प्रयोगम् आयुञ्जानः टीकाकारः सहृदयपाठकानाम् साधुवादमर्हति। 'मार्मिकः को मरन्दानामन्तरेण मधुव्रतम्' इत्युक्तिञ्च स्मारयति।

डा० सी. आर. स्वामिनाथप्रणीतस्य 'श्रीबदरीशसुप्रभात' स्तोत्रकाव्यस्य समीक्षा

(आचार्य रमेशचन्द्र शुक्लः, नयी दिल्ली)

श्रुति-स्मृत्युपनिषच्छास्त्रपुराणदिपरकं परमविशालं महनीय-महिममण्डित साहित्यं संस्कृतवाङ्मयं स्वकीयेन दिव्येनालोकेनालोकितं विदधद् वयं यदीक्षितुं सौभाग्यं विन्दामहे तदा तत् काव्य-महाकाव्य-गीतिकाव्य-गद्यकाव्य-रूपक-कथा-चम्प्वादिकानां साहित्येनापि स्वकीयया सरसया हृदयहारिण्या सुन्दरतया च भृशं विभूष्यमाणमासाद्यते। एतावत्यैव कमनीयतया कमनीयमित्येतन्न, तत्तु रसपरिप्लुतहृदयमर्म्मस्पर्शि लालित्यललितेन च विशालत्तोपेतेन स्तोत्रनिकुरम्बेणापि विद्योत्यमानं भवदतितरां सम्प्रेक्षितं भवति।

स्तोत्रेषु भगवद्भक्ता भगवतो हृदयस्य परामद्भुतमहोविलसितां कोमलतां, तस्य चानिर्वचनीयामसीमामुदारतां, महनीय-महिममेदुरामितवत्सलतां भव्यभक्तिभावपूर्वकं गायन्त आप्यन्ते।

अतीतानेहसि सञ्जातानां कृपामयपरमात्मनो वदान्यताद्यनन्त गुणसंकीर्तननिलीनानां भक्तानामस्ति संख्या विशाला। अतः शिव-महिम्नस्तोत्र - मुकुन्दमाला-कृष्णकर्णामृत - स्तुतिकुसुमाञ्जलि-प्रभृति-सहस्रशः शिवविष्णुदुर्गादिस्तुतिपरकाणि मनोऽभिरामाणि स्तोत्र-काव्यानि सम्प्राप्यन्ते।

एतस्मिन् वर्तमानकाले ये हि अनेके स्तोत्रप्रणेतारो भगवद्-भक्ताः सम्प्रेक्ष्यन्ते तेषु अन्यतमस्य स्तोत्र-काव्यप्रणयनकर्तुः श्रीमतो डा० सी० आर० स्वामिनाथ-भगवद्भक्तप्रवरस्य श्रीबदरीश-सुप्रभातनामधेयं स्तोत्रकाव्यं समीक्षितुमिह प्रक्रम्यते।

प्रकृतं हि श्रीबदरीशसुप्रभात - स्तोत्रकाव्यं सुललितपदपेशलं रमणीयार्थसमलङ्कृतं वसन्ततिलकाभिधछन्दोनिबद्धं पण्डितरघुनाथ-शर्मकृतव्याख्योपेतं पञ्चाशच्छ्लोकात्मकं भवद् भगवच्चरणारविन्द-निषेवणपरायणभक्तानां मानसं भृशं प्रीणयत् विराजते—

प्रारम्भे स्तोत्रप्रणेता—

'लम्बोदरं निजरदं सहसा विपाट्य'

इत्यनया प्रथमश्लोकस्थितया प्रथमया पङ्क्त्यैव स्वीयां लेखनीं पुनानः सकलप्रत्यूहविनाशनक्षमं गणेशं स्तवीति। ततश्च-'पद्मोद्भव-प्रमुखशक्तिवसिष्ठमुख्यैः' इत्येतदादिपदावलिपेशलेन श्लोकेन सप्रश्रयं गुरुपरम्परां संस्मरति। तदनु स्तोत्रसमाप्तिं यावत् प्रतिश्लोकं परिस्पन्दमानेन चतुर्थचरणेन श्रीनाथं वदरिकेश्वरं प्रार्थयते भक्तो यत् तव स्मरणात् मम सुप्रभातं भवत्विति। भगवत्स्तवनसंसक्त स्वान्तो भक्तः स्वामिनाथः श्रीनाथे वदरिकेश्वरे सकलश्रुतिस्तुत्यत्वा खिलोपनिषत्पुराणादिवन्दनीयत्वाद्यनन्तविशिष्टताविशिष्टे स्वकीयं मनः श्रद्धया सन्निशयन् स्तोत्रकाव्यमुपसंहृतिपर्यन्तं भक्तिभावना-मधुरिम्णा सर्वानपि श्लोकान् मधुरान् विदधत् परिवीक्ष्यते।

स्तोत्रकाव्यमिदं सर्वाङ्गीणया साहित्यश्रिया संसेव्यमानं वर्तते। सर्वेषामपि श्लोकानामेकैकं पदं तया प्रौढया भक्तिभावनया विभावितं भूत्वा विभाति यत्र सरलहृदयता निरभिमानिता आत्मसमर्पणधीः समीचीनतया समुल्लसन्ति। एतद्विधविशिष्टतासद्भावात् वस्तुतः स्तोत्रकाव्यमिदं, ये भक्ति रसे नान्तर्भावयन्ति, तानुपहसदिव संलक्ष्यते।

एतस्मिन् स्तोत्रकाव्ये शोभमानोऽयम्

'सीतापते दशरथात्मज सत्यसन्ध
सौमित्रिदाशपतिवन्द्य दशास्यशत्रो।
वातात्मजाश्रित विभीषणसेविताङ्घ्रे
श्रीनाथ ते वदरिकेश्वर ! सुप्रभातम्॥'

श्लोकः श्रीमद्रामायणस्य समग्रामपि कथां सङ्केतयन् समुपतिष्ठति।

अथ च काव्यमिदं प्रह्लाद-सुदाम-गजेन्द्र-कुब्जा-भीष्म-हनुमदम्बरीष-पाण्डुनन्दन-ध्रुव-शवरी - गुह-वाल्मीकि-भरत-विभीषण-गोपिका-द्रौपद्यलर्क-शुक-गौतम-धर्मदास-विदुर-रुक्माङ्गद - जनमेजया-दीन् भक्तान् गायत् संदृश्यते। तथा विधाय तदस्माकं हृदये भक्ति सञ्चारयति सम्यक्। किञ्च काव्यादस्मात् कमठ-मत्स्य-वराह-नरसिंह-परशुराम-श्रीकृष्ण-बुद्धाद्यवताराणामवगतिर्दृढतामस्मदीयाधि-गच्छति।

स्तोत्रकाव्येऽस्मिन् क्वापि 'नारायणाखिल गुरो' इत्येतदादि-कानि पदानि निशम्याधीत्य वा 'आपो नारा इति प्रोक्ता···'इत्यादि-स्मृतिगतं वाक्यं, क्वापि किमपि पदम् 'उत्तमः पुरुषस्त्वन्यः······ इत्येतदादिगीतास्थितश्लोकं, क्वापि 'प्रस्थानभेदशतगम्य···'इत्येत-दादिपदपङ्क्तिर्महिम्नस्तोत्रस्य 'नृणामेको गम्यस्त्वमसि पयसामर्णः इव' इत्येतद् पदवृन्दं, क्वापि 'भुजगेन्द्रशायिन्' इत्येतत् पदं; 'असंगो नहि सज्जते' इत्येतच्छ्रुतिमंत्रवाक्यं क्वापि 'नारायणीप्रि' इत्येतत्पदं 'यस्य देवस्य यद्रूपमित्येतद् दुर्गासप्तशतीपद्यं च स्मारयति एतेन श्रीबदरीशसुप्रभातस्तोत्रकाव्यकर्तुर्वेदपुराणगीतास्मृत्यादि-निष्णातत्वं विदिततां प्रयाति।

अस्मिन् स्तोत्रकाव्ये ईदृशानि वहूनि पदानि विशेषणपदानि च विद्यन्ते यानि सन्ति साभिप्रायणि अतः परिकरालङ्कारश्रीः, 'भव-ब्धिपोत' इत्यादौ रूपकालङ्कारलक्ष्मीः, 'शीताम्भसि स्नपन····· इत्येतदादिपदानि भङ्ग्या बदरीशस्य प्राकाम्यसिद्धिमभिव्यञ्जन्ति तेन पर्यायोक्तालङ्कारशोभा, 'मुक्तामयीं रचयतीव' इत्येतदादि-पदपङ्क्तिषु: क्वापि उत्प्रेक्षायाः सुन्दरता, 'नयनाब्जकोशम्' इत्येतदा-क्वाप्युपमायाः कमनीयता, क्वापि 'देवर्षयोऽपीत्यादिश्लोक उदात्ता-लङ्कारस्य च्छटा च बुधजनानां चेतांसि नन्दयति। वस्तुतोऽस्मि-स्तोत्रकाव्ये वर्णनमेतादृशमपि शोभते येन पूर्वकालिका भाव-प्रत्यक्षतां यान्त्यतोभाविकालङ्कारः सचेतसां चेतांसि भृशं तोषयति

'तरणे भवसागरस्य' इत्यादिका पदावलिः' काव्यलिङ्गालङ्कारस्य कान्त्या सहृदयं प्रीणयन्ती प्राप्ता भवति। भावोऽयम् अनेकानेकालङ्कारा अस्मिन् स्तोत्र-काव्ये संशोभन्ते। सर्वत्राप्यनायासेन श्लोकार्थोऽवगततां प्रयात्यतः प्रसादगुणः प्राधान्येनास्मिन् स्तोत्रकाव्ये विभ्राजते।

ध्वनिमन्तरेण न किमपि काव्यमुत्तमं मतं भवति। एतस्मिन् स्तोत्रकाव्ये तस्यापि सौन्दर्यं सम्प्रेक्ष्यते। 'सौगन्धिका कुसुमगन्ध…' इत्येतदादिश्लोकास्तस्य (ध्वनेः) सन्ति निदर्शनानि।

एवंविधानि स्थलानि च बहूनि एतस्मिन् स्तोत्रकाव्ये विभान्ति येषु प्रकृतेः सुन्दरता नयनगोचरतां याति।

"उत्तुङ्गशृङ्गतुहिनाचल……"।

"भागीरथीतटविहार……"

"नन्देव नन्दयति"

"पुष्पाणि विन्दुसरसः"

इत्येतदादिकाः श्लोकाः प्रकृतेः शोभां सम्यगुपस्थापयन्तः प्रेक्ष्यन्ते।

क्वापि क्वापि व्याकरणविषयिणी विदुषोऽद्भुता व्युत्पत्तिर्ज्ञाततां प्रपद्यते।

'मुकुन्दः', 'नताभयः', 'नरावतारः', 'दीनबन्धो' इत्येतदादिपदेषु बहुव्रीहिसमासस्याभा विशिष्टतया, 'द्रौण्याञ्जनेय' इत्यादौ निपातप्रकरणस्थयानित्यत्वश्रिया 'अवबोधयिष्णु' 'रित्यादौ ण्यन्ताज्जातस्य इष्णुच्प्रत्ययस्य प्रभया, अथ च 'हरेत्तव' इत्यादिपदे पदविन्यासस्य व्याकरणविच्छित्या च कविरयं बुधवराणां मनांसि मोदयते।

अस्मिन् स्तोत्रकाव्ये बहूनि स्थलानि दर्शनस्य सुन्दरतया सुन्दराणि भूत्वा विभासन्ते।

'योगेश्वरोऽस्यखिललोकगुरुस्वरूपः' इत्यत्र योगदर्शनस्य 'स पूर्वेषामपि गुरुः कालेनावच्छेदा' दित्येतत् सूत्रं स्मृतं भवति। 'देवर्षयोऽपि यमसक्तविविक्तसाक्षी' इत्येतदादिश्लोकः

श्लोकः श्रीमद्रामायणस्य समग्रामपि कथां सङ्केतयन् समुपतिष्ठति।

अथ च काव्यमिदं प्रह्लाद-सुदाम-गजेन्द्र-कुब्जा-भीष्म-हनुमदम्बरीष-पाण्डुनन्दन-ध्रुव-शवरी - गुह्-वाल्मीकि-भरत-विभीषण-गोपिका-द्रौपद्यलर्क-शुक-गौतम-धर्मदास-विदुर-रुक्माङ्गद - जनमेजया-दीन् भक्तान् गायत् संदृश्यते। तथा विधाय तदस्माकं हृदये भक्ति सञ्चारयति सम्यक्। किञ्च काव्यादस्मात् कमठ-मत्स्य-वराह-नरसिंह-परशुराम-श्रीकृष्ण-बुद्धाद्यवताराणामवगतिर्दृढतामस्मदीयाधि-गच्छति।

स्तोत्रकाव्येऽस्मिन् क्वापि 'नारायणाखिल गुरो' इत्येतदादि-कानि पदानि निशम्याधीत्य वा 'आपो नारा इति प्रोक्ता···'इत्यादिकं स्मृतिगतं वाक्यं, क्वापि किमपि पदम् 'उत्तमः पुरुषस्त्वन्यः······' इत्येतदादिगीतास्थितश्लोकं, क्वापि 'प्रस्थानभेदशतगम्य···'इत्येत-दादिपदपङ्क्तिर्महिम्नस्तोत्रस्य 'नृणामेको गम्यस्त्वमसि पयसामर्णव इव' इत्येतद् पदवृन्दं, क्वापि 'भुजगेन्द्रशायिन्' इत्येतत् पदं च 'असंगो नहि सज्जते' इत्येतच्छ्रुतिमंत्रवाक्यं क्वापि 'नारायणीप्रिय' इत्येतत्पदं 'यस्य देवस्य यद्रूपमित्येतद् दुर्गासप्तशतीपद्यं च स्मारयति। एतेन श्रीबदरीशसुप्रभातस्तोत्रकाव्यकर्तुर्वेदपुराणगीतास्मृत्यादिषु निष्णातत्वं विदितता प्रयाति।

अस्मिन् स्तोत्रकाव्ये ईदृशानि वहूनि पदानि विशेषणपदानि वा विद्यन्ते यानि सन्ति साभिप्रायाणि अतः परिकरालङ्कारश्रीः, 'भवा-ब्धिपोत' इत्यादौ रूपकालङ्कारलक्ष्मीः, 'शीताम्भसि स्नपन······' इत्येतदादिपदानि भङ्ग्या बदरीशस्य प्राकाम्यसिद्धिमभिव्यञ्जन्ति तेन पर्यायोक्तालङ्कारशोभा, 'मुक्तामयीं रचयतीव' इत्येतदादि पदपङ्क्तिषु: क्वापि उत्प्रेक्षायाः सुन्दरता, 'नयनाब्जकोशम्' इत्येतदादौ क्वाप्युपमायाः कमनीयता, क्वापि 'देवर्षयोऽपीत्यादिश्लोक उदात्ता-लङ्कारस्य च्छटा च बुधजनानां चेतांसि नन्दयति। वस्तुतोऽस्मिन् स्तोत्रकाव्ये वर्णनमेतादृशमपि शोभते येन पूर्वकालिका भावा प्रत्यक्षतां यान्त्यतोभाविकालङ्कारः सचेतसां चेतांसि भृशं तोषयति।

'तरणे भवसागरस्य' इत्यादिका पदावलिः' काव्यलिङ्गालङ्कारस्य कान्त्या सहृदयं प्रीणयन्ती प्राप्ता भवति। भावोऽयम् अनेकानेकालङ्कारा अस्मिन् स्तोत्र-काव्ये संशोभन्ते। सर्वत्राप्यनायासेन श्लोकार्थोऽवगततां प्रयात्यतः प्रसादगुणः प्राधान्येनास्मिन् स्तोत्रकाव्ये विभ्राजते।

ध्वनिमन्तरेण न किमपि काव्यमुत्तमं मतं भवति। एतस्मिन् स्तोत्रकाव्ये तस्यापि सौन्दर्यं सम्प्रेक्ष्यते। 'सौगन्धिका कुसुमगन्ध…' इत्येतदादिश्लोकास्तस्य (ध्वनेः) सन्ति निदर्शनानि।

एवंविधानि स्थलानि च बहूनि एतस्मिन् स्तोत्रकाव्ये विभान्ति येषु प्रकृतेः सुन्दरता नयनगोचरतां याति।

"उत्तुङ्गशृङ्गतुहिनाचल……"।

"भागीरथीतटविहार……"

"नन्देव नन्दयति"

"पुष्पाणि विन्दुसरसः"

इत्येतदादिकाः श्लोकाः प्रकृतेः शोभां सम्यगुपस्थापयन्तः प्रेक्ष्यन्ते।

क्वापि क्वापि व्याकरणविषयिणी विदुषोऽद्भुता व्युत्पत्तिर्ज्ञततां प्रपद्यते।

'मुकुन्दः', 'नताभयः', 'नरावतारः', 'दीनबन्धो' इत्येतदादिपदेषु बहुव्रीहिसमासस्याभा विशिष्टतया, 'द्रौण्याञ्जनेय' इत्यादौ निपातप्रकरणस्थयानित्यत्वश्रिया 'अवबोधयिष्णु' 'रित्यादौ ण्यन्ताज्जातस्य इष्णुच्प्रत्ययस्य प्रभया, अथ च 'हरेत्तव' इत्यादिपदे पदविन्यासस्य व्याकरणविच्छित्या च कविरयं बुधवराणां मनांसि मोदयते।

अस्मिन् स्तोत्रकाव्ये बहूनि स्थलानि दर्शनस्य सुन्दरतया सुन्दराणि भूत्वा विभासन्ते।

'योगेश्वरोऽस्यखिललोकगुरुस्वरूपः' इत्यत्र योगदर्शनस्य 'स पूर्वेषामपि गुरुः कालेनावच्छेदा' दित्येतत् सूत्रं स्मृतं भवति। 'देवर्षयोऽपि यमसक्तविविक्तसाक्षी' इत्येतदादिश्लोकः

सांख्यमतं निर्दिशन् दृश्यते । विष्णु' रित्येतत्पदं सर्वत्र व्यापक इत्येतस्मिन्नर्थे निहितम् । तद् ब्रह्मणः सर्वव्यापकत्वं स्मारयति । 'वेदान्तवेद्य' इत्येतत् पदं, स्तोत्रकाव्यस्यास्य प्रणेता, तत् सर्वं तत्त्वं ज्ञापयितुं निदधातीति मन्ये ।

एताभिः सर्वाभिर्विशिष्टताभिः समन्वितत्वात् श्रीबदरीशसुप्रभातम् स्तोत्रकाव्यमाधुनिके कालेऽनुपमं स्तोत्रं भवच्छोभते ।

"श्रीनाथ ते बदरिकेश्वर सुप्रभातम्" इत्यनया पदावल्या स्तोत्रमेतच्चतुर्थचरणे नवामेव चारुतां सञ्चारितां विधाय विद्यमानेषु स्तोत्रेष्वात्मानं हि अनन्यगामुच्चतां प्रापयदिव संलक्ष्यते । अथ च अनेन विधिना स्वकीयमिष्टदेवं प्रणमन्तो नान्ये स्तोत्रकर्तारो दृश्यन्ते। युगस्यास्य नूतनतायां दृष्टिं निधायायं स्तोत्ररचयिता स्वकीये स्तोत्रकाव्ये नवीनामेव सरणिं सृजति ।

स्तोत्रकाव्यमिदं स्तोत्रपरकेण सौन्दर्येण साहित्यनिष्ठेन च लालित्येन परमकमनीयं भूत्वा चकास्ति । तत्रैकतो नवनवभावा राजन्ते अपरतश्च तत्र रचनाया रमणीयं स्वरूपं द्योतते । स्तोत्रे विलसितं किमप्यद्भुतमनवद्यतत्त्वं श्रोतॄणामध्येतॄणाञ्च मनो नितरां प्रमोदयतीति शम् ।

स्तोत्रं पठेत् प्रतिदिनं मनुजो य एतत्
भक्त्या पवित्र मनसा नियमस्थितः सन् ।
स्यात् तस्य मानसगतः सफलोऽभिलाषो
मुक्तिं लभेत कृपया च हरेः स भक्तः ।।

स्वामिनाथरचनात्रयसमीक्षणम्

(आचार्य रमेशचन्द्र शुक्लः, नयी दिल्ली)

कर्णभूषणम्—

(१)

कर्णोऽभवज्जगति विश्रुतदानवीरो
दत्वाप्यसूननिशमेव जनेन धर्मः ।
संरक्षणीय इति वीरवरः स मेने
तज्जीवनं हि जगतेदृशमेव दृष्टम् ॥

(२)

श्रीस्वामिनाथकविना रचितं मनोज्ञम्
एकाङ्किनाटकमिदं जगतीहितार्थम् ।
यत् कर्णभूषणमिति प्रथितां स्वसंज्ञां
तत्त्वं दधात्युपरि तत् कथितं सुरम्यम् ॥

ध्वस्तं कुसुमम्—

(१)

क्रूरं महद् भवति हन्त विधातृकार्यं
शोकप्रदं हृदयदुःखदशोचनीयम् ।
तज्जीवनं न मनुजस्य कदापि कर्तुं
शक्नोति विस्मृतमतिक्षतिकारि निन्द्यम् ॥

(२)

यां शोकगीतिपरकां कृतवान् कृतिं स्वां
श्रीस्वामिनाथकविमौलिमणिः सुमृद्वीम् ।
सा ध्वस्तपूर्वकुसुमाभिधया प्रसिद्धा
तत्रास्ति गीतमतिकोमलमेतदेव ॥

नरवलिप्रबन्धः—

(१)

अस्मिन् बन्धुरकौशले नरवलौ वल्गुप्रबन्धे प्रिये
शय्या भाति पदावलेः सुमृदुला संदीप्यते चारुता ।
काप्योजोगुणशालिनी नवनवार्थोन्मेषसंगुम्फिता
छन्दांसीह मनोहराण्यतितरां वस्त्वस्ति भावाञ्चितम् ॥

(२)

आदावत्र विराजते हिमनगश्रीः मानसाह्लादिनी
रम्यं तस्य च वर्णनं बुधगुणानन्दप्रदं मञ्जुलम् ।
मातुर्भाति ततश्च दिव्यसुषमासंशोभितं दर्शनं
गद्यञ्चापि विलोक्यतेऽतिरुचिरं पाण्डित्यभाभास्वरम् ॥

श्रीस्वामिनाथ ! भवतामपि सुप्रभातम्

(कविरत्न कृष्णप्रसाद शर्मा घिमिरे, टङ्गाल गहिरीधारा,
काठमाण्डू, नेपाल)

(१)

नारायणस्य सनरस्य कृपापरस्य
सच्चिन्मयस्य निगमागमसंस्तुतस्य ।
दिव्या स्तुतिर्विरचिता विदुषां कृते या
तत् स्वामिनाथ ! भवतामपि सुप्रभातम् ॥

(२)

सा स्वर्णदी विजयते सनकादिसिद्धै-
रन्यैर्महर्षिमुनिभिश्च सुसेविताङ्गा ।
यां धारयन्त्यहह ! यत्र पुरी विशाला
तां निर्दिशन्नभिमतं, तव सुप्रभातम् ॥

(३)

तस्यां स्थितौ नरवरौ भुवनातिशायि
यच्चक्रतुस्तप उभौ स्वचरित्रचित्रम् ।
श्रुत्वैव दर्शननिमित्तमगाज्जनौघ-
स्तद्वर्णयन् सुमधुरं तव सुप्रभातम् ॥

(४)

आद्येन शङ्करनिभेन हितङ्करेण
श्रीशङ्करेण गुरुणा जगतां प्रियेण ।
संस्थापितं प्रथमपीठमहो ! विवर्ण्य
यत् सत्कृतं, तव भवेदथ सुप्रभातम् ॥

(५)

तत्राश्रितो यतिवरो गुरु-गौरवोऽसौ
श्रीचन्द्रशेखर उपाह्व उदारचेताः ।
नित्यं जयत्यसमबोधयुतो महात्मा
तं निर्दिशञ्छ्रुतिपरं, तव सुप्रभातम् ॥

(६)

तत्पादपीठमनुसृत्य विराजमानं
लोके "जयेन्द्र" इति लब्धशुभाभिधानम् ।
अन्यं जगद्गुरुमपीहं सुखं प्रशंसन्
धन्योऽसि, तत् तव भवेदथ सुप्रभातम् ॥

(७)

पद्माद्भवादिगुरुवर्यपरम्परां तां
स्वाश्रित्य संस्थितवतोऽत्र गृहस्थधर्मे ।
दृष्ट्वैव तत्र रतिमित्थमहं विमुग्धः
शान्तं ब्रवीमि, "सुखमस्तु तव प्रभातम्" ॥

(रचनातिथि : २४-१-१९८२ ई०)

वर्धते स्वामिनाथः

(श्री श्रीसुन्दरराजः, आइ. ए. एस., योजना-आयोगे संयुक्तसचिवः, नई दिल्ली)

कामकोटिवरपीठमण्डन-
चन्द्रशेखरसरस्वतीक्षया ।
स्वामिनाथ इह शंकरेक्षया
स्वामिनाथ इव वर्धतेतराम् ॥१॥
स सर्वकारे परतन्त्रभूतः
सन्नप्यकार्यं न कदाऽप्यकार्षीत् ।
सत्कार्यकारित्वतया ततोऽमुं
सर्वोऽभिधत्ते भुवि कार्यकारम् ॥२॥
द्रागेव तारकभयं दिवि देवतानां
श्रीस्वामिनाथकृपया व्यपनीतमासीत् ।
तद्वत्प्रतारकभयं भुवि देववाण्याः
श्रीस्वामिनाथसुधिया व्यपनीयतेऽद्य ॥३॥
अर्वाचीनं संस्कृतं यत्प्रबन्धैः
प्राचीनं नस्संस्कृतं चातिशेते ।
अर्वाचीनास्सर्वे एवाधमर्णाः
तस्मादस्मिन् भारतास्वामिनाथे ॥४॥
स्वामी भूत्वा सर्वकारो निवृत्तं
कर्तुं शक्तो यं स्वसेवात एव ।
सेवायास्तं नो पुनर्देववाण्याः
तस्मात्स्पष्टं स्वामिनाथत्वमस्य ॥५॥
प्रशस्यं यं प्रशंस्याद्य स्वामिनाथमहोदयम् ।
कृता कृतविदां श्रेष्ठं कृतार्था कविता मम ॥६॥

डा. स्वामिनाथानां शासन-सेवा-निवृत्ति-समये

[डॉ० प्रभाकर नारायण कवठेकर:, पूर्वाध्यक्ष:
केन्द्रीय संस्कृत मण्डलस्य, इन्दौर (म० प्र०)]

मन्त्रालय-विभागं यो सनाथीकृतवान् सुधीः ।
सेवाया विनिवृत्तोऽपि सेवायां प्रभविष्यति ॥१॥
वेद-वेदान्त-शास्त्रज्ञः परमाचार्य-सेवकः ।
आसनं भूषयामास कुशलः पण्डितश्च यः ॥२॥
मन्मानसे निवसतः पण्डितस्य महात्मनः ।
प्रवेशाद् यस्य सञ्जातं विशालं मे मनोऽभवत् ।३॥
राष्ट्रिये संस्कृतस्यापि साचिव्यं मण्डले कृतम् ।
येन मण्डल-सङ्कल्पाः शीघ्रं कार्यान्विताः कृताः ।४॥
कविः, सखा, स्वामि-भक्तो मुखरः स्पष्टवाक् सुधीः ।
आसनस्थः शासनस्थो योऽस्ति विद्या-विभूषितः ।५॥
स्वामिनाथ इति पदं पुनरुक्तवदिष्यते ।
स्वामिनां नाथ इत्येव योऽधिकारी सुशासकः ॥६॥
स्वतन्त्रः पण्डितः श्रेष्ठो निरभ्र-रवि-सम्मितः ।
स सेवाविनिवृत्तोऽपि सेवमानोऽद्य वर्धते ॥७॥

श्लोकनवकम्

[डा० स०सु० जानकी, कुप्पुस्वामिशास्त्रि गवेषणसंस्था निदेशिका,
मद्रपुरी (मद्रास)]

(१)

डाक्टर् सी. आर्. यस्. इत्येव सुप्रसिद्धसुनामभृत् ।
भारते च विदेशेषु सद्भिस्सर्वैः सुपूजितः ॥

(२)

देववाणी-शिरोरत्नं महार्हमतुलं महत् ।
यशोभाजां च सर्वेषां शिरोभूषणमुत्तमम्

(३)

वेद-वेदाङ्गतत्त्वज्ञः, काव्यकञ्जमधुव्रतः
कामकोटिगुरूत्तंस - प्रीतिभाजनमुत्तमम् ॥

(४)

काव्यशास्त्रविशेषज्ञो ग्रन्थानां च विमर्शकः ।
सङ्गीतरसिकः कर्ता साहित्यानां स्वयं तथा ॥

(५)

नाटकानां रचयिता प्रतिष्ठाता तथैव च ।
विदुषां कल्पकश्चायं स्वाश्रितानां च कामधुक् ॥

(६)

सूत्रधारी कार्यदर्शी नियन्ता पोषकस्तथा ।
अध्यक्षश्च समाजानां विविधानां विशेषवित् ॥

(७)

भारतीयसंस्कृतेश्च स्वदेशेषु प्रदर्शकः ।
दाक्षिण्येन सदा युक्तः दाक्षिणात्यः कलानिधिः ॥

(८)

आयासरहितः कश्चित्सदा विद्यामुपासितः ।
उत्साहः पौरुषं धैर्यमित्येतैश्च गुणैर्युतः ॥

(९)

काव्यशास्त्रविनोदेन सार्थं यस्य च जीवितम् ।
एवंविधगुणोपेतः स्वामिनाथमहोदयः ॥

श्रीस्वामिनाथं प्रति

(श्री भि० वेलणकरः, सम्पादकः, 'गीर्वाण-सुधा', बम्बई)

असौ स्वामिनाथो भजते निवृत्ति
स्वसेवाव्रताच्छासनलब्धकार्यात् ।
निवृत्तिर्न तस्यास्ति तु कार्यराशेः
कदा स्नेहवृत्तेरथ संस्कृतस्य ॥१॥

स मित्रं सदा संस्कृतसेवाकानां
समुत्साहादाता चिरसिद्धहस्तः ।
स संवर्धने संस्कृतपक्षदक्षः
ततः स्वामिनाथो लभते प्रशस्तिम् ॥२॥

दिगन्तान् प्रगन्ता ननु संस्कृतार्थे
न वासः प्रवासश्च तदादृतोऽभूत् ।
न भूताः प्रभूतास्तुलिता अनेन,
तदास्यं न दास्यप्रणतं बभूव ॥३॥

स कुर्याद्धि सेवामथ संस्कृतस्य
तमामन्त्रयेऽहं नतमस्तकोऽत्र ।
ततः स्वामिनाथस्य च कामयेऽहं
चिरं जीवनं तत् सुखशान्तिपूर्णम् ॥४॥

सूचना :—न वृत्तं व्याख्यातपूर्वं हेमचन्द्रादिभिः पूर्वाचार्यैः ।
अतः 'ययसय' गणैर्युतमिदं वृत्तं 'स्वामिनाथ' इति मयाभिधी

दिवास्वप्नः

[महाकविः, अक्किकत्तम्, त्रिचूरः, (केरलः)]

उल्लूर्-कविर्मह्यमनेकलेखान्
अनागतश्मश्रुकृते लिलेख ।
अद्यापि रोमन्थकृदेष बोधः
वार्धक्यकद्वारि यदा स्थितोऽस्मि ॥१॥

तथापि तावत्परमार्थपण्डि-
तोत्तंसकं, स्नेहमहाम्बुराशिम् ।
महाकविप्रौढ-सुभारतीय-
संस्कारपारङ्गतपुण्यवन्तम् ॥२॥

पाश्चात्य-पौरस्त्य-चरित्रसार-
स्वतं, समीक्ष्यास्य पुरः प्रणन्तुम् ।
भाग्यं न लब्धं-यदजस्रचिन्ता-
दुःखेन हा ! हन्त ! कदापि दूये ॥३॥

क्रमेण नानाविधजीवितस्य
वृत्तिव्यथा-व्याकुल-मार्गणोऽऽसम् ।
ताः विस्मृताः पूर्वकथास्तथापि
तन्मे विषादः पुनरप्युदेति ॥४॥

सत्यं यथा केवलमष्ट वाऽथ
दशाब्दपूर्वं हि निलातटान्ते ।
नावा मुकुन्दाङ्कतलेषु वेद-
पाठालयस्यापि पुरोऽङ्गणस्थः ॥५॥

सहस्त्रवर्षेषु सुदीर्घितस्य
विकस्वराश्वत्थतरोस्तु मूले ।
ऋजुस्थितश्चोज्ज्वलसंस्कृतेऽसौ
तस्थौ ब्रुवाणो ननु पूर्णकायः ॥६॥

श्रीस्वामिनाथोऽपि च यन्न वेद
तन्नास्ति लोके किमपीति वेद्यम् ।
ब्रह्माण्डभाण्डान्तरभूतसर्वम्
अस्मै यथा क्रीडनवस्तु जातम् ॥७॥

स्तब्धो भवाम्येष चतुर्दशासौ
यदा गभीरो वदतीह भाषाः ।
तेनोपगूढोऽपि यदा भवामि,
वाक्यं गभीरं च यदा शृणोमि ॥८॥

"मृतोऽस्ति नम्पूतिरिबालकोऽसौ"
सोऽयम् विशश्वास सुवर्षपूर्वम् ।
पुनः श्वसत्येव विजित्य मृत्युं
यत्स्वामिनाथस्य मनोमयेऽसौ ॥९॥

शासनसंसेवनतो
यन्नाथोऽयम् विरन्तुमारब्धः ।
क्रन्दति संस्कृतनिहितम्
श्रुत्यादिप्रथितवेदचातुर्यम् ॥१०॥

आर्याऽऽर्यः

[पं० आनन्द झा, शास्त्रचूडामणिपण्डितः, का०सिं०द०सं०वि०वि०, दरभंगा (बिहारः)]

(१)

संस्कृतनैकसमस्या-
महोदधौ द्राक्तरोऽयमिह यस्मात् ।
तस्मात् स्वामीनाथन्
द्राक्तर(डा०)सदुपाधिमावहन् भाति ॥

(२)

शास्त्रनिवास-स्थानं
नूनमयं नास्ति तत्र संशीतिः ।
"शास्त्रपुरं" ननु तस्मात्
प्रकथ्यते सत्यमेव सद्धिषणैः ॥

(३)

विनयप्रौज्ज्वल्याभ्यां
रामत्रयसाम्यमादधानोऽसौ ।
"सत्कर्मयोग"—योगात्
सत्यं कृष्णोऽपि "रामकृष्ण" स्तत् ॥

(४)

सुश्रवनिगमोच्चारण
आगमतत्त्वज्ञताशाली ।
शालीनतया प्रथितो—
ऽवितथोक्तियशोराशिरिह गदितः ।

(५)

शाङ्करवेदान्तविज्ञ-
स्तथागताध्वात्ययी ततः प्रथितः ।
गृहपूजितान्नपूर्णो
विद्वच्छात्रोपकारपरतावान् ॥

(६)

एतत्संस्कृतरचना—
वचनान्यमितानि सन्मनोहारीणि ।
कस्मादिति चेद्यस्मा-
न्न कल्पनाऽल्पत्वमादधानानि ।।

(७)

संस्कृत-संस्कृति-साहा-
य्याधिकृतौ राजकीयायाम् ।
तिष्ठंस्तत्प्रोन्नत्यै
विलसच्चेष्टो न केन दृष्टोऽसौ ।।

(८)

केन्द्रियलालबहादुर-
शास्त्रिप्रख्यात - बोधपीठस्य ।
मध्ये प्राचार्यत्वं
गतस्तदुन्नतिकरोऽभवद्विपुलम् ।।

(९)

सेवानिवृत्तिकालं
सम्प्राप्तोऽपि क्षमोऽस्ति निजकृत्ये ।
तस्मात् संस्कृतसंस्कृ-
त्युन्नतिराशावती सतीतोऽस्ति ।।

(१०)

जीवतु शरदां शतमय-
मुन्नतये संस्कृतस्य सुस्वस्थः ।
इति भगवन्तं माधव-
मुमाधवं चाप्यहं सदा याचे ।।

(११)

आर्याऽऽर्योऽयं यस्मा-
दार्याऽऽचरणस्तथाऽऽर्यपरिवारः ।
आर्याऽऽचार्यस्तुतिकृत्
कृतो मयास्त्यत्र तत्स्तुतिग्रन्थे ।।

श्रीस्वामिनाथ सुधीः

(डा० रमाशङ्कर त्रिपाठी, प्रधानाचार्यः, मुंबादेवी संस्कृत महाविद्यालयः,
भारतीय-विद्या-भवनं, बम्बई-७)

बाल्ये यो विषयान् विहाय सविषान् सारस्वतीमोषधिम्,
पीत्वाभूच्च विवेकधी विनयवान् मेधाक्षमाशीलवान् ।
सच्चारित्र्यपवित्रकीर्तिधृतिमान् हृत्कायवागैक्यवान्,
स्वस्थो जीवतु दीर्घकालमवनौ स स्वामिनाथः सुधीः ॥१॥

बाल्याद्यो जनकं तथा स्वजननीं त्यक्त्वा निजान् बान्धवान्,
वाग्देवीसमुपासनैकहृदयः सम्पाद्य भूरिश्रमम् ।
नानाशास्त्रमहानिधानममलं प्रापत्सुपुण्यादहो,
स्वस्थो जीवतु दीर्घकालमवनौ श्रीस्वामिनाथः सुधीः ॥२॥

यो देवं निगमागमादिगदितं सम्पूज्य संचिन्त्य वै,
यो वेदोदितकर्ममार्गमखिलं संश्रित्य धर्माग्रणीः ।
भूत्वा भक्तिविरागवित्तिमहितो वीतोऽभिमानादिभिः,
दैवीवाग्वितनाय नित्यनिरतो जीयाच्चिरं स क्षितौ ॥३॥

कुसुमाञ्जलिः

(पं० मोतीलाल 'पुष्करः', तन्त्र प्रकाशनम्, लीलानिवासः, गणपतियार,
श्रीनगर (काश्मीर) १९०००१)

प्रणम्याः स्वामिनः श्रेष्ठाः मादृशैः भारतीप्रियैः।
धन्याः भवन्तः सर्वे च पत्रिकायाः प्रबन्धकाः ॥१॥
प्रतिभां धारयन् श्रीमान् प्रवरसेनपुरे मया।
संस्कृतोत्थान - कार्यार्थम् दृष्टः पृष्टश्च सत्कृतः ॥२॥
तस्मिन्नेव क्षणे ज्ञातम् नासौ साधारणो जनः।
तस्य व्यवहारबुद्धिश्च ज्येष्ठा श्रेष्ठा प्रभाविनी ॥३॥
आंगल्यां संस्कृते हिन्द्याम् प्रावीण्यं धारयन् महान्।
पण्डितः प्रतिभाशाली मां चकार प्रभावितम् ॥४॥
तस्य ग्रन्थाः सुरुचिराः सच्छात्रज्ञानदायिनः।
तत्र व्यासस्य वाल्मीकेः वचसां स्मरणं कृतम् ॥५॥
विरलाः संस्कृतभक्ताः यैः कृताऽस्ति सदा हृदा।
सेवा गीर्वाणभारत्याः गृहे शासनकर्मणि ॥६॥
मदीया धारणा धीरा यदयं सुप्रभाकरः।
दक्षिणोत्तरयोरैक्यम् करिष्यति स्वनीतिभिः ॥७॥
पण्डितः प्रवरः श्रेष्ठः रचनाभिश्चकार यः।
संस्कृतसाहित्यं श्रेष्ठम् भक्तिविनयपूर्वकम् ॥८॥
विरलाः संस्कृतभक्ताः यैः कृताऽस्ति सदा हृदा।
सेवा गीर्वाणभारत्याः गृहे शासनकर्मणि ॥९॥

अर्वाचीनसंस्कृतांकः सप्तमे हायनेऽधुना ।
तेषां सेवां लक्ष्यीकृत्य प्रकाशं नीयते त्वया ॥१०॥
स्वामिनाथन्निति नामा डाक्टर्-पदवीविभूषितः ।
कार्यकारश्च सर्वेषां सुधीः शालीनशासकः ॥१२॥
तैरेव प्रेरितोऽस्मीति पुष्करः शारदासुतः ।
सदैव भारतीसेवाम् करोमि श्रद्धया सदा ॥१३॥

डा० सी. आर. स्वामिनाथ-महोदयाय उपहारप्रसूनानि

(राष्ट्रपतिसम्मानितः प्रो० बटुकनाथशास्त्री खिस्ते
शास्त्रचूडामणिपण्डितः, सं०सं० वि०वि०, वाराणसी)

(१)

नित्यक्षरन्निगमनिर्झरवारिधौत-
वक्त्राम्बुजाय कविताबनिताप्रियाय ।
सर्वोपकारविकसत्सुयशोभराय
स्वस्ति ब्रुवे मतिमतां प्रथमाय तस्मै ॥

(२)

गीर्वाणवाङ्मयविनोदविकासशाला-
भालायिता भरतभूतलराजधानी ।
येन व्यधायि रुचिरं सुचिरं ध्वनन्ती
स स्वामिनाथसुकृती मुदमादधातु ॥

(३)

भालोल्लसद्भसितभासितवीक्षणैर्यः
सद्यो विपक्षकुहनां क्षपयाञ्चकार ।
दाक्षायणीसहचरात्मजलक्षणानां
कुक्षिम्भरिर्विबुधरक्षणदक्षिणोऽयम् ॥

(४)

यः केरलाज्जलधिचुम्बितटान्तभागात्
आशैलराजशिखरं सततं स्फुरन्तीम् ।
गीर्वाणवाङ्मयचमूशतवैजयन्ती-
मुल्लासहासपदवीं गमयाञ्चकार ॥

(५)

गम्भीरनीरदघटाध्वनिभिः समस्तान्
हर्षोन्मदान् बुधमयूरवरान् वितन्वन् ।
यः स्वामिनाथपदवीमदवीयसीं स्वा-
माधत्त लोकहितचित्तचमत्क्रियाभिः ॥

(६)

तस्याऽनवद्यहृदयस्य चिरोपनद्ध-
कार्यस्थलाद्विरमतोऽपि शतोदयस्य ।
श्रीस्वामिनाथविदुषः पुरतः प्रभाते
सौभाग्यसूर्यसुषमामनुचिन्तयामः ॥

जयतात् स्वामिनाथः

[श्रीभरत पिषारटिः, कामधेनु-सम्पादकः, एरनेल्लूर, (केरलः)]

अद्वैतो महिमालयः सुमनसां प्रौढात्मनां सङ्गमे-
षूच्छ्रायेषु हिमालयस्त्वभिगमे मन्दानिलो मालयः ।
सत्सारस्वतसंसदां ननु लयः संवेदनीयश्च यः
स्वामी सौहृदमण्डलस्य जयतात् स स्वामिनाथश्चिरम् ॥

स्वामिनाथं नमामि

(डा० उमाकान्त शुक्लः, मुजफ्फरनगरम्)

हैमं वर्णं सुमेरुनुदयगिरितटान्दीप्तिमुद्यत्स्वभाव-
मब्धिङ्गम्भीर्यमुच्चैर्हिमनगशिखरानुन्नतत्वम्प्रकाण्डम ।
पुष्पाणि प्राज्यहास्यं विबुधधुनिचलद्वीचिवृन्दं शुचित्वं
हृत्वा हृष्टङ्गुणाढ्यं हृदयहरममुं स्वामिनाथं नमामि ॥

शुभाशंसा

(आचार्यं रमेशचन्द्र शुक्लः, ए-१/२०३, जनकपुरी,
नई दिल्ली - ११००५८)

(१)

सौजन्यामृतसागरः परहितस्वान्तः सुवर्त्मस्थितः
शास्त्राराधनलब्धमोदमधुरः काव्यानुरागानुगः।
विद्याद्योतितसाधुकोविदकुलार्चा - चातुरीमण्डितः
आचारोज्ज्वलशोभितः शुचिमनाः श्रीस्वामिनाथन् ! भवान् ॥

(२)

दोषं यो मम सज्जनो गुणमिव ज्ञात्वा वदान्यो बुधः
नो तस्मिन् न्यदधादुदारहृदयो दृष्टिं स्वकीयामहो।
पात्रत्वाद् रहितेऽपि हन्त मयि योऽकार्षीत् कृपां सर्वदा
सौजन्यं सदयस्य केन विधिना श्लाघे हि तस्याधुना ॥

(३)

यच्चित्ताब्जपरागपावनकृपां प्राप्याभवन्मादृशः
वार्धक्ये निजजीवनं गमयितुं मन्दोऽपि जातः क्षमः।
कृत्वा स्थापितमेतमीड्यचरितः श्रीशास्त्रचूडामणेः
स्वीयं मान्यपदे प्रसादममितं प्रादीदृशद् वस्तुतः ॥

(४)

धीमत्स्तोममिलिन्दसंस्तुतवपुः सद्वृत्तपुष्पप्रियैः
कीर्त्याः सौरभपूर्णवायुलसितो भावैः परागैरयम्।
शिष्टाचारसुचारुबन्धुररसैः स्निग्धैः सुधासन्निभैः
आस्वाद्यो मधुरैर्वचोभिरमलैः कल्पद्रुमः शोभते ॥

(५)

साहित्यादिसमस्तशास्त्रविभया विद्योतितो दिव्यया
वैदुष्यप्रतिभासुशोभितबुधो विद्यानवद्योदयः ।
अस्मद्भारतकेन्द्रशासनमहोलब्ध्वा परामर्शणं
तत्तकार्यचयेषु विज्ञवरतः कार्तार्थ्यमेत् सर्वथा ॥

(६)

जाता संस्कृतभारती प्रतिदिनं श्रीमद्भवत्पौरुषाद्
अत्यन्तोन्नतिगामिनी सहृदयस्वातन्त्र्यगे भारते ।
एतस्मात् प्रियकारणाद् विहितया तोषप्रदावस्थया
चार्थस्यापि हि पण्डिताः सुरगिरो नन्दन्ति सर्वेऽधुना ॥

(७)

शङ्कासंशयपूगपङ्कपतितं विद्वन् जनानां ! गणं
शान्त्याधानकरीं सुरम्यसरणिं ज्योतिर्मयीं दर्शयन् ।
कुर्वन् रम्यकृतीः प्रधीश्वरवर ! ज्ञानश्रियं वर्धयन्
स्वस्थः पश्यतु हर्षवर्षशतकं श्रीस्वामिनाथन् ! भवान् ॥

श्रीस्वामिनाथाभिनन्दम्

[श्री रत्नेश्वर झा, प्रधानाचार्यः, जगदीश ना०ब्र०आ० संस्कृतमहाविद्यालयः
लगमा (दरभंगा)]

सत्ये निष्ठां वहसि सततं शास्त्रबोधानुरूपाम्,
शीलागारो भवसि निरतो ह्यार्षविद्याप्रचारे ।
त्वाञ्चालोक्याधिपपदगतं देववाणी सनाथा,
नाथायन्ते मुदितमनसः साम्प्रतं विज्ञवर्याः ॥१॥

विद्यायां व्यसनं तथा सुजनता पाल्येषु दृष्टा सदा,
सभ्यानां पुरतः सदाग्रगणिता नीतौ तथा चारुता ।
वादे व्याघ्रवरस्य चाक्रमणता शास्त्रे तथैकाग्रता,
भूयात्ते व्रतपालने सफलता सर्वत्र चाजेयता ॥२॥

मेघं मन्दयसे कृपापरतया स्वीयैरुदारैर्गुणैः,
मान्द्यञ्चास्ति तव प्रलापकथने तथ्ये स्थिरत्वं तथा ।
त्वय्येवं परिलोक्य मेघचरितं आशान्विता भूसराः
वृत्तिञ्चातकतामुपेत्य सहसा त्वामेव पश्यन्त्यहो ॥३॥

नाना चिन्ता जगति कथिता लोभमोहात्मिका या,
दूरं कृत्वा भवसि निरतो देववाचः प्रचारे ।
वेदो जातो जगति निखिलज्ञानराशिः सुमूलम्,
तस्यासेचे भवसि सुखितः शं विदध्याच्छिवस्ते ॥४॥

था थेति नृत्यनिरतो गिरिजासहायः
भूतानुपालनपरः शिवदो गिरीशः ।
नित्यं निहत्य दुरितं तव कार्यजाते,
सिद्धिं ददातु सततं त्वयि कीर्तिरस्तु ॥५॥

नूनं त्वया विरचितं शुभदं सुकृत्यम्,
तस्यैव जातपरिपाकफलञ्च लब्धम् ।
अस्मिन् भवेऽपि सततं शुभकर्मजातम्,
कृत्वात्मबोधजितशैवपदं लभस्व ॥६॥

श्रीस्वामिनाथं नुमः

(आचार्य विष्णुकान्त झा, प्राचार्य, दीवानकृष्णकिशोर-सनातनधर्म-
संस्कृत कालेजः, अम्बाला कैन्ट)

(१)

वाणी यस्य सुधासमातिमधुरा दृष्टिर्महामञ्जुला
संव्रज्या मुखशान्तिदा खलु सदाऽन्यायादिदोषापहा।
बुद्धिर्लोकसुखानुचिन्तनपरा विद्यानवद्या शुभा
लोके सुप्रथितास्ति तं बुधवरं श्रीस्वामिनाथं नुमः॥

(२)

स्फूर्जद्वैभवलब्धगौरववरस्रग्वी गिरां मण्डनम्
काव्योल्लासितमञ्जुलकुञ्जवलीलास्योल्लसत्कोकिलः।
नव्यां वृत्तसुमावलीं सुरभितां तन्वन् सुपुष्पाकरः
स्वीयां मञ्जुलकाकलीं श्रुतिसुखां कूजन्निकुञ्जेचरः॥

(३)

भारत्याः पदसेवकः सुरगिरामुन्नेतुमिच्छापरः
यः संसत्सु बहुत्र संस्कृतविदां प्राप्तः सभाध्यक्षताम्।
व्याख्यानेऽतिपटुः स्वसंस्कृतगिरा रत्नाकरं पूरयन्
विद्यां स्वाधिगतां प्रकाशयति यो भास्वानिवाभां निजाम्॥

(४)

यशश्चन्द्रो यस्यानिशमतिशयं मोदनिचयम्
ददानो विद्याविद्व्रजकुमुदवृन्दाय भुवने।
पराब्जालिग्लानिं विदधदिह संराजतितराम्
वरं स्वामीनाथं प्रथितगुणवृन्दं परिणुमः॥

(५)

लसत्तेजोराशिं विलसितसुविद्यालिसरसी-
मरालं वाग्मीशं सदसि महतां सन्मतिमताम् ।
विपक्षालीकक्षज्वलदितरवैश्वानरवरम्
वरं स्वामीनाथं प्रथितगुणवृन्दं परिणुमः ॥

(६)

पयोराशिश्वेतोज्ज्वलितसदने यस्य सुभगा
विराजन्ती मूर्तिर्जननिकरवन्द्या विलसति ।
दिगन्ते विख्यातं विततकृतिजातं तमतुलम्
वरं स्वामीनाथं प्रथितगुणवृन्दं परिणुमः ॥

शुभाशंसनम्

(नित्याग्निहोत्री, सोमयाजी, त्रिवेदीभिषक् श्रीकाञ्चीजगद्गुरुणानुगृहीतः
वेदसंरक्षकरत्न, विरुदभाक् डा० व० रा० लक्ष्मीकान्तशर्मा)

अयि भोः

(१)

विद्वांसः प्रभवः पवित्रचरिताः यस्यान्वये पूर्वजाः
वेदब्राह्मणपूजनेऽतिनिरताः ये दानशीला भुवि।
साङ्गब्रह्मकृते वितीर्णसकलस्वार्था उदाराश्च ये
तेषामंशभवो द्विजो विजयते श्रीस्वामिनाथाह्वयः॥

(२)

लोकः शुद्ध्यति भाषया विमलया गीर्वाणभूभूषया
सा भाषा किल संस्कृता च मधुरा नानारसैरुज्वला।
तन्मूला द्विजजीविकां ददति ये वेदाश्चिरं जीविन-
स्तेषामुच्चतमं हि साम भगवद्कृष्णस्वरूपायितम्॥

(३)

तत्सामप्रवणः सुसंस्कृतखनिः प्रज्ञाघनश्चाङ्गले
जीवातुः श्रुतिभारतीसकरुणापाङ्गादृतानां सताम्।
नैपुण्यं दृढगाढचिन्तनफलं तत्स्वामिनाथस्य यत्
तत् किं वर्णयितुं सहस्ररसनाभाजावनौ शक्यते॥

(४)

सन्त्येवास्य च भारतस्य बहवः कीर्तिप्रदा हेतवः
किंवा तैर्यदि नास्ति संस्कृतकला कीर्तिर्यया स्थाप्यते।
तादृक्संस्कृतगीर्विवर्धनविधौ नानाप्रकारोद्यमो
भाषां संस्कृतपण्डितांश्च कनकैरुज्जीवयन् राजते॥

(५)

औदार्यं किमु वर्ण्यते श्रुतिविदां प्रत्यक्षदेवात्मनो
ये ये सन्ति लसन्ति पूर्णयशसा जीवन्ति मेधाविनः ।
तेषां मूलमयं सभाश्च कति वा श्रीपाठशालाः कति
वाण्या येन विवृद्धये बहुविधा उद्धारिता भूतले ॥

(६)

संपूज्यः स्वामिनाथोऽयं सुवर्णसुमराशिभिः ।
वचोभिः केवलैरेव सुवर्णैरभिशास्यते ॥

○

कस्य नो हितचिन्तकाः !

(आचार्यं देवदत्तः, अम्बालास्थ-दीवानकृष्णकिशोरसनातनधर्मसंकृत-महाविद्यालयस्य, शास्त्रचूडामणिविशिष्टविद्वान्)

(१)

भारतसर्वकारस्य शिक्षामन्त्रालये रताः ।
स्वामिनाथन-नामानः कस्य नो हितचिन्तकाः ।।

(२)

शास्त्रानुशीलने दक्षाः सन्देहौघविनाशकाः ।
नानाबुधोपजीव्याश्च कस्य नो हितचिन्तकाः ।।

(३)

सम्यग्बुद्धिप्रदातारः शिक्षाक्षेत्रे ह्यनेकशः ।
भारतसर्वकारस्य कस्य नो हितचिन्तकाः ।।

(४)

यवीयसां कृपादृष्ट्या पूज्यानां चैव सेवया ।
मर्यादां खलु रक्षन्तः कस्य नो हितचिन्तकाः ।।

(५)

वृत्तिक्लिष्टसुविज्ञानां वृत्तिदानेन पोषकाः ।
निरालम्बसमालम्बाः कस्य नो हितचिन्तकाः ।।

(६)

हरिविरञ्चिहरा गिरिजा तथा
पवनगाधिसुतौ कमला च सा ।
शशिरवी बुधभौमशनैश्चराः
प्रतिदिनं शुभदाः विलसन्तु ते ।।

विविधविद्याविद्योतितान्तःकरणानां स्वाचारबद्धादराणां लोकव्यवहारनिपुणानां भारतसर्वकारस्य शिक्षामन्त्रालयान्तर्गतसंस्कृतस्य वरिष्ठाधिकारिणां ज्ञानवृद्धानां परमादरणीयानां श्रीमतां डा० "शास्त्रपुरम् रामकृष्ण (सी० आर०) स्वामिनाथन्-" महाभागानां सादरम्

अभिनन्दनम्

दैव्यां वाचि रतिः प्रसन्नवदनः काये भृशं कान्तिमान्
विद्यावान् विनयी नितान्तसरलो विज्ञेषु बद्धादरः।
सौम्यस्सत्यरुचिः सतां कुलमणिः शम्भोश्च भक्तौ रतः
जीयाद्वर्षशतं प्रहर्षवदनः "श्रीस्वामिनाथन्" सुधीः ॥१॥

वाचा कोमलया धिया सरलया जेतुं समर्थो जनान्
प्रज्ञावान् भुवि भूरिभूतिकरुणादानैकनिष्ठस्सदा।
व्याख्या - काव्य - निबन्धलेखनपटुर्वक्ता विपश्चिद्वरः
भूयाद्धर्षयुतः प्रसन्नवदनः श्रीस्वामिनाथन् बुधः ॥२॥

सत्ये धर्मसमस्सदा क्षितितले मूर्तिर्विवेकस्य यः
लोके संस्कृतवाङ्मयस्य विविधाः सेवा अकार्षीन्मुदा।
शक्तिर्मन्त्रबलेन यस्य सफला देहे सदा राजते
शास्त्रे दत्तमना सदा विजयते श्रीस्वामिनाथन् सुधीः ॥३॥

स्वामिनाथ! नमस्तुभ्यं विज्ञाय विबुधाय ते।
समर्प्यतेऽत्र वाक्पुष्पमुमारमणशर्मणा ॥४॥

डा. उमारमण झा

भव्यं व्यक्तित्वम् !

(डा० वि० वेङ्कटाचलम्, आचार्यः अध्यक्षश्च, संस्कृतविभागः,
विक्रमविश्वविद्यालयः, उज्जैन)

कालिदासीयं 'शालप्रांशु'पदं स्मारयद् अतिशयोन्नतं शरीरम् ! 'सद्योमुण्डितमत्तहूणचिबुकप्रस्पर्धि' नारङ्गफलं स्मारयन्ती देहकान्तिः ! 'क पातिव्रत्यं शिथिलयति रम्येण वपुषा' इति भगवत्पादीयां सौन्दर्यलहरीसंभाव मीषदुपस्थापयत् सुन्दरं मोहनं रूपम् ! तरलभास्वरे नयनतारे अन्धतमसदी मानहीरकयुगलस्य 'रत्नच्छायाव्यतिकर' गाथामिव कथयन्त्यौ ! किमन्य शिष्यते चतुरश्रशोभायाः ? 'मधुराधिपतेरखिलं मधुरम्' इत्यस्य कापि लघी रेखा ! मन्ये पर्याप्तमियन्मात्रमेव संक्षेप्तुं डॉ० स्वामिनाथस्य बाह्यमाकार

आन्तरं च रूपमस्यैव बाह्यस्य कापि प्रतिच्छाया । 'यत्राकृतिस् गुणाः' इति न वितथा वाचोयुक्तिरभिज्ञजनानाम् । किं नाह स्म ऋषिक कालिदासोऽपि 'पापवृत्तये न रूपमित्यव्यभिचारि वचः' 'न तादृशी गु विरोधिनी आकृतिः' इति ?

परमस्य महाभागस्य शिरीषकेसरायमाणेषु गुणेषु केसरद्वयमीषच्चुम्ब मीहते लेखनी ममात्र । 'ईषदीषच्चुम्बितानि' इति भ्रामरीं वृत्तिं परिजिघृक्ष तत्र द्वयचयने कारणम् ? उभयमिदं किञ्चिदसाधारणमिति ।

तत्र वैदिके धर्ममार्गे तदाधारभूते संस्कृते च निरूढा कापि श्रद्धा प्र गुणः । दारिद्र्यपीडितेषु परमशिष्टेषु विपद्गतेषु पण्डितेषु या स्नेहसमा दृष्टिरस्य महानुभावस्य सा हि नाम एतस्यैव श्रद्धापौष्कल्यबीजस्य परि फलायते । श्रीकाञ्चीकामकोटिपीठाधीश्वराणां परमाचार्याणां निकटानु भागधेयमनेन समासादितमितीयदेव पर्याप्तमेतदुपबृंहणाय ।

द्वितीयस्तु गुणः प्रथमादेव प्रसूतः । आधिकारिककार्यजातनिर्वहणे लोकोत्तरा निर्भीकता । या कापि ध्रुवा मतिरात्मनीना तस्याः क्वापि प्र

न संकोचो, न भयकम्पो वा। भवतु सा पण्डितानां परिषत्, भवतु वा सा उच्चाधिकारिणां (पण्डिताभिन्नानां ?) समितिः यत्रायमलिखितो नियमः सर्वत्र प्रायशो वज्रलेपायते अधस्तनपदस्थैः उच्चेभ्यः सर्वत्र 'भेतव्यं, भेतव्यं, भेतव्यम्' इति ! किन्तु—

"अभिनवमदरेखाश्यामगण्डस्थलानां
न भवति बिसतन्तुर्वारणं वारणानाम्।"

तदियमीदृशस्य सुहृदः उदर्कभूतिमिच्छतो मे प्रार्थना—

राजधानीस्थया देववाणीश्रिया
श्रद्धया स्नेहतः सादरं मानितः।
स्वामिनाथः शिवानुग्रहादेधतां
प्रेयसां श्रेयसां भूयसां भाजनम्॥

Dr. C.R. Swaminathan : A Real Scholar

(Prof. N.H. Ansari, Department of Persian,
University of Delhi, Delhi—7)

I had an opportunity to come in contact with Dr. C. R. Swaminathan a few years ago in connection with the publication of our Persian Research Journal BAYAZ. I was told by my teacher Prof. S.A.H. Abidi that Dr. Swaminathan is the Head of the Department which gives grant for the promotion of classical languages including Persian. Before I saw Dr. Swaminathan I had the vage impression that he would be a bureaucrat. But my meeting with him was very pleasing because of his academic approach, openheartedness and scholarly attitude. Dr. Swaminathan is basically a scholar and an academician. Like the old scholars of India he has dedicated his life to the noble cause of promoting knowledge specially through the medium of classical languages. He has the same love for Persian and Arabic as he has for Sanskrit. His office was always ready to welcome any scholar at any time without any prior appointment. The social status of a scholar did not matter for Dr. Swaminathan. For him a scholar is a scholar whether he was holding a high post in the University or working as an ordinary teacher in a Pathshala.

Though it seems personal, yet I must put on record that because of the keen interest of Dr. Swaminathan and his liberal attitude the Persian Research Journal 'Bayaz' is on solid footing and it has won appreciation from the scholars of Persian throughout the world.

Persian and Sanskrit belong to the same family of languages. The literary traditions in both languages have much in common. India has always been looked upon as a treasure

house of wisdom and knowledge by the Persian scholars. The classical Sanskrit works which were translated into Persian during the reign of Akbar were widely apprecited throughout the Persian world in those days and even today any Persian translation from Sanskrit classics is most welcome in Iran and Afghanistan.

The scholars of Persian and Sanskrit through their mutual co-operation and inter-disciplinary contribution, can play a very vital role in keep alive the cultural and literary traditions propounded by the great scholars of Persian and Sanskrit among whom Dr. Swaminathan enjoys an honourable position.

●

शुभाशंसा

(श्री बी० आर० शर्मा, मैसूरः, कर्नाटकः)

केन्द्रशिक्षामन्त्रालये संस्कृतविभागस्य प्रायशः प्रादुर्भाव-दशायामेव संस्कृत- प्रचारयोजनाकार्ये अनवरतं व्यासक्तेन डा० सी० आर्० स्वामिनाथशर्ममहा-भागेन संस्कृतस्य पुनरुज्जीवनाय, संरक्षणाय, परिवर्धनाय च यद् योगदान-मकारि तद्धि सुलभतया विस्मतुं न शक्यते । केन्द्रीयसंस्कृतविद्यापीठान प्रतिष्ठापन-संघटनादिकर्मसु समापन्नानां कृच्छ्राणां कार्यकलापानां गहना समस्याः सम्यक् समालोड्य संस्कृतस्य सततपुरोगतये यैः शुभोदर्काः निर्णया कृतास्तेषु व्यवहापटुः स्थिरबुद्धिः डा० स्वामिनाथमहाभागः अन्यतमः । के च पुण्येन कर्मणा विद्याविनयसंपन्नेन केन्द्रशिक्षामन्त्रालयस्य कर्मचारिवरिष्ठेना-नेन संस्कृताभिमानिनः सर्वे वयं सत्यमधमर्णाः कृताः ।।

प्रसन्नवदनोऽयं कार्यालये समागतानां जनानां समस्याः समगवच्छ समुचितं कार्यनिर्वाहं कुर्वाणः चिरं समेषां मनसि विलसति । बहुभाषापटोरस्य सुमधुरं भाषणम्, - भवतु तत् संस्कृते, हिन्द्याम्, आंग्लेय्यां, कैरल्यां, द्राविड्यां अन्यस्यां यस्यां कस्यांचिद्वा भाषायां—, यद्येकदा श्रुतं भवेत् तत् सर्वं मनसि चिरमनुरणेदेव ।

श्रीमान् डा० सीर० आर० स्वामिनाथशर्ममहाशयः संस्कृतस्येतादृशीं सेवां कुर्वन् चिरमायुरारोग्यसंपन्नो विलसत्विति भगवन्तं परमात्मानं प्रार्थये ।।

इति शम् ।।

आशंसा

(प्रो० पी०सी० वासुदेवन् एलयत्, काक्कासेरी, केरल)

शास्त्रे विस्तृतयुक्तिजालजटिले
सौन्दर्यसारात्मके
साहित्ये च समं विहारचतुरा
प्रज्ञा यदीयाऽद्भुता ।
सम्प्राप्तामलकीर्तिपूरितदिशः
श्रीस्वामिनाथाभिधः
सोऽयं भारतभागधेयमहिमा
नित्यं विजेजीयताम् ।।

अभिनन्दनोक्तिः

(प्रो० एन०एस० रामानुजताताचार्यः, केन्द्रीयसंस्कृतविद्यापीठम्, तिरुपति)

अस्मिन् भारतदेशे प्रायः सर्वेऽपि संस्कृतक्षेत्रे कर्म कुर्वाणाः जानन्ति सम्यक् परिचिन्वन्ति च डॉ० सी० आर० स्वामिनाथन् नामकं व्यक्तिविशेषम्। तत्र मूलकारणं तु अयं व्यक्तिविशेषः स्वतः विद्वान् प्राच्यपाश्चात्यविज्ञानसंपन्नः सहृदयः उपकारशीलश्च सन् केन्द्रशासने शिक्षामन्त्रालये देशव्यापिनः संस्कृत-कार्यस्य प्रचालनाय उपकल्पितं मुख्यतमं स्थानमतीतपञ्चविंशतिवर्षेभ्यः अधितिष्ठतीत्येतदेव।

एते हि स्वामिनाथन् - महाभागाः आबाल्यात् ममात्यन्तं परिचिताः। त्रिंशद्वर्षेभ्यः प्राक् यदाहं मद्रपुरीयहस्तलिखितपुस्तकभाण्डागारे संस्कृतपण्डित-पदमध्यतिष्ठम् तदानीम् उपपुस्तकालयाधिकारिपदं वर्षद्वयमध्यतिष्ठन्। तदात्वे एतेषां साहित्यशास्त्रे निष्णाततां कवितारचनाचातुरीं च वारं वारं साक्षात्-करवम्। विशिष्टपण्डितानां सविधे तदानीमेतैः व्याकरणम् अद्वैतवेदान्तशास्त्रं चाधीते। तस्मिन् समये काञ्चीकामकोटिमठाधीशाः तपस्वितमाः श्रीमच्चन्द्रशेखरेन्द्रसरस्वतीश्रीचरणाः मद्रपुर्यां कतिपयान् मासान् स्थित्वा प्रतिदिनं रात्रौ नववादनात् परम् उपदेशरूपमुपन्यासमकुर्वन्। सहस्राधिकाः जनाः निःशब्दाः सन्तः सभक्तिश्रद्धमुपदेशं शृण्वन्तः ब्रह्मानन्दसागरान्तर्निमग्न-सर्वावयवाः अभवन्। ते हि नो दिवसा गताः। तदा प्रतिदिनं स्वामिचरण-कृतस्योपन्यासस्य सारांशमेते स्वामिनाथन् - महाशयाः पद्यरूपेण विरच्य मादृशान् श्रावयेयुः। वर्षद्वयानन्तरमेते स्वामिनाथन्-महाभागाः गवर्न्मेण्ट्स्-आर्ट्सकलाशालायामध्यापकपदमधिष्ठाय ततः दिल्लीस्थशिक्षामन्त्रालये नियुक्ताः तद्व्याजेन विश्वव्यापकसंस्कृतप्रचारकार्यं कुर्वन्तः सन्तीति सर्वे जानन्त्येव। शासकानामुद्दिष्टानि कार्याणि समर्थ एव अधिकारी कर्तुं शक्नोति। समर्थाधिकारिविरहात् कदाचित् उद्दिष्टानि कार्याणि यथावन्न प्रचलन्तीत्यपि वयं बहुत्र संस्थासु पश्याम एव। एतेषां पदस्थितिकाले संस्कृतस्य यानि यावन्ति प्रचारकार्याणि संपन्नानि तानि असंख्यानि। वेद-

संरक्षणार्थं शास्त्ररक्षणार्थं च बह्व्यो योजनाः कृताः । बहवः प्राचीनपण्डिताः उपकृताः । बह्व्यः संस्थाः पुनरुज्जीविताः । नूतनाः संस्थाः प्रादुर्भाविताः । किमधिकमस्ति वक्तव्यम् । सर्वोऽपि संस्कृतलोकः एतेषां नाम व्यक्तित्वं च सर्वदा स्मरति ।

एतेषां संस्कृतप्रचारकार्यविशेषान् अभिनन्दन्तो वयम् रमाजानिं श्रीवेंकटाचलाधीशं भगवन्तं प्रार्थयामहे यदेतं अरोगदृढगात्राः सन्तः शतमायुः प्राप्य संस्कृतसेवापरायणाः जीयासुरिति ।

साहित्यवेदान्तनितान्तनिष्ठ.
गीर्वाणवाणीसमुपासकोऽसौ ।
श्रीस्वामिनाथः परिवारयुक्ता
जीयाच्छतायुर्विबुधाग्रगण्यः ॥

★

स्वामिनाथो विपश्चित्

(डा० इच्छाराम द्विवेदी, महासचिवः, सुरभारती-सेवा-संस्थानम्, मैनपुरी)

धन्या केरलभूमिः यस्यां जातानि शुभ्रपद्मानि ।
स्वीयैः सौरभगन्धैः, भारतराष्ट्रं सुवासयन्ति ॥१॥

वेदे वेदांगजाते सततमननकृत्सर्वशास्त्रेषु दक्षः,
विज्ञानां क्षेमकर्ता कविरवचसां रक्षणे बद्धकक्षः ।
राष्ट्रस्योत्थानकर्ता प्रचुरगुणगणालङ्कृतो लब्धकीर्तिः
सोऽयं जीव्याच्चिरायुर्गुणिगणमहितः स्वामिनाथो विपश्चित् ।२।

रम्या या देवभाषा ललितरसमयी वेदशास्त्रादिरूपा,
आकल्पान्तं प्रकामं जगति वितनुते ज्ञानधर्मप्रचारम् ।
तां वाणीं सेवमानो व्रतनियमपरो विद्वदान्ददायी
सोऽयं जीव्याच्चिरायुर्गुणिगणमहितः स्वामिनाथो विपश्चित् ।३।

जातो ब्रह्मकुले सुकीर्तिमहिते दिव्यैर्गुणैर्मण्डितः
पुण्यश्लोकपितुः सकाशमखिलं शास्त्राशयं लब्धवान् ।
त्वं विद्वन् ! सुरभारतीपदरतो विद्यावतामग्रणीः
दिष्ट्या नः परिवर्धसे महिमभिः कीर्तिप्रभाभासुरः ॥४॥

स्वामिनाथ ! गुरो ! ब्रह्मन् ! शिष्येषु करुणापर !
देववाणीप्रचारार्थं शतं जीव्याः अतन्द्रितः ॥

क्रियासिद्धिस्सत्त्वे भवति महता नोपकरणे

(शास्तृल विश्वनाथ शर्मा, शिवम्पेट, आन्ध्रप्रदेश:)

अघटितघटनापटीयसी भगवतो माया किल केन प्रकारेण कञ्च वा पुरुषं कस्मिन्नसाधारणकर्मणि नियमयति भगवानिति।

वेदाध्ययनाऽध्यापनसम्प्रदाये उत्सन्नप्राये ऋग्यजुस्सामाऽथर्वाख्यस्य-भीमस्य ब्रह्मणो रक्षणाय समग्रं भारतदेशं तत्र तत्र पर्यटनं विधाय, संकलय्य च संप्रदायान् तत्परम्परापरिरक्षणाय सुदृढ: प्रयत्न: केन वा क्रियते। असाधारणसंकल्पवलम् अपूर्वभगवच्छक्त्यनुप्रविष्टं ब्रह्मश्रीस्वामिनाथमहाभागं विना।

राजकीयोद्योगिनो पुरुषधौरेया: कति वा न सन्ति स्वे स्वे कर्मण्यप्रमत्ता:। किन्तु इयं सा उद्यागपरिरक्षणचातुरी नानासम्प्रदाय-परिज्ञानवैखरी तत्तद्देशभेदेन भिन्नानां वेदाध्ययनाध्यापनसरणीनामन्तस्तलं क्लेशनिमग्नेन समीक्षणं यथा-यथं पुन: परिरक्षणमित्येतदसाधारणं कर्म तत् श्रीस्वामिनाथमहाभागस्यैव नान्यस्य पुरुषसाधारणस्य।

कदाचिद्वैदिकमहासम्मेलने देहल्यां संपन्ने नानाराजकीयनेतृमण्डले वेदा-ध्ययनाऽयापनसम्बन्धे वाग्वैखरीं श्रीस्वामिनाथमहाशयानां परिशीलयतां विदुषां सा प्रामाण्यशेमुषी, सा निर्दाक्षिण्यनिर्भीकमेघगंभीरनिर्घोषवाग्वैखरी रामायणे रावणसमक्षं कृतस्य श्रीमद्भगवतो हनूमत: वाग्वैखरी ज्ञापयतीव।

सुविशालेऽस्मिन्नासेतुशीताचले भारते कस्य वेदस्य शाखा अनादिपरम्परया-ऽधीयमाना सांप्रतं लुप्तप्राया वर्तते, तस्याश्शाखाया: कस्य पुरुषधौरेयस्याऽवलम्ब-नेन, सा पुनरुज्जीवयितुं शक्यते— इत्येतद्विषयकं सफलं समीक्षणं श्रीस्वामिनाथ महाभागस्यैव, नान्यस्य मादृशस्य पुरुषसाधारणस्य।

करालकलिकालेऽस्मिन्वेदभगवति गभस्तिमालिनि निम्लोचति पुनरुदीयमान-वेदशाखानां भेदा: परिदृश्यमाना: कं वा आस्तिकलोकं आश्चर्यचकितं विदधीरन्। एतत्पर्यालोचनया—श्रीस्वामिनाथमहाभागा:—

"यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छत त्वं मम तेजोंऽशसंभवम्॥"

इत्येतश्लोकार्थस्योदाहरणभूता इति निश्चप्रचम्।

संस्मरणम्

(विद्यावाचस्पति डा० उमारमणझा,
न्यायाचार्यः, एम०ए०, पीएच०डी०, डी० लिट्०, दर्शनविभागाध्यक्ष,
श्रीरणवीर केन्द्रीय संस्कृत विद्यापीठम्, शास्त्रीनगर
जम्मूतवी, १८०००४)

विविधशास्त्रमर्मज्ञानां विद्वत्तल्लजानां डा० सी० आर० स्वामि महाभागानां सम्पर्केऽहं सप्तदशवर्षेभ्यो यदा कदा सान्निध्यं सम्प्राप्य तेषां किञ्चित्प्रकटीकर्तुमीहे ।

१९७१ ई० समये केन्द्रीय संस्कृतविद्यापीठे तिरुपतिनगरे प्रवक्तृणां विभागीया प्रोन्नतिः प्रदातव्याऽसीत् । तदानीं ज्ञानवृद्धाः वेङ्कटराघवा (तत्रत्याः प्राचार्याः) एवं च इन्द्रप्रस्थात् विशेषज्ञरूपेण डा० सी०आर स्वामि महाभागास्तत्र सम्प्राप्ता आसन् । विशेषज्ञरूपेण सन्तोऽपि ते व्याकरण-सा दर्शनादिशास्त्रेषु स्वकीयं पाण्डित्यं प्रकटीचक्रुः । साहित्ये मम्मट-जग दिमतविषये व्याकरणे पतञ्जलिनागेशभट्टादिविषये दर्शने न्यायवेदा शास्त्रेषु च तेषां प्रश्नान् श्रुत्वा मध्ये मध्ये तेषां समाधानमपि कर्णगोच वयं प्रत्याशिनश्चकितचकिता अभवाम । अहं यदा प्रवक्तृपदे तेषां सम्प्राप्तस्तदानीं तेन न्यायशास्त्रे प्रश्नो विहित-"उदयनाचार्येण न्या माञ्जलौ ईश्वरसिद्धौ सापेक्षत्वादनादित्वादित्यस्याः कारिकायाः कथं कृतोऽस्ति" इति । पुनश्च न्यायसूत्रे अपवर्गविषये हेत्वाभासविषये च समुपस्थाप्य यथोचितं समाधानमपि पाण्डित्यपूर्णेन मार्गेण तैः व्यधायि । स्तेषां पाण्डित्यं प्रतिभां च दृष्ट्वा तत्रत्याः विद्वान्सः प्रसन्नाश्च आसन् ।

× × ×

एकदा १९७३ ई० समये केन्द्रीय - संस्कृत-विद्यापीठस्य निरीक्ष तिरुपतिनगरं गता आसन् । अहं तत्र तदानीं छात्रावासाध्यक्ष छात्रावासे तेषां कृते स्वागतव्यवस्थापि कृताऽसीत् । मयैव सरलया

भाषया तेषां स्वागतमकारि। सम स्वगतश्लोकान् स्वागतभाषणञ्च श्रुत्वा तैः मुक्तकण्ठेन धन्यवादो विहितः। तदानीं छात्रा अपि तेषां कोमलसरलभाषणेन मुग्धा इव अभवन्। तेषां कृते भोजनव्यवस्था अपि तद्दिने तत्रैव कृताऽसीत्। भोजनसमये वैदिकपाठपुरस्सरं तैरुक्तं "सर्वे छात्रा अपि अधुनैव भोजनं कुर्यु" रिति। तस्मिन्नेव वृहत्प्रकोष्ठे सर्वेषां भोजनं यदा आरम्भणीयमासीत् तदानीं तैरुक्तं यत् सर्वेभ्यः छात्रेभ्यः समानरूपेणैव सर्वं वितीर्यं भोजनं कर्त्तुमीहे। डा० स्वामिनाथन्-महाभागाना कृते काचित् मिष्टान्नादिसाहिता विशिष्टा व्यवस्था आसीत् किन्तु सर्वं समानरूपेण छात्रेभ्यो वितीर्यं प्रसन्नाः सन्तः ते भोजनमकार्षुः। ईदृशी तेषां लोकप्रीतिः छात्रप्रीतिश्च वर्तते।

× × ×

विश्वसंस्कृत - सम्मेलनावसरे अखिलभारतीय - प्राच्यविद्यासम्मेलनेषु च प्रायः सर्वत्र एते महानुभावाः सर्वैः सौहार्दपूर्णं व्यवहारं व्याहरन्तः अद्भुतं लोकस्नेहं सम्प्रदर्शितवन्त इति स्मर्यते।

× × ×

१९८५ ई० समये जनवरीमासस्य सप्तमतालिकातः नवमतालिकापर्यन्त राष्ट्रिय संस्कृतसंस्थाने प्रवाचकानां प्राध्यापकानाञ्च प्रोन्नतिविषये अन्तर्वीक्षा अभूत्। तत्र पण्डितबदरीनाथशुक्लमहोदयाः, डा० आद्याप्रसादमिश्राः, डा० मण्डनमिश्राः, डा० सी० आर० स्वामिनाथन् - महाभागाः अन्ये च विशेषज्ञाः समुपस्थिता आसन्। मया यदा तेषां पुरतः न्यायवैशेषिकदर्शनस्य चर्चा विहिता तदा झटिति तैः "तद्वचनादाम्नायस्य प्रामाण्यम्" इतिवैशेषिकसूत्रंमुपस्थाप्य प्रशस्तपादभाष्यरीत्या व्याख्यानं क्रियतामिति उक्तम्। मया समाधानं कृतम्। तेऽपि प्रसन्ना सन्तः तूष्णीं तस्थु। तत्र तेषां प्रत्युत्पन्नमतित्वं पाण्डित्यञ्च मयाऽनुभूतम्।

× × ×

१९८५ फरवरी मासे ११, १२, १३ तारिकासु जयपुरे अखिलभारतीय-शिक्षा-सम्मेलनमासीत्। तत्र उपराष्ट्रपतिः लोकसभाध्यक्षः अन्ये च मन्त्रिणः समागता आसन्। एते डा० स्वामिनाथ-महाभागा अपि पुरस्कृताः, उपराष्ट्रपति महोदयाना करकमलभ्यः पारितोषिकञ्चापि लेभिरे। दिल्ली-जयपुरमार्गे एकस्मिन् अतिसुरम्ये ललिते स्थाने (होटलविशेषे) काफीपान - समये सहसा तेषां दर्शनमभूत्। अकस्मात् डा० मुरलीधर पाण्डेया अपि तत्रैव समाजग्मुः। मया उभावधिकृत्यक्तम्-सतां मद्भिः सङ्गः कथमपि हि पुण्येन भवति। तदानीं

डा० स्वामिनाथन् महाभागैरुक्तम् "कथमपि हि वित्तेन (द्रव्येण) भवती... तत्स्थाने काफीपानस्य मूल्यमत्यधिकमासीदिति कृत्वा तेषां वचनं श्रुत्वा वयं हास्यरसविलीना सन्तः पुनरग्रे गन्तुं समारब्धा अभवाम।

× × ×

'लक्ष्मीसरस्वत्योर्विवादः' मया अनूद्य प्रकाशितः। दिल्लीनगरे ... भवने शिक्षाविभागं गत्वा यदा ग्रन्थः तेभ्यः समर्पितस्तदा प्रसन्नाः सन्तः ... दृश्य "उमारमण-रमारमण" इत्यादि श्लोकं झटिति निर्माय प्रशंसामकुर्वन्। इयं तेषां कवित्वशक्तिरस्ति। एवं प्रकारेण बहुत्र तेषां पाण्डित्यं लोके ... ष्वञ्चानुभूतम्।

× × ×

एकदा अहं तेषां गृहं (करोलबागस्थितं) सम्प्राप्तः। तदानीं ... आसने समुपवेश्य स्वयं सामान्यस्थले उपविष्टाः सन्तः अस्माकं सत्कारं कृतवन्तः इत्यस्ति तेषां समुचितः लोकव्यवहारः।

अतः डा० सी० आर० स्वामिनाथन् महाभागाः - विद्याविनयसम्पन्नाः संस्कृतस्य संरक्षणे कटिबद्धाः सन्तः यशस्विनः शतायुषश्च भवन्त्विति शम्।

सुरभारतीसेवापरायणस्य, कृतवैदिकधर्मोद्धारस्य, संस्कृत-वाङ्मयविदुषः, परोपकारपरस्य, दक्षिणाशावधूविशेषकस्य, श्रीस्वामिनाथन् - संज्ञाजुषो विदुषः कर-कमलयोः समर्पितमिदम्

अभिनन्दनपत्रम्

वरेण्य,

सर्वं भवदीयं जीवनं सुरभारतीसेवायै समर्पितं वर्तते। तत्रभवानहर्निशमविरतं तस्या उद्धाराय प्रयतते। जीवनस्योषःकाले महान्तं क्लेशमविगणय्य भवता सर्वं संस्कृतवाङ्मयं विविधविद्याभास्वरेभ्यस्तपोनिधिभ्यो गुरुभ्योऽधीतमनुशीलितञ्च। न केवलमलङ्कारग्रन्थेषु मधुरोक्तिरम्यराजीवेष्विव सरःसु, रम्यासु काव्यरचनास्ववगाहनहृद्यासु सरसीष्विवापितु दुरूहेषु व्याकरणादिषु शास्त्रेषु दुरवगाहेषु नदेष्विव, भवन्मनोराजहंसः समं तरीतुमर्हति, पश्यतां च प्रीतिं जनयति।

सुरभारतीसेवापरायण,

भवता संस्कृतस्य या सेवा कृता सा नितरां प्रशंसनीया वर्तते। बहून् ग्रन्थान् प्रणीय, नैकानि काव्यानि विरचय्य, विविधानि गवेषणापराणि भाषणानि च सभासु प्रदाय भवताऽनेके जनास्तोषिता उपकृताश्च। संस्कृतमधीयानेभ्यश्छात्रेभ्यो वृत्तिम्, संस्कृतपण्डितेभ्यः साहाय्यम्, देशे विविधेषु स्थानेषु संस्कृतस्य पाठशालानां परिषदाञ्च स्थापनम्, पारेसमुद्रं विदेशेष्वपि संस्कृताध्ययनार्थं लोकस्योद्‌बोधनञ्चेत्यादीनि भवतस्तथाविधानि कार्याणि सन्ति यानि सर्वैः संस्कृतानुरागिभिः सर्वत्राभिनन्दितानि।

आदर्शकर्मयोगिन्,

भवान् सुखासक्तिं विहाय सततं लोकसेवाव्रतं निर्वहति । अस्मिन्नेव … भवान् 'लालबहादुरशास्त्रिसंस्कृतविद्यापीठस्य' प्राचार्यपदेन, शासने सहायकशि… परामर्शदातुः पदेन, उपशिक्षापरामर्शदातुः पदेन, भारतस्य नेपालदेशे सांस्कृ… सचिवपदेन च देशं चिरमसेवत तत्कीर्तिञ्चाशास्वतनोत् ।

वयं सर्वेऽत्रत्या अध्यापयितारोऽध्येतारश्च भवतोऽनेनाभ्युदयेन नि… मोदामहे, भगवन्तञ्च प्रार्थयामहे यत्स भवत उत्तरोत्तरमभ्युदयमायुष्यं … कीर्तिञ्च वितरेदिति ।

वयं स्मः

श्री एकरसानन्द-संस्कृतमहाविद्यालयी…

२५-३-८५ अध्यापकाश्छात्राश्च

श्रीः

डा० सी०ग्रार० स्वामिनाथमहाभागेभ्यः वितीर्णम्

ग्रभिनन्दनपत्रम्

माननीयाः श्रीमन्तः स्वामिनाथमहाभागाः !

महदिदं अस्माकं भागधेयम् यदद्य अविरतसुरभारती-सेवारसनिष्यन्द-सुक्षालितविश्वविश्वम्भरामण्डलानां प्रवचनचातुरीचाकचक्यविमोहितमानव-मानसानां भारतीयसंस्कृति-आधारभूतसंस्कृतपरिरक्षणविचक्षणानां तत्र-भवतां अत्रागमनं, तदनु अस्मदातिथ्यस्वीकरणं, तथा भवतां संमुखे हार्दिक-धन्यवादप्रकाशनाय अवकाशलाभः इति ।

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भः आरम्भसदृशोदयः ॥

इति महाकविवचनस्य लक्ष्यभूताः अप्रतिमप्रतिभाप्रतिभासमानाः उदात्त-चरिताः !

भारतस्य कोणे कोणे 'आदर्शसंस्कृतमहाविद्यालय' - विद्यास्थानस्थापन-प्रचालनप्रचोदन - तत्संवर्धनपरिरक्षणकार्यकलापप्रवर्तनेन सुरभारतीसेवासंलग्न-मनस्काः एवं चतुर्वेदपाठशालापुनरुद्धारणपरिरक्षणविचक्षणाः, प्राचीनसंस्कृत-ग्रन्थानां पुनः प्रकाशनप्रसारणनैकविधसंस्कृतसेवाबद्धादराः, वेदविदां संस्कृत-पण्डितानां भारतीयसर्वकारद्वारा द्रव्योपकारसभाजनविधया, साक्षात् परम्परया च शास्त्रसंरक्षणदक्षाः, ज्ञानवृद्धानां वयोवृद्धानां संस्कृतज्ञानां योगक्षेममभि-लक्ष्य, तेषां कृते द्रव्योपकारप्रबन्धपरिष्करणे कृतावधानाः,

व्यूढोरस्को वृषस्कन्धः सालप्रांशुः महाभुजः ।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ॥

इति कविवचनस्य आदर्शभूताः चकासति । अपरः परशुरामोऽयम् ।

परशुरामक्षेत्रे पालक्काट् नगरे पण्डितमण्डलपरिवृते चात्तपुरे परिशुद्धे कार्यकारकुले उत्पन्नोऽयं सामगः सामोपायेन स्वकीये सकले संरम्भे सिद्धहस्तः,

संस्कृतपुनरुज्जीवने विततारम्भयत्न:, सततानुषक्त:, विमलान्तरङ्ग: कमला-
कटाक्षसंपन्न: करुणार्द्रमना: कलिताशेषकला: अटिताशेषदेश:, सभायां विरा-
मानोऽयं महाभाग:

अग्रतश्चतुरो वेदान् पृष्ठत: सशरं धनु: ।
इदं ब्राह्ममिदं क्षात्रं चापादपि शरादपि ।।

इति उक्ति सार्थकयन् अस्माकं आनन्दं उत्पादयति । अन्तत: धन्यवा-
समर्पणेन सिद्धार्था वयं विरमाम: ।

इत्थं
निर्वाहका:
संस्कृतविद्यासमिति:, मदरास् ।
श्री चन्द्रशेखरेन्द्रसरस्वतीन्यायशास्त्रविद्यालय:, काञ्चीपुरम्
२४-३-८५ श्रुतिस्मृतिपुराणप्रकाशन-समिति:, मदरास् ।

श्रीमतां विद्याविद्योतितान्तःकरणानां काव्यशास्त्रविनोद - क्षणा-न्वेषणतत्पराणां समधीतसर्वदर्शनेषु वेदान्तदर्शन-सूक्ष्मविचारपरिशीलन-प्राप्तानन्दविशेषाणां विहितभारतीयसंस्कृति-संस्कृतवाङ्मय-संरक्षण-प्रचारप्रसार-निमित्तकानेकाद्वितीयकार्याणामार्याचारपरिपूतानां रचिता-नेककाव्यानां शास्त्रीयरहस्योद्घाटनसक्षमसमीक्षा-पटूनां स्वकर्तव्य-पालनजागरूकाणां शिक्षामन्त्रालयेऽलङ्कृतसंस्कृतोपशिक्षापरामर्शका-स्पदानां महोदारचरितानां

डा० सी० आर० स्वामिनाथन् महोदयानां

करकमलयोः सौप्रस्थानिकम्

अभिनन्दन-पत्रम्

अयि अखिलमानवधर्ममूलवेद-संरक्षणजागरूकप्रहरिणः !

श्रुतिपरम्परयाधीतवेदा एव यथायथं मन्त्रद्रष्टृ-ऋषिकृतमन्त्रोच्चारणं सस्वरं कर्तुमर्हन्ति। स्वरतो विरहितानां विपर्यस्तानां च मन्त्राणामध्ययनमपराधः। साम्प्रतं तादृशा वैदिका विरलाः सञ्जाता इति तादृशं च वेदाध्ययनं दिनानुदिनं क्षीयमाणं विलोक्य चिन्ताकुला भवन्तः समस्ते देशे वेदपाठशालाः संस्थापितवन्तः। तत्र ब्रह्मचारिणो बटवो वेदान् सस्वरमधीयाना भवत्प्रयत्नेन प्राप्तसौविध्या नष्टप्रायमिमं ज्ञानविज्ञान-मानवधर्मनिधिं गोपायन्ति। प्रतिवर्षं च वैदिकसम्मेलनमायोज्य पुरस्कारव्यवस्थां विधाय वेदाध्यापकाध्येतॄणां योगक्षेमाय यथा भवन्तोऽयतन्त, तथा नान्यः कोऽप्ययत्वे। कार्यमिदं जगद्गुरु-शङ्कराचार्यपीठलब्धप्रसादाशीर्वादवतां भवतां कीर्तिं गायति गास्यति च सर्वदा सर्वतोभावेन।

अयि भोः करुणापरायणाविद्वद्वल्लभाः

अभावग्रस्तपण्डितानां निर्धारिता सहायताऽल्पीयसीति सर्वप्रथममधिकारिषु भवद्भिरेवानुभूतम्।

किञ्च तां सहायतां दिवङ्गीततादृशपण्डितभार्यापि लभतामितीदृशी भावना भवतामेव मनसि सर्वप्रथममजागरीत् । यैः पण्डितैः सर्वविधान्यादृशजीवन-सुखान्यविगणय्य वेदादिशास्त्रं संरक्षितं तेषां कृते तत्परिवारसदस्यानामभाव-ग्रस्तानां च कृते प्रजातन्त्रीयसर्वकारस्यापि किमपि कर्त्तव्यमस्तीति समाज-कल्याणशिक्षामन्त्रालयस्यापि ध्यानं भवद्भिरेवाकृष्टं तदर्थं चानवरतं महान्तं प्रयत्नं विधाय तदर्थमपि साहाय्यं सञ्चालितम् । इदं द्वितीयमपूर्वं कार्यं भवदीयामौचित्यचिन्तनभावनां सदयहृदयतां तस्या कार्यान्वययोग्यतां च सूचयति ।

संस्कृतस्तरसमुन्नयनकृतप्रयासाः !

भवदीयं तृतीयं कार्यमस्ति समस्ते देशे आदर्शपाठशालास्थापनाप्रयासः। यथा केन्द्रीयविद्यालया शिक्षणप्रशस्तपद्धतित्वात्प्रशस्यन्ते तथैवैते आदर्शविद्यालया अपि संस्कृतस्य परम्परीणपरोवरीणोभयविधपद्धतिसमवेता वस्तुत आदर्शभूताः।

साम्प्रतिकाः संस्कृताध्यापका न तथा शास्त्रप्रौढिं भजन्ते यथा प्राचीनाः संस्कृतविद्वांस इति दिदानुदिनं क्षीयमाणं संस्कृतशास्त्रज्ञानं विलोकं विलोकं सर्वे संस्कृतानुरागिणश्चिन्तिता आसन् । तेषां चिन्ताशमनोपायश्चूडामणिपरियोजना भवतामेवोद्भावना। अस्यां परियोजनायां वहवो ज्ञानवृद्धा विद्वांसो भवद्भिस्तत्र तत्र महाविद्यालयेषु विश्वविद्यालयेषु आदर्शपाठशालासु विद्यापीठेषु च नियुक्ताः । तेभ्योऽधीत्य साम्प्रतिकाः शिक्षकाः स्वसंशयं दूरीकुर्वन्ति, ज्ञानपिपासां शमयन्ति, पाण्डित्यप्रौढिं चाधिगच्छन्ति । इदं चतुर्थं कार्यमपि भवदीयमनुपमं यशो यावच्चन्द्रदिवाकरं प्रख्यापयिष्यति ।

हंहो संस्कृतवाङ्मयग्रन्थानां जीवनदातारः सुलम्भयितारश्च !

दुर्लभग्रन्थप्रकाशनं कारयित्वा भवद्भिर्महदुपकृतं संस्कृतजगत् । निर्णय-सागर-प्रकाशनं यथा संस्कृतवाङ्मयविविधभेदप्रभेदानुविद्धत्वात् परिपूर्णं तथैव स्वविशुद्धये प्राचीनटीकासम्पत्तिमहिम्ने च विख्यातम् । तेषां दौर्लभ्यं पुनः प्रकाशनेन दूरीकृत्याल्पीयसा मूल्येन तदुपलब्धि-व्यवस्थाञ्च विधाय साहित्य-संरक्षणमपि भवद्भिरकृतपूर्वमेवाकारि ।

तिरुपतिविद्यापीठस्य विश्वविद्यालयास्पदत्वप्रदानप्रस्तावोऽपि च भवदीय-चिन्तनमेव । तत्साहचर्याच्च दिल्लीविद्यापीठमपि विश्वविद्यालयत्वं साम्प्रत-मध्यगच्छत् । विश्वविद्यालयत्वं लभमानमिदं विद्यापीठद्वयमतितरां भवदवदानं सदा स्वीकरिष्यति ।

यथावदाता आकृत्या द्राघीयांसश्च वर्ष्मणा ।
तथैव मनसा स्वच्छा कर्मणा च समुन्नताः ॥१॥
भवन्तो भान्ति भालेन विशालेन यथा तथा ।
औदार्येण चरित्रेण व्यवस्थापाटवेन च ॥२॥
व्यूढोरस्का वृषस्कन्धाः शालतुङ्गा महाभुजाः ।
आत्मकर्मक्षमं देहं वैप्रा धर्मा इवाश्रिताः ॥३॥
आकारसदृशप्रज्ञाः प्रज्ञया सदृशागमाः ।
आगमैः सदृशारम्भा आरम्भसदृशोदयाः ॥४॥
स्वामिनाथमहाभागाः संस्कृतेः संस्कृतस्य च ।
जयन्ति मनसा वाचा कर्मणा च सुसेवकाः ॥५॥

नवदेहली — एष भवदीयप्रश्रयसुरभितः
श्रीलालबहाशास्त्रीकेन्द्रीयसंस्कृत-विद्यापीठस्य
दिनाङ्कः २६-३-१९८५ — परिवारः ।

डा० स्वामिनाथाय पत्रम् (२)

(राष्ट्रपतिसम्मानित-कविरत्न-श्री अमीरचन्द्र शास्त्री, नयी दिल्ली)

श्रीः

फ़ेज़-१, बी-७२, अशोक विहार
दिल्ली-५२ ७-९-७५

पूज्ये प्रिये सहृदये सुहृदां वरिष्ठे
श्रीस्वामिनाथविबुधे नतयो मम स्युः।
वैयक्तिकं यदभिनन्दनमत्र पद्यै-
र्मध्येसभं त्वधिगतोऽस्मि नितान्तहृद्यैः ॥१॥

अद्याथ तस्य पदतोऽपि सहायकस्य
शिक्षासु संस्कृतगिरि स्वविमर्शदस्य।
शिक्षासमाजकुशलैकसमाश्रयस्य
मन्त्रालयस्य च तदध्यगमं दलेन ॥२॥

अन्यप्रकर्षरुचिरादरणस्वभावः
स्नेहातिशीतिरथवा गुणपक्षपातः।
किंवा गुणान्तरमिहानुवदानि हेतुं
भावत्कमित्ययमहं बहु चिन्तयामि ॥३॥

श्रीस्वामिनाऽथ निजभक्तजनेषु तेषु
प्रह्लादनारदमुखेषु कृतानुकम्पा।
श्रीस्वामिनाथ, न मम स्मृतिमाश्रयेत्किं
दृष्ट्वा तवेदृशमुदारतरं स्वभावम् ॥४॥

स्थित्वा स्वयं तरुतले तरुमूर्धनि स्वा-
नारोहयद्रघुपतिः स च नन्दसूनुः।
चद्रञ्च शीर्षणि दधाति स चन्द्रमौलि-
रङ्गीकृतादरणमस्ति सतां स्वभावः ॥५॥

सोऽयं भवत्यपि मया सचिवालयेऽपि
शिक्षासमाजकुशलाश्रयणेऽनुभूतः।
तं प्रत्यहं स्वहृदयेन कृतज्ञभावं
भूयोऽप्यमूं प्रकटयामि विनम्रताञ्च ॥६॥

भवतामाश्रवः
अमीरचन्द्र शास्त्री

डा० स्वामिनाथाय पत्रम् (१)

शीघ्रकविः कविचूडामणिः
गद्य-पद्य सम्राट्
गोस्वामी हरिकृष्ण शास्त्री
न्यायोपाध्यायः शुद्धाद्वैतवेदान्ताचार्य
साहित्याचार्यः

भूतपूर्व-प्रिन्सिपल
राजकीय संस्कृत कॉलेज, अजमेर
स्थायी:—
ग्राम महापुरा, जयपुर (राजस्थान).
भारत

दिनाङ्क २३-४-१९७७

विषयः—पुस्तकमुद्रापणविधौ सहायतानुदाने स्वीकृतद्रव्यराशिप्रदानम्
प्रसङ्ग— अस्मत् पत्रं (स्मृतिपत्रं) दिनांक ८ अप्रैल ७७

(१)

साहित्ये नव्यभव्यग्रथनकृति-परोत्साहसंवर्द्धनेषु
श्रीमत्सु स्वामिनाथन् - विबुधवरशिरोमण्डनेषूत्तमेषु ।
विद्वत्सत्कारभारोद्वहनमतिमतामग्रगण्येषु धन्ये-
ष्वात्मीयेष्वेव विद्वन्निकरमुपकृतैर्भावयत्सु प्रणामाः ॥

(२)

श्रीस्वामिनाथन् करुणारसाल-शाखाविलासोल्लसितः पिकाऽऽभः ।
गोस्वामिबन्धुर्हरिकृष्णशास्त्री नमत्ययं कामयते कृपां ते ॥
युग्मम् :—

(३)

सम्प्रेषितं श्रीचरणैर्ह्युदारैः साहाय्यदानार्थमुदारराशेः
सहस्रषट्कात्मकदानपत्रं, तदेव प्रत्यर्पयितुं दलं वः ॥

(४)

सम्प्राप्य, सद्यः प्रहितं मयाऽपि, स्वाज्ञानुसारं भवतां, तथापि
नाद्यावधि स्वीकृतवित्तराशिर्लब्धस्तदर्थं प्रतिवेदनं नः ॥

(५)

संवत्सरोऽप्यार्थिक एव यातस्तदुत्तरं मासमयोऽपि कालः ।
नैवोपलब्धः खलु वित्तराशिर्यः स्वीकृतः पुस्तकमुद्रणाय ॥

(६)

किमत्र बीजं विदुषां कृते यत् साहाय्यदानं भवता कृतं तत्
सर्वा प्रतिज्ञादिकपूर्तिरेषा कृता, धृताऽद्यावधि नैव मुद्रा ॥

(७)

पारावतानां शरणं हि कूपः, स्तूपायिता नः शरणं भवन्तः।
नान्यो वदान्यः शरणं कवीनां भवेद्भवन्तं परिहाय मान्यः॥

(८)

आशानिबद्धहृदयः खलु चाष-पोतः संवत्सरावधि कथञ्चन दीर्घकालम्
योऽप्यापयज्जलदबिन्दुनिबद्धतृष्णो वर्षागमेऽपि किमु वञ्चित एव
तिष्ठेत्॥

(९)

नाऽन्योऽधुना कश्चन पक्षपोषको न सत्कृतिं कर्तुमयं प्रभुर्भवेत्।
भवादृशामेव कृपाकटाक्षजो ह्युदीक्ष्यतेऽनुग्रहलेश एष नः॥

(१०)

योऽनुग्रहोऽभूद्वरतर्पणेन सम्प्रीणितः स्वीकृतिदानपत्रैः।
तृषार्दितो वर्षय वित्तधारां विलम्बविघ्नैः परिहन्यतेऽयम्॥

(११)

सम्पोषकाः पण्डितपुङ्गवानामाधारभूता निधि सम्प्रसूताः।
कल्पद्रुमा लेखकवृन्दहेतोर्वित्तप्रदानेऽप्यतियोगभाजः॥

(१२)

संरक्षितारश्च कवीश्वराणां सम्मानसत्कारसहायताभिः।
ये जागरूकाः स्वयमेव सन्ति प्रेक्षावतां धुर्यतमाः किमेभिः॥

पत्रोत्तराऽऽकांक्षी—

निवेदकः—

गोस्वामी हरिकृष्ण शास्त्री

कोसलेन्दुमठ, पालड़ी

अहमदाबाद-३८०००७

डा० स्वामिनाथाय पत्रम् (३)

Prof. K. P. URUMESE
(T.C. 11/257)
Christ Nagar, P.O. Kowdiar

TRIVANDRUM-3
Date : 5-5-1981

महात्मन् !

(१)

श्री स्वामिनाथ ! भवता रचितं तु गीतं
गीतं मयापि, बदरीश्वरसुप्रभातम् ।
भूरि प्रमोदमददात् भवदीयकाव्यं
श्रीकृष्णमूर्त्तिकृपया, मम सत्प्रणामः ॥

(२)

वाराणसीवरपुरे सुरभारतीय-
मायोजनं महदलं प्रचलिष्यतीति ।
भाग्येन मे श्रुतिगतं सुरवर्त्मवाण्या
नेदं मया पठितमत्र हि पत्रिकासु ॥

(३)

उत्तुङ्गसंस्कृतबुधैस्सह सङ्गमाय
गाङ्गेयपुण्यसलिले च निमज्जनाय ।
साहाय्यमत्रभवता सदयं विधेयं
नामाङ्कनाय विहितं सुदिनं त्वतीतम् ॥

(४)

या पावनी सकलभूतलवाङ्मयानां
हा, स्वामिनोति विदिता खलु देववाणी ।
स्वामी भवान् निखिलसंस्कृतमण्डलस्य
नान्यश्च भाति; सुकरं भवतो हि सर्वम् ॥

(५)

मोदान्मया विरचिता कविता तु काचित्
क्रिस्तेतिहासमवलम्ब्य कथञ्चिदार्य !
आशा हि मे कविसदस्यनुवाचनाय
काशीपुरे; कुरु दयामिति याचतेऽयम् ।।

(६)

ऐ ए यसाख्य (I.A.S.) विरुदेन विभूषितश्च
वागीश्वरश्च महितप्रातभो सखा मे।
वाराणसीपुरसमागतसूरिवृन्दै—
राराधितो हि भविता वरकृष्णमूर्त्तिः ।।

स्नेहादरपूर्वम्
के० पि० उमॉस्

उल्लसितयावत्तत्त्वज्ञानौपयिकनित्यानित्यवस्तुविवेकादि-सकलविशेषताजुषां, पूर्वोत्तरमीमांसापयोधिमथनमन्दराय-माणानां संस्कृतसंस्कृतिसंरक्षणैकमधुव्रतानां केन्द्रीयशिक्षा-मन्त्रालयोच्चपदासीनानां श्रौत्रार्हन्तीचरणानां महनीयकीर्ति-कौमुदीविभासितदशदिगन्तानां महाविदुषां डा० सी०आर० स्वामिनाथन-महाभागानां पवित्रकरकमलयोरुपह्रियमाणम्

अभिनन्दनम्

नूनं सर्वे प्रसन्नाः शरणदसुमते पुण्यवन्तं भवन्तम्,
वीक्ष्यायातं प्रसङ्गात् जलवसुधमितं श्रीहरिद्वारधाम्नि ।
प्रत्यासन्ने प्रसन्ने नभसि हितकरे मेघमाश्लिष्टसानुं,
प्रीताः कामं नितान्तं स्वघनसुखकरं चातकाः कामयन्ते ॥१॥

काणादीदीप्तिराशे कविवरसुवचोबोधपीयूषचन्द्र,
भास्वन्वैयासकीनामनधिगतरुतां शब्दमाणिक्यमूर्धन् ।
विद्यावत्कृष्णकीर्ते खलदलनिहरे दीप्तिमञ्जैमिनीये,
ख्यातं कान्तं सुशान्तं सुखकरपदगं स्वामिनाथन्नमामः ॥२॥

केन्द्रे केन्द्रे सुधीरं सुधनवितरकं ज्ञानिनामग्रगण्यम्,
मीनानां सज्जनानां मृदुजलसरसं भारतीसेवनाप्तम् ।
भावैः सर्वैरखर्वैर्वृतमतिसुखदं पालकं सत्कथानाम्,
नृणां शुभ्रं प्रशान्तं सकलकलयुतं भावयामो भवन्तम् ॥३॥

कामं कान्ताः सुशान्ता भुवि भुवि विदिताः पण्डिता भान्ति भूयः,
येषां वाचां प्रवाहाः कुमतिनुदतया ख्यातिमन्तो भवेयुः ।
किन्नामैवं गुणौघैस्त्वमिह विसदृशो भासि भास्वानिवैकः,
आकाशे हि ग्रहाणां प्रचुररुचिकरो वेदविन्मानितोऽर्थ्यः ॥४॥

गङ्गाद्वारं प्रसिद्धं व्रततिततियुतं साधुसिद्धाश्रितान्तः,
विद्याशालाविभातं सुरमुनिसुकथं भूषितं भूतिमद्भिः ।
आनन्दानां प्रकाशं सदयदययुतं कामितं सज्जनानाम्,
तस्मिन्विद्वन् भवन्तं विलसितसुगुणं स्वामिनाथन्नमामः ॥५॥
शान्तस्वान्तं सुबोधं मधुरगुणचयं भूषणं पण्डितानाम्,
बोधाकाशाप्तचन्द्रं विततबहुकलं सज्जनानां सखायम् ।
येनेदं विश्वमद्धा सकलकलकलं कामितं न्वेकनीडम्,
विश्वेषां वै जनानां सुहितसुमनसं स्वामिनं भावयामः ॥६॥

समुपहर्तारः -

हरिद्वारपञ्चपुरीस्थाश्रमविद्यालयवर्तिनो विद्वांसस्तथा
श्रीभगवानदाससंस्कृतमहाविद्यालयस्याध्यापकाश्च ।

१४-११-१९८३

नववर्षीयमभिनन्दनम्

(राष्ट्रपति सम्मानित:-श्री श्रीजीवदेवशर्मा भाटपाड़ा प० बंगाल)

(१)

नववर्षसहर्षदेवता
ह्यवताद् भारतवर्षराष्ट्रिकान् ।
बलबृद्धि - शुभेष्टयोजनां
जनवृन्दे जनयत्वनारतम् ॥

(२)

हे स्वामिनाथ ! प्रणयी सदासि
प्रज्ञावतां प्राणरसायनश्रीः ।
जीवत्वमुज्जीवय जीवनञ्च
प्राचीन - विज्ञानसमाजमञ्च ॥

(३)

स्वामिनाथ ! गुणपाथसां निधे
ज्ञानरत्नभरणप्रयत्नकृत् ।
मङ्गलं हि भवदङ्गसम्पदो-
रस्तु भारतजनस्तुतं सदा ॥

३-५-१९७९

स्वागतपत्रम्

सुश्रीमतां गुणवतां हि यशोधनानाम्
शिक्षाप्रसारकरणाय धृतव्रतानाम् ।
देशोन्नतिं विदधतां करुणाकराणाम्
सुस्वागतं सुमनसां भवतां विदध्मः ॥

(१)

सन्माननीययशसां विदितप्रभाणाम्
सद्भारतीयसुखदाकरराजधान्याम् ।
विख्यातिमत्-सुकृतिनां बहुमानभाजाम्
सुस्वागतं सुमनसां भवतां विदध्मः ॥

(३)

विश्वस्य सर्वविधवेदविधानविद्या
स्वायोगमन्मतिमतां कृतिनां समेषाम् ।
नित्यं परोपकृतये दृढसद्व्रतानाम्
सुस्वागतं सुमनसां भवतां विदध्मः ॥

(४)

श्रीमन्महर्षिनगरे समुपागतानाम्
विद्याविधानकरणे परशक्तिभाजाम् ।
विज्ञानपीठपरमोन्नतिसन्मतीनाम्
सुस्वागतं सुमनसां भवतां विदध्मः ॥

(५)

श्रीमत्कृपावरदहस्तमहाकृपायाम्
सद्यः समुन्नतमिदं भविता हि पीठम् ।
इत्याशया वयमिमे विमलातिथीनाम्
सुस्वागतं सुमनसां भवतां विदध्मः ॥

आचार्य रामविलास
महर्षि वेद विज्ञान विद्या
महर्षिनगरम् (गाजि

डा० स्वामिनाथन् के प्रति

(श्री त्रिलोकीनाथ धर, उपनिदेशक (वित्त) राष्ट्रीय संस्कृत संस्थान, नई दिल्ली)

मराठी कवि बोरकर की एक कविता की एक पंक्ति का अनुवाद कुछ इस तरह से है 'होती जहाँ दिव्यता की प्रतीति, मैं प्रणाम सा झुक जाता हूँ'। संस्कृत में कुछ ऐसी शक्ति है और इसके साथ हमारी भावनायें कुछ इस प्रकार जुड़ी हुई है कि जहाँ भी संस्कृत की बात आती है, हमें वहाँ दिव्यता की प्रतीति हो जाती है और हम नतमस्तक हो जाते हैं। संस्कृत के क्षेत्र में जो लोग अपना योगदान देते है, उनके प्रति श्रद्धा और सम्मान की भावना जागृत होना स्वाभाविक है।

डा० सी० आर० स्वामिनाथन् जी से मेरा सम्पर्क पाँच वर्ष पूर्व तब हुआ जब मेरी नियुक्ति राष्ट्रिय संस्कृत संस्थान में उपनिदेशक के पद पर हुई। यद्यपि हमारा प्रारम्भिक परिचय औपचारिक था तथापि शीघ्र ही मुझे उनके व्यक्तित्व और वैदुष्य का भली प्रकार से अनुभव हुआ और हमारा सम्बन्ध एक आत्मीय सम्बन्ध में परिणत हुआ। संस्कृत जगत् में उनकी ख्याति और प्रसिद्धि सर्वविदित है, परन्तु उनके काम में जो एक बात मुझे सबसे अधिक प्रिय लगी, वह है—वेद के प्रसार में उनका निरन्तर प्रयास। डा० साहब कवि भी हैं, दर्शन और अन्य विषयों का भी उन्हें यथेष्ट ज्ञान है, परन्तु मैं यह मानता हूँ कि यदि यह सब न भी होता और वे केवल एक मात्र काम वेद के प्रचार का ही करते, तब भी वे हमारे लिए आदर और सम्मान के पात्र बने रहते।

मुझे उनकी पद्य रचनाओं को सुनने का कई बार सौभाग्य प्राप्त हुआ और मैंने यह पाया कि उनमें सहृदयता, पदलालित्य और भाव गांभीर्य के

स्वागतपत्रम्

सुश्रीमतां गुणवतां हि यशोधनानाम्
शिक्षाप्रसारकरणाय धृतव्रतानाम् ।
देशोन्नतिं विदधतां करुणाकराणाम्
सुस्वागतं सुमनसां भवतां विदध्मः ।।

(१)

सन्माननीययशसां विदितप्रभाणाम्
सद्भारतीयसुखदाकरराजधान्याम् ।
विख्यातिमत्-सुकृतिनां बहुमानभाजाम्
सुस्वागतं सुमनसां भवतां विदध्मः ।।

(३)

विश्वस्य सर्वविधवेदविधानविद्या
स्वायोगमन्मतिमतां कृतिनां समेषाम् ।
नित्यं परोपकृतये दृढसद्व्रतानाम्
सुस्वागतं सुमनसां भवतां विदध्मः ।।

(४)

श्रीमन्महर्षिनगरे समुपागतानाम्
विद्याविधानकरणे परशक्तिभाजाम् ।
विज्ञानपीठपरमोन्नतिसन्मतीनाम्
सुस्वागतं सुमनसां भवतां विदध्मः ।।

(५)

श्रीमत्कृपावरदहस्तमहाकृपायाम्
सद्यः समुन्नतमिदं भविता हि पीठम् ।
इत्याशया वयमिमे विमलातिथीनाम्
सुस्वागतं सुमनसां भवतां विदध्मः ।।

आचार्य रामविलास
महर्षि वेद विज्ञान विद्या
महर्षिनगरम् (गाजिया

डा० स्वामिनाथन् के प्रति

(श्री त्रिलोकीनाथ धर, उपनिदेशक (वित्त) राष्ट्रीय संस्कृत संस्थान, नई दिल्ली)

मराठी कवि बोरकर की एक कविता की एक पंक्ति का अनुवाद कुछ इस तरह से है 'होती जहाँ दिव्यता की प्रतीति, मैं प्रणाम सा झुक जाता हूँ'। संस्कृत में कुछ ऐसी शक्ति है और इसके साथ हमारी भावनायें कुछ इस प्रकार जुड़ी हुई है कि जहाँ भी संस्कृत की बात आती है, हमें वहाँ दिव्यता की प्रतीति हो जाती है और हम नतमस्तक हो जाते हैं। संस्कृत के क्षेत्र में जो लोग अपना योगदान देते है, उनके प्रति श्रद्धा और सम्मान की भावना जागृत होना स्वाभाविक है।

डा० सी० आर० स्वामिनाथन् जी से मेरा सम्पर्क पाँच वर्ष पूर्व तब हुआ जब मेरी नियुक्ति राष्ट्रिय संस्कृत संस्थान में उपनिदेशक के पद पर हुई। यद्यपि हमारा प्रारम्भिक परिचय औपचारिक था तथापि शीघ्र ही मुझे उनके व्यक्तित्व और वैदुष्य का भली प्रकार से अनुभव हुआ और हमारा सम्बन्ध एक आत्मीय सम्बन्ध में परिणत हुआ। संस्कृत जगत् में उनकी ख्याति और प्रसिद्धि सर्वविदित है, परन्तु उनके काम में जो एक बात मुझे सबसे अधिक प्रिय लगी, वह है—वेद के प्रसार में उनका निरन्तर प्रयास। डा० साहब कवि भी हैं, दर्शन और अन्य विषयों का भी उन्हें यथेष्ट ज्ञान है, परन्तु मैं यह मानता हूँ कि यदि यह सब न भी होता और वे केवल एक मात्र काम वेद के प्रचार का ही करते, तब भी वे हमारे लिए आदर और सम्मान के पात्र बने रहते।

मुझे उनकी पद्य रचनाओं को सुनने का कई बार सौभाग्य प्राप्त हुआ और मैंने यह पाया कि उनमें सहृदयता, पदलालित्य और भाव गांभीर्य के

साथ-साथ दार्शनिक तत्त्व भी निहित हैं। इन कारणों से उनकी काव्य रचनाएँ उच्च कोटि की रचनाओं में गिनी जाती है।

उनके व्यक्तित्व की एक और बड़ी विशेषता मैंने यह देखी कि यद्यपि वे दूसरे पक्ष को बड़े धैर्य से सुनते हैं तथापि जहाँ कहीं संस्कृत के हित की बात आती हैं वहाँ वे दृढ़ निश्चय और आत्मसम्मान से अपने पक्ष पर अड़े रहते हैं। कदाचित् यही कारण है कि जो भी उनके बारे में बात करता है, वह प्रशंसा एवं आदर के साथ ही करता है। व्यक्तिगत रूप में मेरे साथ उनका सम्बन्ध बड़ा ही आत्मीय और सौहार्दपूर्ण रहा है और मुझे उनसे जो स्नेह और सम्मान प्राप्त हुआ है, उनके लिए मैं सदा उनको स्मरण करता रहूँगा। मेरी कामना है कि ईश्वर उन्हें दीर्घायु दें और वे स्वस्थ रहें, ताकि संस्कृत की सेवा में वे अधिक तन्मयता से कार्य करते रहें और अपनी कुशलता से श्रीमद्भगवद्गीता की 'योगः कर्मसु कौशलम्' उक्ति को साकार करें।

मूर्त्तिमती वेदसंस्कृतभक्तिः

(श्रीनटुविल् पषेटत्तु नारायणन् नम्पूतिरि कुट्टनेल्लूर, केरलः)

१९८१ तमे क्रिस्ताब्दे मम डॉ० सी० आर० स्वामिनाथमहोदयानां प्रथमः परिचयो जातः। केरलेषु श्रीनावायामखिलभारतीयवेदसम्मेलनमासीदवसरः। उद्घाटनसम्मेलनं प्रवर्त्तमानमवर्त्तत। भारतस्य विभिन्नेभ्यः प्रदेशेभ्यो भिन्न-भाषाभाषिणो वेदविदः समागताः सम्मिलिताश्चासन्। तेषु भूयिष्ठाः संस्कृत-विदः। तेषां सदसि केरलीयस्य सभापतेः कैरलीभाषणं डा० स्वामिनाथमहोदयाः संस्कृतेऽतिवेगेनानायासेन चानूदितवन्तः। तन्मुखादनर्गलं निर्गलन्त्या देववाण्या अमृतधारां कर्णे गृहीत्वा सर्वे विस्मिताः। द्विदिनव्याप्तेऽस्मिन् सम्मेलने युधिष्ठिरस्य राजसूये भगवान् कृष्ण इव डॉ० स्वामिनाथमहोदयाः सर्वकर्म-व्याप्ता दृष्टाः। अन्तरान्तरा कार्यक्रमाणां प्रख्यापनं संस्कृतेनैव तैः कृतम्। सर्वेषु कार्यक्रमेषु तेऽवहिता उपातिष्ठन्त। तेषां यथावन्निर्वहणे मनसा वाचा कर्मणा निरताश्चाभवन्। न केवलमेतत्, सामवेदगानाक्षरश्लोकपठनकर्णाटक संगीतालापादिषु केषुचित् कार्यक्रमेषु ते भागमप्यभजन्त। सम्मेलन उपस्थि-तानां वेदविदां सुखनिवासाद्यर्थमावश्यकानां वस्तूनां सज्जीकरणे सौकर्यकरणे-ऽसौकर्यदूरीकरणे च ते बद्धादराः समुत्सुकाश्च प्रावर्त्तन्त। आसम्मेलनसमाप्ते-स्तेषां विश्रमो नाभवत्। इदं सम्मेलनं स्थालीपुलाकन्यायेन डॉ० स्वामिनाथ-महोदयानां संस्कृतपाण्डित्यमनितरसाधारणं संस्कृतप्रयोगपाटवं वेदसंस्कृतभक्ति वेदसंस्कृतपण्डितभक्ति तत्पूजापरतां संघाटकत्वं कर्मकुशलतामन्यांश्च गुणान् प्रकटं प्रकटं प्रदर्शयति।

"गुणाः पूजास्थानं गुणिषु" इति ह्युक्तिः। गुणानां पूजा गुणिपूजा भवति। गुणपूजायां तद्ग्रहणं तद्विचारश्चान्तर्भवतः। वस्तुत एताभ्यामेव गुणावगमो गुणिमहिमावगतिश्च संभवतः।

ज्ञानात् भक्तिर्जायते। बाल्यात् प्रभृति पित्रादिभ्यो गुरुभ्यश्चेश्वरमहिमा-वर्णनश्रवणात् तन्माहात्म्यज्ञाने सति कश्चिदीश्वरभक्तो भवति। निरन्तर-मास्तिकग्रन्थपारायणात् तस्य भक्तिर्वर्धमानैव वर्त्तते। स सर्वात्मनेश्वरसेवापरो भवति। संस्कृतभक्तेरप्येषैव स्थितिः। केचिन्माहात्म्यश्रवणात् संस्कृतं पठन्ति।

केषाञ्चित्तदध्ययनात् तन्माहात्म्यज्ञानं भवति। उभयेषामपि यथा यथा अध्ययनमग्रतो गच्छति तथा तथा संस्कृतमाहात्म्यज्ञानं तद्भक्तिश्च वर्धमाने एव वर्त्तेते। ज्ञायमानं तन्माहात्म्यं किंस्वरूपम्? कीदृशश्च तज्ज्ञानक्रमः? काव्याद्यध्ययने कथास्वौत्सुक्यं जायते। पश्चादलङ्कारसन्निवेशादाववधान भवति। तद्रसमनुभवन्नध्येता यदा विचारपरो भवति तदेतिवृत्तघटनादीनां सौन्दर्यमवगाहते तद्बुद्धिः। एवमग्रतो गच्छन् स ध्वन्यास्वादने समर्थः सत्- चित्तश्च भवति। अत्रान्तरे साहित्यादिशास्त्रपरिचयात् तेषु दृश्यमान युक्तिकौशलेन सं आकृष्यते। काव्येषु कथाप्रसङ्गवशात् वेदान्तचिन्तापराणि स्तोत्राणि सन्ति हि। कथापात्राण्यपि भूयिष्ठानीतिहासपुराणेभ्यः स्वीकृतानि। एतद्विदः कस्यचिदध्येतुः संक्षेपेण परिचितानां विस्तरेण ज्ञाने समौत्सुक्यं सञ्जायते। स आदिकाव्यं रामायणं इतिहासं महाभारतं पुराणानि च पिपठिषति। तेषु पठितेषु तस्य संस्कृतभक्तिर्बहुगुणीभूता दृढीकृता च। काव्ये यादृशी भाषा तादृश्येव तेषु। बहव आर्षप्रयोगाः सन्तीति भेदः। काव्य- गुणा अपि बाहुल्येन दृश्यन्ते। निगूढानां जीवितरहस्यानामुद्घाटनं तं नितरा- माकर्षति स्म। गहना विपुला च तत्त्वचिन्ता तस्य आलोचनामृतमभवत्। श्रीमद्- भागवते भक्तिज्ञानकर्मणां या त्रिवेणी प्रवहति सा तं विस्मापयते स्म। यादृशे परम्परागते भारतीयसमाजे स जीवति तादृश एव तेषु दृष्टः। आचार- विचारविश्वासादयः सर्वे त एव ये बाल्यात् प्रभृति तेन श्रुता अनुष्ठिताः पालिताश्च तेषां सैद्धान्तिक आधारस्तेन पुराणादिषु साक्षात्कृतः। ब्रह्मसूत्र- शाङ्करभाष्यावलोकनात् जगदुत्पत्तिविनाशादिसंबन्धी भारतीयविचारोऽवग- धारितस्तस्य परमादरमार्जितवान्। एवं सर्वंकषस्य संस्कृतसाहित्यस्य महिमान- मवगम्य स नतमूर्धा प्राञ्जली रोमाञ्चकञ्चुकितो गद्गदनिरुद्धकण्ठश्चा भवत्।

तत्त्वचिन्ताया वेदान्त इत्यभिधानं पूर्वोक्तेन पुरुषेण बाल्यात् प्रभृति श्रुतमस्ति। वेदानामन्तेषु प्रतिपादितत्वादियं संज्ञेति पश्चादवगतम्।

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥

इति महाभारतहृदयभूतभगवद्गीतामाहात्म्यबोधकः श्लोकस्तेन श्रुतः। गीता- अध्यायसमाप्तिवाक्येषु भगवद्गीतासूपनिषत्सु" इति तेन दृष्टम्। उपनिषद ए भगवता गीता इति तदर्थः। ता एता उपनिषद एव वेदान्ताः। तत्त्वचिन्ता- मूलं ज्ञातुं स शाङ्करभाष्यसहिता उपनिषदः पठितुमारब्धवान्। संस्कृतज्ञान- साफल्यमनुभूतं तेन। आस्तिकानां भारतीयानां वेदाः परमं प्रमाणम्। वेदेषु इ- मस्ति, ते सर्वेषां मूलं भवन्तीति च प्रसिद्धम्। आदिकाव्येतिहासपुराण-

वेदोपबृंहणाहनीति तेषामारम्भ एव कण्ठतः कथितम्। पूर्वोक्तं सर्वं वेदेषु दिदृक्षते स्म सोऽध्येता।

वेदानामाद्य ऋग्वेदः। सः प्रथममवलोकितः। आश्चर्यमाश्चर्यम्! सर्वेषां मूलमत्र दृश्यते। भाषाया दुर्ग्रहत्वं व्याकरणेन दूरीकर्तुं शक्यते। निरुक्तसाहाय्येन पठिते सति ऋग्वेदे पुराणादिगता विशेषा एव दृष्टाः। गायत्र्यादिछन्दांसि पुराणादिप्रसिद्धवृत्तानां मूलानि। पुराणादिषु अन्वयगतिमुल्लङ्घ्य वृत्तानुरोधिनी या पदविन्यासरीतिः तस्या मूलमत्र दृश्यते। अत्रान्वयमवज्ञाय छन्दोऽनुरोधेन पदानि विन्यस्तानि। अनुप्रासादयः शब्दालङ्कारा उपमादयोऽर्थालङ्काराश्चात्र पुराणादिष्विव बाहुल्येनोपलभ्यन्ते। अत्रत्यमेवानुप्रासोपमयोः समुचितं प्रयोगं वाल्मीकिकालिदासावनुकृतवन्ताविति स्पष्टम्। उक्तिवैचित्र्याणामाकर एव ऋग्वेदः। अत्र यद्देवतानां बहुत्वं तत्पुराणादिष्वपि। अस्माकं समाजे या बहुदेवतापूजा तस्या एतदेव मूलम्। नानात्व एकत्वं वैदिकभारतीयसंस्कृतेर्विशेषः। सत्यप्यृग्वेदे प्रत्यक्षतो देवतानां बहुत्वे तासामैक्यमपि सूक्ष्मया रीत्या स्पष्टतया च प्रतिपादितम्। तथा हि—इन्द्रस्तुतौ "विश्वस्मादिन्द्र उत्तर" इत्यादिवाक्येनेन्द्रस्य परमेश्वरत्वं वर्ण्यते। अग्न्यादीनामप्येवमेव सर्वातिशायित्वं कण्ठतः कथ्यते। एकस्यैव सर्वातिशायित्वं संभवि। यदि बहूनामेतदुच्यते तर्हि तेषामेकतायामेव तदुक्तेरुपपत्तिः। वृत्तवध इन्द्रकर्म। अग्न्यादीनामपि तत्कर्तृत्वमृग्वेदेऽभिधीयते। यथा ब्रह्मशिव-रामादीनां कंसहन्तृत्वेऽभिहिते तेषां श्रीकृष्णस्य चैक्य एव तदुक्तेः सङ्गतिः तथैवेन्द्रस्याऽग्न्यादीनां च वृत्तहन्तृत्वोक्तावैक्यप्रतीतिः। एवं प्रतिपादितमैक्यम्—

"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥"

इति मन्त्रे कण्ठतः कथयत्यृग्वेदः। अयमेको देवः परं ब्रह्मैव। तस्यैव विस्तरेण प्रतिपादनमुपनिषत्सु। एतदृग्वेदपारम्पर्यमेव पुराणेषु दृश्यते। श्रीमद्भागवते विष्णुः परमेश्वरः परं ब्रह्म। अन्ये तद्वशंवदाः। शिवपुराणे शिवस्येदृशत्वम्। देवीभागवते जगदम्बिका दुर्गा सर्वशक्ता। अन्ये सर्वे देवास्तामनुवर्तन्ते। नेदृशानां पुराणानां परस्परविरोधः। ऋग्वेदरीत्या देवानामेकत्वं परब्रह्मत्वं च प्रतिपादितमात्रं तैः। इदमेव पारम्पर्यमास्तिकभारतीयजीविते सङ्क्रान्तं येन जना विविधान् देवालयान् गच्छन्ति भिन्ना मूर्तीः पूजयन्ति च। युगपद् भिन्नदेवभक्तौ न कश्चिद् विरोधः केनचिदनुभूयते। (एतावत्पर्यन्तमृग्वेदशब्देन ऋग्वेदसंहिता विवक्षिता।)

पुराणादिषु देवासुरवैरं देवैरसुराणां राक्षसानां च विजयो वर्णितो दृश्यते। राक्षसासुरैर्यज्ञादिसत्कर्मणां विघातोऽपि तत्र वर्ण्यविषयः। एतत्सर्वमृक्संहितायां तत्र तत्र संक्षेपेण ब्राह्मणे विस्तरेण च प्रतिपादितम्। भारतीयसमाजस्याधारं यच्चातुर्वर्ण्यं तदृक्संहितायां पुरुषसूक्तेऽभिहितम्। त्रैवर्णिकानां षोडश संस्कारा यजुर्वेदविहिताः। अश्वमेधराजसूयादयो ये यज्ञाः कथाभागत्वेन पुराणादिषु वर्णिताः ते यजुर्वेदे ब्राह्मणेषु च विहिता विस्तरेण प्रतिपादिताश्च। तेषां परामर्शः ऋक्संहितायां तत्र तत्र दृश्यते। वस्तुतस्तेषां स्पष्टीकरणमेव ब्राह्मणेषु।

श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं पूजनं दास्यं सख्यमात्मनिवेदनम्॥

इति या नवविधा भक्तिः श्रीमद्भागवतेऽभिहिता, ऋक्संहितामूलिका सा। ऋक्शब्दस्य स्तुतिरित्यर्थः। स्तोत्राणां समाहार ऋक्संहिता। ऋक्षु स्तुत्यदेवतानां भक्तानुग्रहदुष्टनिग्रहौ प्राचुर्येण वर्ण्येते। तौ स्तोतृभिः प्रार्थ्येते च। पापविमुक्तिरपि याच्यते। इष्टप्राप्त्यनिष्टपरिहारार्थं देवता आश्रीयन्ते भक्ताः सर्वथा तदधीतत्वं भजन्ते चेति संक्षेपः। अस्माकं स्तोत्रसाहित्यस्यैतदेव मूलम्। अत्रत्यैव भक्तिः श्रीमद्भागवते प्रवहति स्म। सैवेदानीमपि भारतीयास्तिकजीवितं नियच्छति।

सङ्गीतमपि साहित्यं सरस्वत्याः स्तनद्वयम्।
एकमापातमधुरमन्यदालोचनामृतम्॥

इत्युक्तिः प्रसिद्धा हि। आलोचनामृतस्य संस्कृतसाहित्यस्य वेदमूलकत्वं दृष्टम्, तद्द्वारा भारतीयान्यसाहित्यानामपि। आपातमधुरस्य सङ्गीतस्य का कथा? तदपि वेदमूलकम्। सामवेदो गानात्मकः। तत्र पञ्चसप्ततिमृचो विहाय अन्याः सर्वा ऋच ऋक्संहितातः स्वीकृता या गीतिरूपेण परिणमिताः। इयं गीतिरेव साम। "गीतिषु सामाख्या" इति जैमिनिः। कर्णाटकसङ्गीते षड्जादयः सप्त स्वराः प्रसिद्धा हि। तेषां प्रभवः सामवेदीया घुष्टादयः सप्त स्वराः। सर्ववेदेषु उदात्तादिस्वरत्रयमस्ति। षड्जादयस्तत्रान्तर्भवन्तीति कश्चित् सङ्गीतज्ञो लिखति। स्वरानभिज्ञोऽपि सङ्गीतान्तरमिव सामगानमपि श्रुत्वा श्रुत्वा न तृप्यति।

एतावद्दर्शनेऽस्माकमध्येतुर्वेदभक्तिः सुतरां वृद्धिं पुष्टिं दार्ढ्यं च प्राप्ता। वेदसंस्कृतभक्तेः सैद्धान्तिकाधारदार्ढ्यायैतावदेवालमाधुनिककालपर्यन्तम्। किन्त्वाधुनिके काले भारतीयसंस्कृतेः प्रबलाः प्रतिद्वन्द्विनः सन्ति। नवीनविज्ञान-

बलेन जगज्जयाय प्रस्थिता: पाश्चात्यनव्यसिद्धान्तास्ते। संस्कृतमात्रशरणास्तेषा-मनभिज्ञतया तैरभिभूता भवेयुः। अस्माकमध्येता नेदृशः। स: सम्यक्कृताङ्गल-भाषाध्ययनः। तदद्वारा नवीनसिद्धान्तानां समीचीनपरिचयात् स: तै: सह भारतीयवैदिकसिद्धान्तानां तुलनायामतीव क्षमः। कृता च तुलना भारतीय-सिद्धान्तानां सर्वातिशायित्वबोधे पर्यवसिता।

पूर्वोक्तोऽध्येता क इति किं वक्तव्यम्? तर्हि श्रूयताम्। डा० सी० आर० स्वामिनाथमहोदया एव सः। यस्मिन् भक्तिरस्ति सर्वथा तस्य सेवा भक्तेन कर्त्तुमिष्यते। वेदसंस्कृतभक्तैः स्वामिनाथमहोदयैरुभयोरपि समुचिता सेवा कृता क्रियते च। संस्कृतस्याधीतिबोधावयवा महती सेवा। यतो ग्राहकाभावे ग्राह्यस्य रत्नस्य नास्ति मूल्यम्। क्रमेण सर्वैरनध्ययनेन संस्कृतं त्यक्ष्यते चेत् सा स्यादृशा तत्रास्ति दृष्टान्तः। मोहञ्जोदरो हारप्पा संस्कृते लिखितान्यस्माभिर्लब्धानि। किन्तु तेषां वाचयितुमशक्यतया तद्भाषाज्ञानाभावात् तत्साहित्यज्ञानमशक्यं भवतीदानीम्। संस्कृतस्यैषाऽवस्था मा भूच्चेदधिकाधिकजनैस्तदध्येयम्। अत एवोक्तं पूर्वं विपुलं संस्कृतज्ञानं सम्पाद्य स्वामिनाथमहोदयैर्महती सेवा कृतेति।

केचिद्विद्वांसः सन्ति येऽधीतिबोधमात्रेण सन्तृप्यन्ति। ते विद्यामात्मसुखायैवोपयुञ्जते। नेदृशा डा० स्वामिनाथमहोदयाः। अधीतिबोधानन्तरमाचरणे ते दत्तावधानाः कृतोद्यमाश्चाभवन्। एषः स रङ्गो यस्मिन्नभिनेतुर्महती सृष्टि-शक्तिरपेक्षिता। तयाऽतीवानुगृहीता डा० स्वामिनाथमहोदया संस्कृते कृतीः रचयितुमारब्धवन्तः। केचिल्लेखकाः सन्ति ये गद्यमेव लेखितुं समर्थाः, अन्ये पद्यमात्ररचनायां निपुणाः। उभयोरपि रचनायां डा० स्वामिनाथमहोदयानां प्रावीण्यमनन्यसामान्यम्। ते संस्कृतपत्रिकासु लेखानलिखन्, पुस्तकानामव-तारिका लिखितवन्तः। मनोज्ञाभिः कविताभिः सहृदयानानन्दसागरनिमग्नान-कार्षुः। प्रतिदिनव्यवहारे संस्कृतोपयोगाय स्पृहयन्तस्ते पत्रव्यवहारमपि संस्कृतज्ञैः सह संस्कृतेनाकुर्वन् कुर्वन्ति च यदि पत्रलब्धारस्तदिच्छन्ति। तेषां सा भाषातीव स्वाभाविकी संस्कृतशैलीयुक्ता च। लेखनं भाषणादनायासं यतः पूर्वस्मिन् प्रभूतो विचारावकाशोऽस्ति। भाषणे तु प्रायेण विचारैः सहाविलम्बेन पदान्युच्चारयितव्यानि। अत एव गद्यपद्योभयास्वादनरचनानिपुणेष्वपि केचित् संस्कृतभाषणेऽसमर्था अन्ये स्खलन्तश्च भवन्ति। ते विरला भवन्ति येऽनर्गलं निर्ग-लन्तीं देववाणीं भाषितुं प्रभवन्ति। डा० स्वामिनाथमहोदया ईदृशाः। व्यक्तिभिः सह संभाषणे सभासु च ते सुतरां सुकरतयोपयुज्यते। भाषोपयोगस्यान्यो विषयोऽनु-वादस्य। अत्र मूलकारेणाभिव्यञ्जितोऽर्थस्तात्पर्यश्च्योतनं विनाऽन्यभाषायां प्रका-शयितव्यः। तदर्थमुभयोरपि भाषयोः प्रकृतिः सम्यक् ज्ञातव्या। अत्रापि क्लेशकर-

मपि लेखनं भाषणादनायासम् । भाषणे तु मूलभाषायाः पदानां शैलीनां वाक्यघटनाविशेषाणां च तात्पर्यबोधकान्यनुवादभाषायाः पदानि शैल्यो वाक्यघटनाविशेषाश्च सद्यः सद्यः स्मृत्वा प्रयोक्तव्यानि । विद्वत्सभायां भाषमाणस्य मूलकारस्य वाक्यानां प्रत्येकमनुवादो महतीं प्रतिभामपेक्षते । अत एव तयानुगृहीतानां डा० स्वामिनाथमहोदयानामनुवादकौशलं दृष्ट्वा श्रीनावासम्मेलनगताः सर्वे व्यस्मयन्त । भाषाध्ययनेन याः सिद्धयः स्वायत्तीकर्त्तुं शक्यास्ताः सर्वा डा० स्वामिनाथमहोदयैर्वशंवदीकृताः । भगवत्प्रसादेन लब्धासु सम्पत्सु अत्यावश्यकस्वोपयोगादवशिष्टा भगवत्सेवायामेवोपयुञ्जते सन्तो भवताः । ईदृशा डा० स्वामिनाथमहोदयाः संस्कृतप्रसादेन लब्धाः सिद्धीः संस्कृतसेवार्थमेव विनियुञ्जते स्म, विनियुञ्जते च । एतदेव विद्यायाः समीचीनमाचरणं येन प्रचारणमपि संभवति । अन्ये संस्कृतज्ञा अप्येवं कर्त्तुं प्रोत्साहिता भवन्ति । अपि च, संस्कृतानभिज्ञा अपि तस्य व्यावहारिकतां प्रत्यक्षं दृष्ट्वा तत् पिपठिषन्ति । एतस्य विशिष्टं प्राधान्यमस्ति । यतोऽमरवाणी मृतवाणीति कैश्चित् प्रचारितः प्रबल प्रवाद एतेन गगनकुसुमायते ।

वाचयितॄणामल्पत्वाद्विपणेः सङ्कुचितत्वेन प्रचारावसरासुलभत्वात् संस्कृतपुस्तकानां प्रकाशनं न बहुलाभप्रदम् । हानिरेवाधिकं संभवेत् । डा० स्वामिनाथमहोदया एतामवस्थामवगणय्य स्वतन्त्राः काश्चन संस्कृतकृतीररचयन् प्राकाशयंश्च । ता गद्यमय्यः पद्यमय्यश्च । निस्स्वार्थं संस्कृतसाहित्यपोषणमेवेदृशानां कर्मणां प्रेरकम् । न हि भक्ता भगवत्पूजायां लाभालाभौ वीक्षन्ते ।

औन्नत्यं कामयन्ते सर्वे । उन्नतास्तस्याभङ्गुरां रक्षामभिवृद्धिं चेच्छन्ति । सदा गुणोत्कर्षसम्पादनमेवास्य साधुः पन्था । किन्तु स न सुगमः । अतः प्रायेणोन्नता अन्येषामनुत्कर्षमपकर्षं वा काङ्क्षन्ति । तदर्थं परोक्षं प्रत्यक्षं वा प्रयतन्ते च । वेदसंस्कृतपण्डितेष्वप्येष दोषः प्रायेण दृश्यते । अत एव भर्तृहरिणोक्तं "बोद्धारो मत्सरग्रस्ता" इति । डा० स्वामिनाथविषयेऽसतीयमुक्तिः । ते वेदसंस्कृतपण्डितान् भक्त्यादरपुरस्सरं पूजयन्ति । किं कारणम् ? भक्तानां देवालयास्तीर्थानि च पूजास्थानानि । तत्र स्वेष्टदेवतासन्निधिं ते पश्यन्तीति हेतुः । न केवलं तेषां स्वेष्टदेवताः किन्तु तन्निवासस्थानान्यपि पूजनीयानि । तद्वद्वेदसंस्कृतभक्तानां डा० स्वामिनाथमहोदयानां वेदसंस्कृतोपस्थितिमन्तः पण्डिताः प्रातःस्मरणीयाः नमस्करणीयाश्च । कथं ते तैः स्पर्धेरन् विरुध्येरन् वा ? बहोः कालात् जीविकोपार्जनकरकर्मलाभः कृच्छ्रसाध्यः । यत्किञ्चित् कर्म लब्ध्वा जना भाग्यं मन्यन्ते । तदा स्वाभिरुचेर्जीवितोद्देशस्य चानुकूलस्य कर्मणो लाभः

सर्वेषां निधिलाभ एव। डा० स्वामिनाथमहोदया लब्धनिधयः। ते भारतसर्वकारस्य शिक्षामन्त्रालये संस्कृतविभागे सेवकत्वेन नियुक्तिमलभन्त। तदग्रे वेदसंस्कृतसेवाया महान् विपुलश्चावसर उद्घाटितः। तं सम्यक् विनियोक्तुं तैर्निश्चयः कृतः।

प्रायेण संस्कृतपण्डिताः सरस्वती-सेवामात्रनिरताः। स्वविद्याया रक्षा-पोषणाभ्यां धन्यतां मन्यन्ते ते। अनया सरस्वतीभक्त्या लक्ष्मीस्तेभ्यः कुप्यति। तस्याः कोपभाजनानि भूत्वा पण्डिताः प्रतिदिनजीवितार्थमत्यावश्यकानां वस्तूनामप्यलाभेनातीव क्लिश्यन्ते। पुरातनकालात् प्रभृति प्रायेणेयं स्थितिरुपलभ्यते। इदानीं सा दुस्सहेति विशेषः। ते पण्डिता धनसाहाय्येनाऽऽश्वासनीयाः। भारतवर्षे संस्कृताध्ययनार्थं सन्ति संस्थाः। कालविपर्ययेण छात्राणां वैरल्यात् बुद्धिमतां विद्यार्थिनां प्रायेणाक्रष्टुमशक्यत्वात् पर्याप्तवेतनदानाशक्त्या समर्थानां पण्डितानां चाध्यापकानामभावात् तासां दशाऽतिशोचनीया। तस्यास्ता उद्धरणीयाः। तदर्थमध्यापकेभ्यो जीवनपर्याप्तं वेतनं दातव्यम्। विद्यार्थिभ्यश्छात्रवृत्तिर्दातव्या। वेदा इतोऽप्यधिकतरकष्टावस्थायां पतिताः। अर्थग्रहणपूर्वकाध्ययनस्य सुदुष्करत्वादव्यावहारिकत्वादभावाच्च शिष्याणामाकर्षणमानयनं च दिने दिनेऽधिकमधिकं कृच्छ्रसाध्यं भवति। आर्थिकक्लेशादिकारणैरध्यापका अपि न मोत्साहाः। पूर्वमेतेषां जीविका समाजादागतासीत्। इदानीं साऽवसिता तेन पित्रादयोऽपि भाविजीवितं संशयग्रस्तं विपद्विषयं वा कृत्वा बालानां वेदाध्ययनार्थं प्रेषणे वैमुख्यं प्रदर्शयन्ति। वेदं कण्ठस्थीकृतवतां क्लेशा एतेषां सर्वेषां मनोवृत्तिं प्रोत्साहयन्त्येव। अस्मिन्नवस्थायां वेदपाठशालासु वा स्वातन्त्र्येण गुरुकुलरीत्या वा वेदमध्यापयतामधीयानानां चावश्यं धनसहायता कर्तव्या। क्लिश्यमाना वेदपण्डिता रक्षितव्याः।

वेदसंस्कृतयोः पूर्वोक्तदशायाः परिहाराय धनसहायताद्यर्थं भारतसर्वकारेण योजना कृता, नियमाश्च निर्मिताः। वेदसंस्कृतविदां प्रोत्साहनाय बहुमानाय च पुरस्कारादयो व्यवस्थापिताः। किन्त्वस्माकं सदोषशासनयन्त्रद्वारा यदैतत्सर्वं व्यावहारिकीक्रियते तदा विलम्बादिभिरुचितसमये पर्याप्तानि फलानि तदर्हान् न प्राप्नुवन्ति। सत्यं, शासनयन्त्रस्थावयवाः सर्वकारसेवका यन्त्रगतिनिघ्नतया स्वकृत्यानि निर्वोढुं निर्बद्धाः। किन्त्विच्छावन्तः कौशलेन तद्यन्त्रं किञ्चित्सीमापर्यन्तं स्वेच्छानुकूलं प्रवर्तयितुं समर्थाः। डा० स्वामिनाथमहोदयैरेवमेव कृतम्। तेषां प्रशासनकाले वेदसंस्कृतरक्षोन्नत्यर्थं सर्वकारकर्मक्षेत्रं सुतरां विपुलीभूतम् अधिकमधिकं क्लेशविवशवेदसंस्कृतपण्डिताः सर्वकारधनसहायतां लब्धवन्तः। न केवलं संस्कृतपण्डिता वेदविदोऽपि वर्षे वर्षेऽधिक-

संख्यासु अधिकप्रदेशेषु राष्ट्रपतिना पुरस्कृताः। वेदसंस्कृताध्ययनसंस्थाभ्यो- ऽधिकसंख्याकं द्रव्यं सहायतारूपेण दत्तम्। अध्यापका अधिकवेतनं विद्यार्थिनो- ऽधिकछात्रवृत्तिं चालभन्त। मूल्यवृद्ध्यनुसारेणैतत्सर्वं किञ्चित्सीमापर्यन्तं वर्धितं च।

सन्ति संस्कृतपण्डिता ये ग्रन्थान् रचयितुं समर्थाः। किन्तु प्रकाशनव्यय- करणाशक्त्या ते तस्मात् सदुद्यमात् बिभ्यति विरमन्ति च। अन्यैः कृतयः कृताः किन्तु प्रकाशनाशक्त्या मञ्जूषायामसूर्यंपश्या निक्षिप्ताः। उभयेषा- मपि सहायतार्थं सर्वकारेण योजना प्रणीतास्ति। डा० स्वामिनाथानां प्रशासन- काले ग्रन्थकारास्तस्य अधिकमधिकं सत्फलभोक्तारोऽभवन्। आधुनिके काले पुस्तकानीव वार्त्तापत्रादीन्यपि भाषाप्रयोगस्याभिवृद्धौ प्रधानं भागं भजन्ति। संस्कृतेऽपि तानि क्लिश्यमानान्यपि प्रवर्त्तन्ते। धनदानादिना तान्यपि विशिष्य प्रारम्भकाले सर्वकारेण प्रोत्साहितानि भवन्ति। नवारब्धं किञ्चिद् द्वैमासिकपत्रं समीपकाले सर्वकाराल्लब्धस्य धनसाहाय्यस्य कृतज्ञतां प्रकाशयति स्म।

एकभाषाभाषिणामपि संस्कृतपण्डितानामाधुनिकजीवितक्लेशाभिभूतानां सत्स्वपि यातायातसौकर्येषु बहुषु सङ्गमसम्पर्कादिवसर सुदुर्लभः। परस्पर- सम्पर्कादिभिः परस्परं विचारविनिमयेनैवानभ्यासादिजनितविद्यादोषा दूरी- क्रियन्ते। एतदवसराभावाद्विद्या पर्याप्तमुत्कर्षं न प्राप्नोति। स्खालित्यानां ज्ञानापनयनयोरवसरस्याल्पत्वं हेतुः। एतद्दोषपरिहार्थं भारतसर्वकारेण काले काले भिन्नप्रदेशेषु वेदसंस्कृतपण्डितानां सम्मेलनान्यायोजितानि। तत्र पण्डिताः समगच्छन्त, स्वीयान् प्रयोगविशेषादीन् प्रादर्शयन् विचारविनिमयमकुर्वंश्च। अत्रेदमवश्यमवधेयम्-ते पण्डिताः सर्वकारियसम्मेलनेषु तत्सेवका इव सर्वसौकर्यैः संभाविताः। तेभ्यो यात्राव्ययः प्रतिदिनव्ययश्च दत्तौ। एतदतिरेकेण पर्याप्तो द्रव्यात्मकपुरस्कारोऽपि दत्तः पूर्वोक्तसम्मेलनपरम्परास्वेकमासील्लेखारम्भे विवृतं श्रीनावासम्मेलनम्। डा० स्वामिनाथमहोदयाः सर्वकारसेवावसरलब्ध- स्वीयवेदसंस्कृतसेवाः सर्वकारयोजनां तन्नियमांश्च सेव्यानुकूलं व्याख्याय प्रयुज्य च कृतवन्तः। नियमेष्वपर्याप्ततासीच्चेत्तदपास्ता। परिवर्त्तनमावश्यकमभवच्चेत्त- त्कृतम्। नवीना नियमा निर्मेया अभवंश्चेन्निर्मिताः। एतत्सर्वं स्वहस्तगतम- धिकारं प्रयुज्य तदभावेऽधिकारिण : प्रेरणयानुकूलयित्वा च कृतम्।

सन्त्यस्मिन् देशे सर्वकारभिन्ना अपि संस्था या वेदान् संस्कृतं वा भयेन सेवन्ते। पण्डितसहायतार्था योजनास्तासामपि सन्ति। डा० स्वामिनाथमहोदया व्यक्तिगतरीत्या ताभिस्तदधिकारिभिश्च संबद्धा। अवसरसत्त्वे स्वीयं तं प्रभावं विनियुज्यापि तैर्वेदसंस्कृतपण्डिता उपकृताः।

वेदसंस्कृतयोः परमोत्कर्षः कथं स्यादिति विचारो डा० स्वामिनाथ-महोदयानां मनसि पदं कुर्वन्नवर्त्तत, वर्त्तते च। एतदेव कारणं येन १९८१ तमे क्रिस्ताब्दे अवश्यमेव डा० स्वामिनाथ-महोदयानामुपदेशेन प्रेरणया च भारत-सर्वकारेण काचिन्नवीना योजना प्रणीता। वेदसंस्कृतविद्यालयेष्वध्यापकाना-मन्तेवासिनां चाध्यापनाध्ययनगुणोत्कर्षोऽस्या मुख्य उद्देशः। शास्त्रचूडामणि योजनेत्यस्या नाम। तदनुसारेणाध्यापकानामन्तेवासिनां च सहायतार्थं वेदसंस्कृत-पण्डिता नियुज्यन्ते। तेभ्यः कालोचितं वेतनं च दीयते। तेऽध्यापका अन्ते-वासिनश्च योजनाविहितविषयेषु गवेषणं कुर्वन्ति।

वेदसंस्कृतभक्तिभूतानां डा० स्वामिनाथमहोदयानां सेवानामेकदेश एवैतावान्। सन्तः स्वसत्कर्माणि न घोषयन्ति। किञ्च सर्वकारसेवका अनेकदा नेपथ्ये प्रवर्त्तन्ते कर्त्तव्यबुद्ध्या यत्कर्म क्रियते तदात्मतृप्तय एव, न परबोधनाय। एतैः कारणैः पूर्वोक्तातिरिक्ता बहवो वेदसंस्कृतसेवा डा० स्वामिनाथमहोदयैः कृताः प्रकाशं गता न स्युः। अन्यथा वेदसंस्कृतयोस्तद्विदुषां चेयन्तो महान्त उपकाराः कथं समभविष्यन्?

विद्याविनयसम्पन्नाः स्वामिनाथाः

(श्रीसाम्बदीक्षितः गोकर्णः-५८१३२६)

"विद्या ददाति विनयं विनयाद्याति पात्रताम् ।" इतीमामुक्तिं सफलयन्तः श्रीमन्तः सी० आर० स्वामिनाथन्-महाभागाः अनल्पविद्यानां निधयोऽपि अत्युच्चपदमवाप्यापि, न मनागपि गर्वं वहन्ति, न चित्तसमतां त्यजन्ति। विंशतिवर्षेभ्यः पूर्वं भारतसर्वकारेण समायोजिते वेद- विद्वत्सम्मेलने दृष्टा एते महोदया मया । प्रथमदर्शने एव तेषाम् ऋजुमनसा, हितवचसा चाकृष्टोऽहं नितराम् । सुकुमारसरलस्वभावाः नैकभाषाविशारदाः सर्वेषां मनो हरन्तीति किमत्र चित्रम् ?

राजधान्यां समाजकल्याण-शिक्षा-संस्कृति मन्त्रालय (भारतसर्वकार) स्य उप-शिक्षा परामर्शदातृ (संस्कृत) स्थाने विराजमानैरेतैः किं किं न साधितम् ? स्वयं सामवेदाधीतिनः एते संस्कृतभाषायाः वेदविद्यायाश्च प्रचारार्थं बद्धपरिकराः । भारतस्य दिगन्तरेषु विद्यमानानां विविधवेदविदुषामेकत्र सम्मेलनं सम्पाद्य, वेदरक्षणैकप्रवणानां वेदपण्डितप्रकाण्डानां प्रतिभोल्लासं दिगन्तव्यापिनमकार्षुः । राष्ट्रस्य विविधभागेभ्यः आगताः जनाः प्रातःस्मरणीयानां वेदकोविदानामनेकेषां दर्शनेन यथा कृतार्थतां प्राप्नुयुः तथा वेदपण्डितानामेकत्र समावेशने एते बद्धदीक्षाः । एतेन अनर्घकार्यसम्पादनेन एतेऽपि पुनः पुनः सकलजनहृदयपदवीमारूढाः विराजन्ते ।

क्षेत्रेऽस्मिन् विद्यमानेऽस्मद्विद्यालये १९८० फेब्रुवरीमासस्य २४-२५-२६-२७ दिनाङ्केषु वेदविद्वत्सम्मेलनं, संस्कृतवाक्प्रतियोगिता च समभवत् । तत्र विदुषामेषां समुपस्थितिरासीत् । तस्मिन्नेवावसरे एतेषां जन्मदिनोत्सवश्च समाचरितः । तद्दिने आस्तिकाग्रेसरैरेतैः रुद्राभिषेकेण क्षेत्राधीशमहाबलेश्वरस्य समर्चनं, महागणहतिहवनं, विदुषां सम्माननं चाकारि । एवं सर्वथा सर्वथा वेदसंस्कृतश्रद्धाजुषामेतेषां सपत्नीकानां दीर्घायुरारोग्यं च वितरतु श्रीमहाबलेश्वरः इति प्रार्थयामः । एतेषां कृते एतादृशपुरस्कारकरणेनात्र कृतार्थिनो भवद्भिरिति तत्रभवद्भ्यो भवद्भ्योऽपि हार्दम् अभिनन्दनमर्पयामः । इति शिवम् ।

'देववाणी-परिषद्' दिल्ली-वार्तासु डा० स्वामिनाथः

(प्रस्तोत्रीः श्रीमती रमा शुक्ला, नयी दिल्ली)

(१) "...२०-११-१९७७ तारिकायां .... आचार्यश्रीरमेशचन्द्र शुक्ल-रचितस्य 'चारुचरितचर्चा' नामकग्रन्थस्य विमोचनं संवृत्तम् यत्र ... उत्सवाध्यक्षेण डा० सी० आर० स्वामिनाथन्-महाभागेन-ग्रन्थस्य वैशिष्ट्यं प्रकाशितम् ।"

(देववाणी-विलासः, प्रथमवार्षिकाधिवेशनस्मारिका, पृ० १३, २२-१-१७८)

(२) "...तदनु परिषदा सारस्वतसमारोहस्य, अक्षरश्लोक-कार्यक्रमाणाम्, अखिलभारतीयसंस्कृतकविसम्मेलनस्य, परिषदः, पञ्चमस्य षष्ठस्य च स्थापना-दिवसस्य, ग्रन्थप्रकाशनोद्घाटनानां, विचारगोष्ठीनां विद्यावाचस्पतिपण्डित-परमानन्दशास्त्रि-स्मारक-व्याख्यानमालायाः, आचार्यश्रीब्रह्मानन्दशुक्ल-स्मारक-व्याख्यानमालायाः, शिशुश्लोकपाठस्य, परिषदः संकल्पनादिवसस्य च समायोजनं कृतं यत्र ... डा० सी० आर० स्वामिनाथ-प्रभृत्यनेकैर्विद्वद्भिः संस्कृत-प्रचारप्रसारानुशीलनपराः स्वविचारा कविताश्च प्रस्तुताः ।"

(देववाणी-परिषदश्चतुर्थपञ्चमसंयुक्ताधिवेशने महासचिवेन प्रस्तुतं वार्षिकं विवरणम्, षष्ठवार्षिकाधिवेशनस्मारिका, २१—२५-१-१९८३)

(३) "देववाणी-परिषद धन की दृष्टि से काफी दुर्बल है किन्तु ज्ञान-धनियों का सहयोग इसे कभी दुर्लभ नहीं रहा। न्यायमूर्ति श्रीबालकृष्ण एराडि, डा० गौरीनाथ शास्त्री, प्रो० प्रभाकर नारायण कवठेकर, कुलपति डा० जयमन्त मिश्र, डा० रामकरण शर्मा, डा० कपिला वात्स्यायन, आचार्य रमेशचन्द्र शुक्ल, पद्मभूषण पं० पी० एन० पट्टाभिराम शास्त्री, आचार्य बदरीनाथ शुक्ल, आचार्य सीताराम चतुर्वेदी, (स्व०) डा० त्र्यम्बक गोविन्द माइणकर, डा० एन० आर० बनर्जी, विद्यावाचस्पति श्री अमीरचन्द्र शास्त्री, डा० उदितनारायणसिंह, डा० नगेन्द्र, साहित्यवाचस्पति डा० प्रभुदयालु अग्निहोत्री, पं० वसन्त गाडगिल, डा० गयाचरण त्रिपाठी, डा० कृष्णकान्त शुक्ल, श्री वासुदेव द्विवेदी, श्री टी० एन० चतुर्वेदी, श्री के० पी० ए० मेनन

डा० सी० आ० स्वामिनाथन्, आचार्य वेदानन्द झा, कु० एम० डुकवि... डा० मण्डन मिश्र, प्रो० हरवंशलाल शर्मा, डा० रेवाप्रसाद द्विवेदी, डा० वासुदेव चतुर्वेदी, आचार्य आनन्द झा, पं० बटुकनाथ शास्त्री खिस्ते, ... श्रीनिवास रथ, डा० कमलेशदत्त त्रिपाठी,...श्री ओट्टूर उण्णिनम्बूदिरि..., पं० कमलापति त्रिपाठी, श्री के० करुणाकरन्,...डा० रामचन्द्र द्विवेदी, पं० लालनकृष्ण पण्ड्या प्रभृति अनेक संस्कृत-सेवियों ने परिषद् के कार्य-कलापों में भाग लेकर इसका बलसंवर्धन किया है।"

(षष्ठवार्षिकाधिवेशनस्मारिका २१—२५-१-१९८...)

(४) **देववाणी-परिषदः संकल्पनादिवसः**—२१-८-१९७६ तारिकायां परिषत्संविधानस्य समितिपञ्जीयककार्यालये प्रस्तुतिजातेति कृत्वा नवदिल्ल... २१-८-१९८२ ई० तारिकायामस्याः सङ्कल्पना-दिवसः 'संस्कृतदिवस'-रूपे... सम्मानितोऽभूत्। समारोहाध्यक्षैर्डाक्टरमण्डनमिश्रमहाभागैर्भणितं यत्संस्कृत... विदुषां प्रयत्नैरस्माकं संस्कृतिः रक्षिता। तैर्धनप्राप्तिमलक्ष्यीकृत्यापि संस्कृत... रक्षितम्। तेषां मार्गानुसरणं संस्कृतदिवसस्यान्वर्थत्वं विधत्ते। तैर्माध्यमिक... कक्षासु संस्कृताध्ययनस्य समुचितप्रावधानस्यावश्यकता रेखाङ्किता।

समारोहमुख्यातिथिभिः डा० सी० आर० स्वामिनाथन्-महाभागैर्भणितं... यत्केवलं सर्वकारोपलब्धद्रव्यमात्रेणैव संस्कृतस्य रक्षा भवितुं न शक्या अपि... तदर्थं विदुषां तपस्यैव कारणभूता। तैः संस्कृतभाषामाध्यमेन संस्कृताध्ययन... स्यौपयिकत्वं संसाधितम्।

(अर्वाचीनसंस्कृतम् ४/१/३, १५-१-१९८...)

(५) १३-१२-१९८१ ई० तारिकायां परिषदा स्वषष्ठस्थापनादिवसः सम्मानितः (स्मरणीयं विद्यते यत् १३-१२-१९७६ ई० तारिकायां परिष... पञ्जीकरणं संवृत्तम्)। समारोहस्य प्रमुखमाकर्षणमासीद् 'अक्षरश्लोक...' यस्मिन् डा० सी० आर० स्वामिनाथन्-श्री के० पी० ए० मेनन-पं० विष्णुकान्त... शुक्ल-श्रीवेदानन्द झा - श्रीरवीन्द्रनागर-श्रीबलदेवानन्दसागर-प्रभृतिभिः सर... श्लोकाः प्रस्तुताः। समारोहाध्यक्षैः सर्वोच्चन्यायालयन्यायमूर्ति-श्रीबालकृष्ण... एराडिमहाभागैरुक्तं यद्भारतीया संस्कृतिः संस्कृताश्रितास्ति, अतः संस्कृत... मवश्यं पठनीयम्।

(अर्वाचीनसंस्कृतम् ४/१/४, १५-१-१९८...)

(६) "१५-१०-१९८१ तारिकायाम् अर्वाचीनसंस्कृतस्य तृतीयवर्षपूर्ति... जाता। अस्मिन्नवसरे राजधान्या अनेकैर्विद्वद्भिः शुभकामनाः प्रदत्ता... एतत्पत्रस्य तृतीयवर्षीयं चतुर्थाङ्कं विमोचयता केन्द्रीयशिक्षामन्त्रालये संस्कृत...

सहपरामर्शदात्रा डा० शास्त्रपुरम् रामकृष्ण स्वामिनाथन् - महाभागेनोक्तं यदेतादृशे काले, यदा अर्थाभावात् सम्पूर्णग्रन्थानां प्रकाशनं सुशकं नास्ति, 'अर्वाचीनसंस्कृत' - निभानां सावधिकपत्राणां महती उपादेयतास्ति। एभिः पत्रैः संस्कृतजगते संस्कृतसाहित्यस्य विषये नियमितरूपेण महत्त्वपूर्णाः सूचना दीयन्ते।"

(अर्वाचीनसंस्कृतम् ४/१/५६, १५-१-१९८२)

(७) "देववाणी-परिषद् दिल्ली" इत्यस्याः संस्थायाश्चतुर्थं पञ्चमं च सयुक्तं वार्षिकाधिवेशनं नवदिल्ल्यां २०-३-१९८२, २१-३-१९८२ तारिकयोः सम्पन्नम्।...परिषदा नाट्योत्सवस्याप्यायोजनं कृतं यत्र भासकृत 'स्वप्न-वासवदत्त'-'दूतवाक्ययोः' डा० सी० आर० स्वामिनाथ-रचितस्य 'कर्णभूषणस्य' च प्रस्तुतिर्जाता।...परिषदा अक्षरश्लोकमप्यायोजितं यत्र डा० सी० आर० स्वामिनाथ-श्री के० पी० ए० मेनन-पं० पी० एन० पट्टाभिराम शास्त्रि-पं० विष्णुकान्त शुक्ल-श्री रवीन्द्र नागर-श्री पी० वी० उन्नीकृष्णन्-प्रभृतिभिः श्लोकपाठः कृतः।

(अर्वाचीनसंस्कृतम् ४/२/११९-१२०, १५-४-१९८२)

(८) "२७-५-१९८२ तारिकायां दिल्लीविश्वविद्यालयस्य टैगोर-सभा-भवने देववाणी-परिषदा विद्वदभिनन्दनं समायोजितम्। भव्येऽस्मिन् समारोहे केन्द्रीय - शिक्षामन्त्रालये उपपरामर्शकत्वेन (संस्कृते) प्रोन्नताः डा० शास्त्र-पुरम् रामकृष्ण (सी० आर०) स्वामिनाथ - महाभागाः, शिक्षामन्त्रालयेन शास्त्रचूडामणि - योजनान्तर्गतं सभाजिताः साहित्यवेदव्याकरणशास्त्राणां विश्रुता विद्वांसः डा० रमेशचन्द्रशुक्ल-श्रीलालनकृष्णपण्ड्या-श्रीसोहनलाल गौडमहोदयाश्च समभिनन्दिताः। समारोहस्याध्यक्षपदं राष्ट्रिय - संस्कृत-संस्थानस्य निदेशकैः डा. रामकरणशर्ममहोदयैः मुख्यवक्तृपदं च राजधान्याः श्रीलालबहादुरशास्त्रिकेन्द्रीयविद्यापीठस्य प्राचार्यवर्यैः डा. मण्डनमिश्रमहाभागैः समलंकृतम्।"

(अर्वाचीनसंस्कृतम् ४/३/२०४, १५-७-१९८२)

(९) देववाणी-परिषदा पावरटी (केरल) स्थ-गुरुवायूरकेन्द्रीयसंस्कृत-विद्यापीठस्य, बालूसेरी (केरल) स्थ-कालिकट आदर्शसंस्कृतविद्यापीठस्य च सहयोगेन १७-९-१९८२ तारिकायां पूर्वाह्णे ८०० वादनवेलायां गुरुवायूर (केरल) स्थ-'रुक्मिणी-मण्डपे' महाकविश्रीओट्टूरउण्णिनम्बूदिरीपादविरचितस्य भक्तिकाव्यस्य 'राधाकृष्णरसायनस्य' प्रकाशनोत्सवः समायोजितः।...

अवसरेऽस्मिन् केन्द्रीयशिक्षामन्त्रालये उपपरामर्शदातृभिः डा० सी० आर० स्वामिनाथन्-महाभागैः—श्री ओट्टूरउण्णिनम्बूदिरीपादानां समभि... कृतम् । देववाणी-परिषत्पक्षतः श्री नम्बूदिरीपादेभ्य ऊर्णोत्तरीयं समर्पितम्... परिषन्महासचिवेन डा० रमाकान्तशुक्लेन एकोत्तरसहस्ररूप्यकात्मकः स... राशिः कवये दीयमानत्वेनोद्घोषितः । तेन राधाकृष्ण-रसायनस्य केचन ... अपि सस्वरं पठिताः येषां कैरल्यामनुवादो डा० स्वामिनाथमहाभागैः प्रस्तुतः

(अर्वाचीनसंस्कृतम् ४/४/३०८-३०९, १५-१०.१९...

(१०) १-१२-१९८२ तारिकायां 'विंशशताब्द्याः संस्कृतसाहित्ये ... केरलीयविदुषां योगदानम्'—इति विषयमवलम्ब्य गुरुवायूरकेन्द्रीयसंस्कृतवि... पीठ (पावरटी-केरल) - प्राचार्येण डा० चक्रधर बिजल्वान-महाभागेन ... भाषितम् । तेनास्मिन् प्रसंगे नैकासां प्रकाशितानामप्रकाशितानाञ्च अर्वाचीन... संस्कृतरचनानामुल्लेखो व्यधायि । तेन 'देववाणी-परिषद्, दिल्ली' केरली... साहित्यकाराणां डा० सी० आर० स्वामिनाथन्—श्री ओट्टूर उण्णिनम्बूदिरी... पाद श्री टी० वी० परमेश्वर अय्यराणां कर्णभूषण - राधाकृष्णरसा... सदाशयसमुच्चयाभाणकमंजर्यादि-ग्रन्थप्रकाशने समभिनन्दिता ।

(अर्वाचीनसंस्कृतम् ५/१/९६, १५-१-१९...

(११) देववाणी-परिषदः पञ्चदिवसाभिव्यापि षष्ठं वार्षिकमधिवे... २१-१-१९८३ तमेशवीयायां तिथौ दिल्लीविश्वविद्यालयस्य टैगोर सभा... समारब्धं भूत्वा २५-१-१९८३ तमे दिनाङ्के सन्ध्यायां 'श्रीराम सेण्टर ... आर्ट एण्ड कल्चर, नयी दिल्ली-११०००१' इत्येतदाख्ये प्रेक्षागृहे सम्प... मगात् ।

समारोहस्योद्घाटनं भारतसर्वकारस्य शिक्षामन्त्रालये संस्कृतोपपराम... दाता डा० सी० आर० स्वामिनाथन्-महाभागो व्यदधात् ।…

२५-१-१९८३ तारिकायां राष्ट्रीयसंग्रहालय-सभागारे - समापन... आयोजिता बभूव यत्र डा० सी० आर० स्वामिनाथ-महाभागैः पुरस्कारवि... कृतम् ।

(अर्वाचीनसंस्कृतम् ५/२/१४७-१४९, १५-४-१९...

(१२) देववाणी-परिषदा २-४-१९८३ तारिकायां नयीदिल्ली... 'भारतीय-विद्या-भवने' समुत्सव एक आयोज्यत यत्र भारतराष्ट्रपतिपुरस्कृत... संस्कृतविदुषामभिनन्दनं, डा० सी० आर० स्वामिनाथ-प्रणीतस्य पण्डितराज...

शर्मव्याख्यातस्य देववाणी-परिषत्प्रकाशितस्य च 'श्रीबदरीशसुप्रभातम्' इत्याख्यस्य स्तोत्रकाव्यस्य प्रकाशनोद्घाटनं, देववाणी-परिषदः षष्ठ-वार्षिकाधिवेशनावसरे २५-१-१९८३ तारिकायां प्रस्तुतस्य 'पण्डितराजीयम्' इति नामधेयस्य संस्कृतनाटकस्य कलाकाराणां सत्कारश्च समनुष्ठीयन्त।

उत्सवस्यास्य मुख्यातिथिपदं भारतीयमर्वोच्चन्यायालयन्यायमूर्तयः श्री-रङ्गनाथमिश्रमहाभागाः अध्यक्षपदं च आई० सी० एस०-सेवानिवृत्ता श्री सी० एस० रामचन्द्रन्-महाभागा अलञ्चक्रुः।

(अर्वाचीनसंस्कृतम् ५/२, १५०, १५-४-१९८३)

(१३) देववाणी-परिषदोऽष्टमः सङ्कल्पनादिवससमारोहः २१-८-१९८३ तारिकायां दिल्लीविश्वविद्यालयस्य टैगोर' सभाभवने सम्मानितोऽभूत्।

अस्मिन्नवसरे मुख्यातिथिना भारतसर्वकारस्य उपशिक्षामन्त्रिणा श्री पी० के० थुगन-महाभागेन परिषत्प्रकाशितानां 'स्फूर्तिसप्तशती'-'पूर्णकुम्भ'-'साहित्य-कौतुका' ख्यानां त्रयाणां संस्कृतग्रन्थानां समुन्मीलन (विमोचनं) कृतम्। शिक्षा-मन्त्रालये उपशिक्षापरामर्शदातृपदमलंकुर्वता डा० सी० आर० स्वामिनाथ-महा-भागेन समुन्मीलितग्रन्थानां प्रथमप्रतिरूपाणि स्वीकृतानि।

अस्मिन्नवसरे उपशिक्षामन्त्रिमहोदयेन अखिलभारतीयं संस्कृतकवि-सम्मेलनम् अपि समुद्घाटितम्। अस्य कविसम्मेलनस्य अध्यक्षता भारतसर्वकार-शिक्षासंस्कृतिमन्त्रालये संयुक्तपरामर्शदातृपदमलंकुर्वता डा० रामकरणशर्ममहा-भागेन कृता। सम्मेलनेऽस्मिन् डा० सी० आर० स्वामिनाथः (अन्ये च पञ्चविंशतिकवयः) स्वरचना अपठन्। कविसम्मेलनस्य सञ्चालनं डा० रमा-कान्त शुक्लः कृतवान्।

(अर्वाचीनसंस्कृतम् ५/४/३१७-३१९, १५.१०.८३)

(१४) २१-१०-१९८३ ई० तारिकायां देववाणी-परिषदस्तत्त्वावधाने नयीदिल्लीस्थे भारतीयविद्याभवने समायोजिते भव्यसमारोहे भारतीयमर्वोच्च-न्यायालयस्य न्यायाधीशैः न्यायमूर्ति श्री वी० बालकृष्ण एराडि-महाभागैः परिषत्प्रकाशितायाः डा० शास्त्रपुरम् रामकृष्ण स्वामिनाथ प्रणीतायाः 'श्रीपाद-पराग' ख्यायाः 'श्रीपादसप्तति' व्याख्यायाः समुन्मीलनं कृतम्। अस्मिन्नवसरे, मुक्तिस्थले विराजमानायाः महिषासुरमर्दिन्याः मन्दिरे श्रीपादसप्तर्ति रचितवतो नारायणभट्टपादस्य सविशेषं परिचयं प्रस्तुवन्तो राष्ट्रीय-बीज-निगमाध्यक्षाः श्री के० पी० अच्युतमेननमहाभागाः श्रीपादसप्तर्ति श्रीपादपरागं चावलम्ब्य स्व

विचारान् प्रकटीचक्रुः । समारोहस्याध्यक्ष्यं काशी-हिन्दू-विश्वविद्या… प्राक्तनकुलपतिभिः डा० वेणीशंकरझा-महाभागैः कृतम् ।

(अर्वाचीनसंस्कृतम् ६/१/५५, १५-१-१…

(१५) २०-११-१९८३ ई० तारिकायाम् 'आर ६ वाणी-विहार, दिल्ली-५९' इति स्थाने देववाणी-परिषदस्तत्त्वावधाने 'मौरिशस'-देशवा… संस्कृतानुरागिणामभिनन्दनं समनुष्ठीयत । अस्मिन्नवसरे समारोहाध्यक्षेण … मण्डन मिश्र-महाभागेन देववाणी-परिषत्प्रकाशितग्रन्थार्पणेन मौरिशसदेशवा… समभिनन्दिताः ।…

अस्मिन्नवसरे 'आन्ताराष्ट्रिक संस्कृत-सम्मेलनेभ्योऽपेक्षा' इति विषय… लम्ब्य समायोजितां विचारगोष्ठीं समुद्घाटयन् केन्द्रीयशिक्षामन्त्रालये सं… परामर्शदाता डा० रामकरणशर्ममहाभागः प्रत्यपीपदत् यद् विश्वसंस्कृतसम्मे… 'संस्कृतं लोकेजीवनं चे'ति विषयमवलम्ब्य विचारो यदि क्रियेत तदा… संस्कृताध्ययनस्य नूतन आयामः समुद्घाटितः स्यात् । शिक्षामन्त्रालये उप… मर्शदात्रा डा० सी० आर० स्वामिनाथमहाभागेन सूचना दत्ता यत्… पाठानाम् अथ च वेदपाठानां ध्वन्यंकितटेपकैसेटाः भारते निर्मिताः । तेषा… योगोऽपि संस्कृतप्रचारार्थं हितकरः स्यात् । डा० रमाकान्त शुक्लेन '… संस्काराः' 'संस्कृतं संस्कृतिश्चे'त्यादिषु कतिपयेषु विषयेषु वीडियोफिल्मनि… णस्याप्यावश्यकता रेखाङ्किता ।

(अर्वाचीनसंस्कृतम् ६/१/५५-५६, १५.१.१९…

(१६) ११.१२ १९८३ तारिकायाम् अलीगढ़-नगरे देववाणी-परिष… ऽध्यक्षवर्यामाणाचार्य-श्रीरमेशचन्द्रशुक्लमहाभागानामभिनन्दनं संवृत्तम् … 'आचार्यश्रीरमेशचन्द्रशुक्लाभिनन्दनसमारोहसमित्या प्रकाशितः 'आम्भृणी… इत्याख्योऽभिनन्दनग्रन्थः केन्द्रीयशिक्षामन्त्रालये उपपरामर्श-दातृभिः डा० … आर० स्वामिनाथमहाभागैराचार्यशुक्लेभ्यः समर्पितः !

(अर्वाचीनसंस्कृतम् ६/१-५६, १५-१-१९…

(१७) देववाणी-परिषदः सत्प्रेरणया श्रीगोपालदत्तबिष्टमहाभागेन … स्थानविश्वविद्यालय-संस्कृत-विभागाध्यक्षस्य डा० रामचन्द्रद्विवेदिमहाभाग… आध्यक्ष्ये समायोजिते संस्कृताशुलिपि-प्रदर्शने भारतसर्वकारस्य शिक्षास… मन्त्रालये संयुक्तपरामर्शदातुः डा० रामकरण शर्मणः उपपरामर्शदातुः … सी. आर. स्वामिनाथस्य देववाणी-परिषदो महासचिवस्य डा० रमाका…

शुक्लस्य डा० द्विवेदिमहाभागस्य च संस्कृतवक्तव्यानि आशुलिप्यां निबद्ध्य देवनागरीलिप्यां प्रत्यंकितानि ।

(अर्वाचीनसंस्कृतम् ६/१/५७, १५-१-१९८४)

(१८) देववाणी-परिषदा १९८३ तमेशवीयेऽब्दे दिसम्बरमासस्य २८, २९, ३० तारिकासु नवदिल्ल्याः 'श्रीराम सेन्टर फॉर आर्ट एण्ड कल्चर' इत्येतत्प्रेक्षागृहे संस्कृतसङ्गीतकस्य, संस्कृतनाट्यसमारोहस्य चायोजनं कृतम् ।

आयोजनस्योद्घाटनं भारत सर्वकारस्य शिक्षामन्त्रालये उपपरामर्शदातृभिः डा० सी० आर० स्वामिनाथ-महाभागैः कृतम् । तैरस्मिन्नवसरे प्रकाशिता 'विवरणिका' (Brochure) अपि समुन्मीलिता । उद्घाटनसमारोहस्याध्यक्षं परिषदः प्राक्तनाध्यक्षैः डा. कृष्णकान्तशुक्लैः सम्पादितम् ।

(अर्वाचीनसंस्कृतम् ६/१/५८, १५-१-१९८४)

(१९) २१-२-१९८४ तारिकायां भारतीयविद्याभवने संस्कृताशुलिपि विकासार्थम् देववाणी-परिषत्प्रवर्तित एकोत्तरपञ्चसहस्ररूप्यकात्मकः संस्कृताशुलिपि-'श्रीगणेश' पुरस्कारः केन्द्रीयसर्वकारस्य शिक्षासंस्कृतिमन्त्रालये उपपरामर्शदात्रा डा. सी. आर. स्वामिनाथन्-महाभागेन श्रीगोपालदत्तविष्टमहाभागाय सताम्रपत्रप्रावारकः समर्पितः ।

(अर्वाचीनसंस्कृतम् ६/२/१२५, १५-४-१९८४)

(२०) देववाणी-परिषन्महासचिवः डा. रमाकान्तशुक्लः मौरिशसदेशस्य शिक्षामन्त्रिणः श्री अर्मूगमपरशुरामन्-महाभागस्य संरक्षणे मोकास्थमहात्मा-गान्धी-संस्थाने समायोजिते चतुर्दिवसीये अन्ताराष्ट्रीय-संस्कृत-सम्मेलने समुपस्थातुं भारतसर्वकारशिक्षामन्त्रालयस्य राष्ट्रीयसंस्कृतसंस्थानेन प्रेषितः । १४—१७-३-१९८४ तारिकासु समायोजिते ऽस्मिन् समारोहे भारतस्य प्रातिनिध्यं कर्तुं त्रिसदस्यीयं प्रतिनिधिमण्डलमित्थमासीत्— (१) डा० सी० आर० स्वामिनाथन् भारतसर्वकारस्य शिक्षा-संस्कृति-मन्त्रालये उपपरामर्शदाता (नेता) (२) श्रीमती कमला रत्नम्, डा० रमाकान्त शुक्लश्च (सदस्यौ) । एतेषां त्रयाणामपि विदुषां वक्तव्यानि सम्मेलने समायातैर्विद्वद्भिः समभिनन्दितानि डा० स्वामिनाथेन संस्कृतस्य महत्त्वं प्रकटीकुर्वता नैके ग्रन्थाः तत्रत्यसंस्थाभ्य उपायनीकृताः ।

(२१) मध्यप्रदेश-साहित्य-कला-परिषदा डा० सी० आर० स्वामिनाथ-लिखितो 'गीताभाष्यविवेचनम्'—इत्याख्यो ग्रन्थः 'कालिदासपुरस्कारेण सम्मानितः ।　　　　(अर्वाचीनसंस्कृतम् ६/२/१३०, १५-४-१९८४)

(२२) १४-३-१९८४ तरिकायां मौरिशस देशस्य 'मोका'स्थ-महात्मागान्धी-संस्थान-सभागारे देववाणी-परिषत्प्रकाशितस्य किञ्च आचार्यश्रीरमेशचन्द्र-शुक्ललिखितस्य 'रसदर्शनम्' इत्येतन्नामकस्य ग्रन्थस्य समुन्मीलनं मौरिशस-देशस्य प्रधानमन्त्रिणा श्रीमता अनिरुद्धजगन्नाथमहाभागेन कृतम्। अस्मिन्नवसरे तत्रत्यशिक्षामन्त्री श्री ए. परशुरामन्-महाभागः, तत्र भारतीयोच्चायुक्तः श्री प्रेमसिंह महाभागः महात्मगान्धिसंस्थानस्य निदेशकः श्रीउत्तम विष्णुदयालमहा-भागः संस्कृतसम्मेलनस्य आयोजनसमितेरध्यक्षः श्री चितलालरामचरणमहा-भागः भारतसर्वकारस्य शिक्षामन्त्रालये उपपरामर्शदाता डा० सी०आर० स्वामि-नाथमहाभागश्च स्वहस्ताक्षरैः ग्रन्थममुं समलंकृत्य देववाणी-परिषत्प्रकाशनानु-ष्ठानाय स्वशुभकामना अभिव्यक्तवन्तः।

(अर्वाचीनसंस्कृतम् ६/३/२११-२१२, १५-७-१९८४)

(२३) मकरसंक्रान्त्यां (१४-१-१९८५ ई० तारिकायां) देववाणी-परिषद-स्त्रिदिवसीयः सारस्वतसमारोहः प्रारब्धः।

अस्य प्रथमदिवसे केन्द्रीयशिक्षामन्त्रिणा श्रीकृष्णचन्द्रपन्त-महाभागेन परिषत्पक्षत उपहारस्वरूपं 'मौरिशससनातनधर्म-मन्दिर-परिसङ्घ (फैडरेशन) अध्यक्षाय श्री परमानन्दरामलखनमहाभागाय एकशतं ध्वन्यंकितपट्टिका (Cassette) समर्पिताः। एतासु ध्वनिपट्टिकासु संस्कृतश्लोकानां सस्वरं पाठो ध्वन्यंकितोऽस्ति।

अस्मिन्नवसरे शिक्षामन्त्रिणा परिषत्प्रकाशितं डा रमाकान्त शुक्ल-प्रणीतं 'भाति मौरीशसम्' नाम काव्यमपि समुन्मीलितम्।…

समारोहेऽस्मिन् शिक्षामन्त्रालये अपरसचिवपदमलंकुर्वती डा. कपिला वात्स्यायनमहाभागा, संस्कृतोपशिक्षापरामर्शदाता डा. स्वामिनाथमहाभागः राष्ट्रीयसंस्कृतसंस्थाननिदेशको डा. मण्डनमिश्र महाभागः भारतीय भाषाविभाग-निदेशिका श्रीमती आदर्श मिश्र-महाभागा तथान्येऽपि शिक्षाविदः समुपस्थिता आसन्।

(अर्वाचीनसंस्कृतम् ७/१/७७-७८, १५-१-८५)

कविचूडामणेः डा० स्वामिनाथमहोदयस्य 'कर्णभूषणम्'

(श्री भरतपिषारटिः)

कर्णभूषणं, ध्वस्तं कुसुमं, नरबलिप्रबन्धः इति तिसृणां सलक्षणानां विलक्षणकृतीनां समाहारोऽयं लघुग्रन्थः त्रिवेणीसंगम इव सहृदयानाकर्षति। प्रथमं नाटकं, द्वितीयं लघुकाव्यं, तृतीया चम्पूरिति स्वरूपविवेकः। तेषु कर्णभूषणं पुराणप्रसिद्धेन इतिवृत्तेन गुंफितं एकाङ्कात्मकं किमपि दृश्यकाव्यम्। तत्र श्रव्यदृश्यत्वे समञ्जसं सम्मिलतः। कवचकुण्डलाहरणार्थम् देवेन्द्रः कर्णमुपगमिष्यतीति ज्ञात्वा तन्निवारणार्थम् सूर्यस्यागमनं, कर्णस्य धर्मविषये अचञ्चलतां अवबुध्य प्रतिनिवर्तनं चात्र कथावस्तु। तदवलंब्य घण्टार्धकालाभिनेयमिदमेकाङ्कं पाठशालासु आनुवत्सरीणामवसरेषु अन्येषु सांस्कारिकसदस्सु च प्रयोगाधिकरणार्हमित्यतः श्रद्धेयतामावहति।

द्वितीयं तु 'ध्वस्तं कुसुमं' प्रतिरूपात्मकं किमपि लघुकाव्यम् अकाण्डे शकटविपदि मृतं प्रतिश्रुतवरं स्मारं स्मारं विफलप्रणयायाः प्रियाया विलाप एवात्र विषयः। ध्वस्तं कुसुममनुस्मृत्य भ्रमर्याः विलापरूपं अप्रस्तुतमेवात्र वर्णितम्। केवलभावनायां उद्ग्रथितेयं कविता सहृदयानाकृष्टुमलंभवति। स्थालीपुलाकीयमेकमुदाहरणम्—

नटनोद्यतचारुपादषट्का करतालाहतचित्रपक्षयुग्मा।
मधुरस्वरगुञ्जिता नटीयं नवधास्वाद्यरसाश्रया बभूव॥

तृतीयो नरबलिप्रबन्धस्तु इतराश्रया कविभावनाशक्तिसम्पन्न इति प्रतिभाति। केवलं किमपि जीर्णचण्डिकामन्दिरदर्शनमेवात्र कवेः प्रतिभाप्रचोदनस्य बीजम्। आधुनिकानामन्धभक्तिप्रचारकाणां तथा

तद्वचनमन्धं प्रमाणीकृत्य किमपि कुर्वतां अज्ञानां साधारणजनानां दुराचाराः कविनात्र निपुणं विडंब्यन्ते। कश्चित् तापसः स्वतपोबलेन दुर्गां प्रसाद्य देव्याः शिलामूर्तिमासादितवान्। स तापसः विमर्शि मन्दिरं निर्माय तस्या मूर्तेः प्रतिष्ठां चक्रे। तन्मन्दिरं तु क्रमशः सम्पन्नं विश्रुतं चावर्धत। कालान्तरे स तापस उपरतः। ततः दुर्गाभटनामकः कश्चित् युवा मन्दिरस्याधिकारिणं आत्मानमवबोध्य तस्मिन् जनपदे अमानुषप्रभावः कञ्चित् कालं व्यराजत। क्रमेण तस्य जाल्मत्वं जानपदा अवाबुध्यन्त। आयाभावाद् व्ययाधिक्याच्च "देवस्वं" विक्रीय स विललास। अन्ते स अन्धो बभूव। पुत्रकलत्रादिभिरुत्सृष्टः स दण्डावलम्बी भूत्वा अलक्ष्यमितस्ततः पर्यटन् पिपासाकुलः "कस्मिंश्चित् कर्दमाटके पुरा कदापि सञ्चितं कृमिकीटसङ्कुलमभिषेकजलसेकमासाद्य तद्गतमुदकं करपुटैरादायापिबत्"। एवं स्वकृतपापानां फलमखिलमेव सोऽन्वभूत्। अन्ते पश्चात्तापभरितः जगदंबां आत्मानं पूर्ववत्कर्तुं प्रार्थयते। इयदेवात्र कथावस्तु। किन्तु तत्र तत्र दुर्गाभटस्य स्वभावविशेषाणां चित्रीकरणमचुम्बितमेव। काव्यं न केवलं आस्वादनार्थपर्यवसितं किन्तु दुराचारोन्मूलनेन धार्मिकमूल्यप्रचोदकं च भवेदित्यस्माकं मतम्। अयं प्रबन्धः तत् प्रयोजनं निपुणं साधयति। सर्वथा चतुरश्रशोभि स्वतन्त्रमिदं चम्पूकाव्यं कादम्बरीशैलीपरिक्रमणपरिक्षुण्णचरणस्य प्रबुद्धप्रतिभाप्रकर्षस्य कवेर्महान् विजय इति निश्चप्रचमत्र प्रख्याप्यते।

(कामधेनुः)

स्वामिनाथरचनापरिचयः

(डा० रमाकान्त शुक्लः)

डा० सी० आर० स्वामिनाथस्य 'कर्णभूषणम्', 'ध्वस्तं कुसुमम्' 'नरबलिप्रबन्धश्चे'ति तिस्रो रचना अवलम्ब्य संक्षिप्तो विचारविमर्शः क्रियते ।

कर्णभूषणम्

'कर्णभूषणम्' एकाङ्किनाटकमस्ति । अत्र वस्तु प्रख्यातमस्ति । पौराणिकप्रसिद्ध्यनुसारं कर्णः सूर्यसुत आसीत् सूर्येण च सः प्रबोधित आसीदिति वस्तुनः प्रख्यातता । अत्र च पात्राणां न बाहुल्यम् । केवलं पात्रद्वयमेव विद्यते । रसश्च दानवीरोऽत्र । केवलमेक एवाङ्को विलसति । पाश्चात्त्यनाट्यालोचकमता स्थानकार्यदेशान्वितिरपि स्पष्टं प्रतिभासते । संवादानां पात्रानुकूलत्वमवसरानुकूलत्वं चास्ति । अस्याभिनयार्थं न कश्चिद्विशिष्टो रंगमञ्चोऽपेक्ष्यते । यदि कश्चिन्नाट्यनिदेशकः कटकदृश्यार्थं तानि तानि वस्तूनि स्थापयितुमिच्छति तर्हि स एतत्कर्त्तुं स्वतन्त्रः, यदि नास्ति अभिनयकर्तॄणां पार्श्वे सम्भारप्राचुर्यं तदा साधारणेऽपि मञ्चेऽस्याभिनयः कर्तुं पार्यते । विना जवनिकामप्यस्यैकाङ्किनोऽभिनयः कर्तुं शक्यते । रेडियोनाटकरूपेणाप्यस्य प्रस्तुतिः सर्वथा शक्या । तत्र हि चारुत्वसृष्ट्यर्यं 'फ्लैशबैकपद्धत्या' कर्णोत्पत्तिप्रसंगोऽपि प्रस्तोतुं शक्यते ।

श्लोकानामुच्चारणं महाराष्ट्रीयसंगीतकपद्धत्यापि कर्त्तुं शक्यते सस्वरश्लोकपाठकर्तृनटाभावे सारोहावरोहं गद्यरूपेणापि श्लोकपाठोऽनुमतः स्यात् ।

यद्यपि संवादप्रधानमिदं नाटकं तथापि निदेशककौशलात्कार्य (Action)-योजनमपि कर्तुं शक्यते ।

ध्वस्तं कुसुमम्

संस्कृतसाहित्ये 'एलिजी'-काव्यानां नास्ति बाहुल्यम् । डा० त्र्यम्बकगोविन्दमाइणकरकृत'स्मृतितरङ्ग'-प्रभृतयः काश्चनैव शोकगीतयः संस्कृतकाव्यक्षेत्रे दृष्टिपथमवतरन्ति । डा० स्वामिनाथकृतं 'ध्वस्तं कुसुमम्' अस्मिन् क्षेत्रे नवोपहाररूपेण समुल्लसति ।

ध्वस्तकुसुमरचनायाः प्रेरणामवलम्ब्य कविनैव काव्यारम्भे संकेतितम् । मया साकमपि तस्य वार्ता जाता । तदनुसारम्, उत्तरभारतस्यैकस्मिन् नगरे कश्चिद् दाक्षिणात्यो युवा शासकीयपदमधितिष्ठति स्म । स हि 'आई. ए. एस.' इत्युपाधिसमलंकृत आसीत् । तत्रैव काचित्काश्मीरिकपण्डितकुलोद्भवा बाला तस्मिन्ननुरक्ता । द्वयोरपि प्रेम समजनि । विवाहार्थं प्रथमं वरपक्षीया गुरवोऽसहमता आसन् किन्तु कवेरेव प्रयत्नेन पुनस्ते सहमता बभूवुः । यस्मिन् दिने स युवा पित्रोराशिषं गृहीत्वा जीपमारुह्य कन्यायै विवाहानुमतिरूपशुभसन्देशं दातुं समायाति स्म तस्मिन्नेव दिने मार्गे स दुर्घटनाग्रस्तो भूत्वा पञ्चत्वं गतः । कविना यदायमुदन्तः श्रुतस्तदा सः भावविह्वलः संजातः । तस्य भावोद्रेकः 'ध्वस्तकुसुम'-रूपेणाभिव्यक्तः ।

रचनेयं रसानुकूलप्रसादगुणोपेता । नात्र कवेर्विकटबन्धनिर्बन्धपरता दृश्यते । नात्र केवलमितिवृत्तमात्रनिर्वाहेच्छा अपितु तद्व्याजेन सुकुमारभावोद्गिरणेच्छा कवेः दृश्यते । अन्ते च कवेरास्तिकता व्यज्यते ।

नरबलिप्रबन्धः

'नरबलिप्रबन्धः' केरलेषु चाक्यारनटानामुपयोगाय रचितानां प्रबन्धाभिधानानां गद्यपद्यात्मकलघुकाव्यानां परम्परायामभिनवः प्रयोगः । डा० स्वामिनाथः केरलरत्नभूतोऽस्ति, अतस्तत्साहित्यपरंपराया वर्धनं कर्तुमस्य नैसर्गिकी प्रवृत्तिरुचितैव ।

प्रबन्धस्य प्रस्तुतिः केनचिदनुरूपपदवाक्योच्चारणज्ञेन हावभावप्रदर्शकेन वाचकेन क्रियते । तेन विकटबन्धोच्चारणज्ञेन रसव्यक्ति-

समर्थनं च भाव्यम् । नरवलिप्रबन्धस्य रचना 'प्रबन्ध' प्रस्तुत्यनुसार-मेव कृतास्ति ।

अस्य कथानकं नेपालदेशजनानुश्रुतिमनुसृत्योपन्यस्तम् । कविना स्वकल्पनाकौशलं यत्र तत्र चारु प्रदर्शितम्, अन्ते च भक्तिभावस्योदयः कृतः ।

ओजोगुणमयी समस्तपदशय्या अवलोकनीया विद्यते । तोटकच्छन्दसः प्रयोगस्त्वतीव गतिमान् । दुर्गास्तुतिप्रसंगे शार्दूल-विक्रीडितमतीव समीचीनतया प्रयुक्तम् ।

शीर्षकोऽस्ति समुत्सुकतावर्धनकरः । प्रबन्धान्तं यावच्छ्रोता समुत्सुकस्तिष्ठति, किन्तु कविः स्वकौशलेन श्रोतृशंकितां वीभत्सतां समुदेतुं नानुमन्यते ।

(अर्वाचीनसंस्कृतम् २/३, १५-७-१९८०)

सहृदयवयस्यो डा० स्वामिनाथः

(डा० त्रि० ना० धर्माधिकारी, सचिवः, वैदिकसंशोधनमण्डलम्,
तिलकविद्यापीठनगरम्, पुणे-36 (महाराष्ट्रम्)]

डा० स्वामिनाथन् महाशयाः न केवलं शासकत्वेन संस्कृतानुरागिणां परिचिताः किन्तु सहृदयवयस्यत्वेनापि । तेषामयमपरो विशेषः यत् वेदेषु संस्कृते च तेषां द्रढीयसी श्रद्धाऽस्ति। लेख्यः अस्मत्प्रणामाः कृपया निवेद्याः ।

।। विजयतां संस्कृतश्रीः ।।

धेनुर्वागस्मानुपसुष्टुतैतु ।

संस्कृतसाहित्यपरिषत्, त्रिशिरः पुरी

।। विरुदसंमाननपत्रम् ।।

परिषदोऽस्याः षट्चत्वारिंशवार्षिकोत्सवानुबन्धतया प्रवर्त्यमाने
विद्वत्सदसि

ब्रह्मश्रीयुत सि० आर्० स्वामिनाथार्य महाशयेभ्यः

संस्कृतप्रसाररक्षकः

इति विरुदं मुदितान्तरङ्गा समर्प्य आत्मानं कृतार्थयति ।

त्रिशिरःपुरी, गो० सुन्दरम्

१६-९-१९८४ अध्यक्षः, संस्कृतसाहित्यपरिषत् ।

ALL INDIA BRAHMIN FEDERATION
Regd. No. 193 / 1924

Secretary General
V. S. MANI IYER
2/182, NEW KALPATHY
PALGHAT - 678003
PH : NO. 3513

Date 14.3.1985

MASSAGE

I know Dr. Swaminathan from school days. Even as a student he used to discuss Vedas, Upanishads and Puranas with senior scholars in Palghat which at that time was really a citadel of Vedic Culture and learning, Later Dr. Swaminathan joined Presinency Collage, Madras from were he took his Master's Degree in Sanskrit. Dr. Swaminathan even today considers himself only as a student and his love for Sanskrit and his devotion to the language are worth emulating by students studying Sanskrit. Dr. Swaminathan I know has been pained over the fall in standards, moral and he has boldly announced that this is due to the neglect of Sanskrit and Sanskrit studies.

I am not competent or proficient to write about his writings but I know that Dr. Swaminathan has been doing every thing he can to give recognition to Sanskrit scholars in the Country by persuading the Government to give awads and monetary grants from time to time, The Vidya Peeths he has established in Kerala in Balussery and Pavaratti are results of Dr. Swaminthan's passion for Sanskrit.

An ardent devotee ond disciple of both the Sankaracharyas in the South Dr. Swaminathan is held in very high esteeem by both the Acharyas, and he has their blessings.

I hope the Government and lovers of Sanskrit will utilise the knowledge and skills that Dr. Swaminathan possesses for restoring the pride of place to Sanskrit in the Country of ours.

V. S. Mani Iyer

स्वामिनाथरचनावली

पशुपतिपञ्चास्यस्तवः

सदा सद्योजातस्मितमधुरसास्वादपरया
भवान्या दृक्पातभ्रमरततिभिश्चुम्बितपुटम् ।
अपां पत्युः काष्ठां श्रितमधिकशीतं पशुपते-
र्मुखं सद्योजातं मम दुरितजातं व्यपनयेत् ॥१॥

जटान्तः स्वर्धुन्याः शिशिरमुखवातैरवमतिं
गतां वामां रुष्टामनुनयसहस्रैः प्रशमितुम् ।
किरज्ज्योत्स्नं वामं नयनमगजानेत्रघटितं
दधद्वामं वक्त्रं हरतु मम कामं पशुपतेः ॥२॥

गले घोरज्वालं गरलमपि गण्डूषसदृशं
निदाघान्ते गर्जद्घनवदतिनीलं वहति यत् ।
निरस्तुं विश्वाघप्रचयमधितिष्ठद्यमदिशं
ह्यघोरं तद्वक्त्रं हरतु मम मोहं पशुपते ॥३॥

पुमर्थानां पूर्त्ति प्रणतशिरसां दातुमनिशं
जलाभावो माभूदिति शिरसि गंगां वहति यत् ।
सुरेशाशास्फूर्ति मुकुटशशिभासा किरति यत्
मुखं तत्पुंरूपं हरतु मम तापं पशुपतेः ॥४॥

महेशो दैत्येशो निशिचरकुलेशः परशुधृग्
वृषेशो दुर्वासाः कलशमुनिपत्न्यत्रितनयाः ।
यदूर्ध्वांशुव्रातै[1]श्शिवचरितवन्तः परिणताः
तदैशानं वक्त्रं हरतु भवपाशं पशुपतेः ॥५॥

(१९६५)

---

१. नेपाले पशुपतिनाथमन्दिरे भगवतः ऊर्ध्ववक्त्रे चन्दनलेपननिर्मिते यन्त्रे देव्यास्त्रिपुरसुन्दर्या पूजा विधीयते । तत्र शिवशक्त्योस्सामरस्यमुपास्यते । अतस्तन्त्रमार्गप्रवर्त्तकाः महेश्वर - बाण - रावण - भार्गवराम-नन्दिकेश्वर-दुर्वास-लोपमुद्रा-दत्तात्रेयाः भगवत ऐशानं मुखमाराध्य सिद्धिं गतवन्तः ।

जीर्णोपधानम्

पूर्वं दुकूलवसनः परिपुष्टगात्रः
कीर्णस्सुमैस्सुरभितस्सुभगो मनोज्ञः ।
अद्योपधान ! परिजीर्णदशामुपेत-
स्तैलानुलेपनजचिक्कणगन्धवाहः ॥१॥

रन्ध्रप्रसारिपिचुलो मललिप्तगात्रः
कार्श्यं वहन् कृपणवत् त्वमनावृताङ्गः।
हा हन्त ! दग्धविधिना गमितोऽस्यवस्था-
मेतादृशीं परिभवैकनिदानभूताम् ॥२॥

उन्मार्ज्य पाणियुगलं स्पृहणीयकान्ति
स्प्रष्टुं व्यवस्यति पुरा भवदीयगात्रम् ।
किन्त्वद्य हन्त ! भवदङ्गसमागमश्चे-
त्प्रक्षाल्यतां ध्रुवमुपैति हि पाणियुग्मम् ।३॥

हन्तोपधान ! पदमुच्छ्रितमाश्रितस्त्वं
नारीमणेरुवहिथानिशमुत्तमाङ्गम् ।
यस्याः प्रसूनशयने परिलालितस्य
भाग्यक्षये मनसि कस्य रुजा न भूयात् ॥४॥

सम्मर्द्दितो रतविधौ मलिनीकृतस्त्वं
त्यक्तोऽद्य जीर्ण इति निष्करुणं तरुण्या ।
स्वार्थाप्तयेऽन्यमुपयुज्य कृते च कार्ये
भुक्त्वोज्झितं स्मरति नैव कृतघ्नलोकः ॥५॥

यान्तीं पितुर्निलयतः श्वशुरस्य गेहं
शय्यासखो नववधूं त्वमनुप्रयातः ।
सम्बन्धिभिर्बहुमतस्य तत्राहूयतां को-
ऽप्यद्य स्मरेत् किम् विधौ प्रतिकूलभाजि ॥६॥

संस्थापितो महितमञ्चतले तदानीं
साक्ष्यं वहन् निधुवनप्रथमावतारे ।
किं किं न गूहसि रहस्यविचेष्टितानि
विश्वस्तयोर्युवति-कामुकयोस्त्वमन्तः ॥७॥

उद्दामवेगपरिचुम्बनखण्डितौष्ठां
कर्त्तुं व्यवस्यति यदा रमणो नवोढाम् ।
दूरीचकार रदनादधरं मृगाक्षी
त्वय्येव मग्नवदना चकिता शरण्ये ॥८॥

स्वैरं विहृत्य रतिकेलिभिराऽनिशान्तं
चित्ते न तृप्यति तनौ स्वयमस्तशक्तौ ।
विश्रान्तया त्वबलया तव संगमेन
ह्यक्लिष्टभोगमपरिक्षतमन्वभावि ॥९॥

अन्याप्रसक्तमवबुद्ध्य पतिं स्वकीयं
तत्सान्त्वनेषु विमुखी तरुणी च चण्डी ।
नैराश्यमस्य निजतुल्यमिवाभिशिक्षन्
त्वय्येव चातुर ! निबद्धनिजाधराभूत् ॥१०॥

दाक्षिण्यलब्धसुरतोत्सवसूत्रधार-
पात्रः स्वपूर्वचरितं परिभाव्य नूनम् ।
तूलच्छलेन हससीव जरार्दितोऽपि
चिन्तापथेन पुनरेति हि यौवनं स्वम् ॥११॥

यद्वा बहिः कनकभूषणचीनपट्टै-
स्संभूषितान् कलिमलप्रविलिप्तचित्तान् ।
दृष्ट्वा खलान् स्वयमतीव विशुद्धचित्तो
नूनं न पारयसि हासनिगूहने त्वम् ॥१२॥

पश्यन्नरान् प्रतिदिनं विशतोऽन्तकास्यं
शेषाः कथं स्वकतनौ कलिताभिमानाः ।
इत्थं विचिन्त्य हससि ह्युपधान नूनं
जीर्णोष्ठरन्ध्रविलसत्पिचुदन्तकान्त्या ॥१३॥

सम्यक् प्रपुष्टमतिमानुषभोगजुष्टं
नारीजनेष्टमपवारितसर्वरिष्टम् ।
गात्रं प्रभोरपि कृतान्तमुखोपकण्ठे
यातीदृशीं गतिमिति त्वमुपात्तहासः ॥१४॥

संप्राप्य यस्त्वमरिणाप्यनुशोचनीयां
कष्टां दशां न शुचमेषि परन्तु हृष्टः ।
जातं तदेव सुखदुःखसमत्वबुद्ध्या
निर्णायकं तव जितेन्द्रिय ! योगिवर्य ॥१५॥

स्वच्छन्दमृत्युरपि जीर्णकलेवरं त्वं
वोढाऽसि मादृशजनान् प्रतिबोधयिष्णुः ।
अद्वैतभावमधिगम्य यदाप्तकामोऽ-
प्यन्यार्थमेव वहतीह शरीरभारम् ॥१६॥

जीर्णोपधान ! जयतात् जितजन्ममृत्यु-
र्निष्कामसेवनपटो जय कर्मयोगिन् ।
जीयाः परार्थधृतजन्मवतां हि चर्याः
यावत् क्षितौ कविगिरां विषयीभवन्ति ॥१७॥

काकग्राही

(यः कश्चित्पुरुषः स्वार्थलाभाय यं कमपि प्रभुम् उच्चाधिकारिणं वा सर्वदा श्लाघयन् तद्दत्तैः द्रव्यादिभिरुदरम्भरी भवति सः "काकग्राही"ति द्रविडभाषायां परिहासपात्रं भवति । तमधिकृत्यायं श्लोकगुच्छः ॥)

अधिकृतमनुगच्छन् दर्शयन् दन्तपङ्क्तिं
तदुदितमनुमोदन् वास्तवं वाऽप्यसत्यम् ।
प्रथितकुटिलकर्मा वायसग्राहकाख्यो
भुवनविदितवृत्तो कस्य न ज्ञातपूर्वः ॥१॥

न हि स वहति जालं व्याधकर्मानुरूपं
न धनुरपि न चेषून् नाऽपि तूणीरपाशौ ।
अटति न च वनान्ते किन्तु तत्तुल्यकाक-
ग्रहणविषयदक्षो नैव जातो निषादः ॥२॥

निजहितमनुपुष्णन् क्रीतचित्तोऽस्तलज्जो-
प्यभिमतवचनौघैः स्वामिसन्तोषमृच्छन् ।
तदनभिमतवार्त्तां कण्ठलग्नां नियच्छन्
चरति भुवि निकामं वायसग्राहकोऽसौ ॥३॥

दिवि विलसति मध्ये सप्तसप्तौ दिनार्धे
वदति यदि धनाढ्यो यामशेषा निशेति ।
समयगणितशास्त्रे नैपुणी तेऽप्रतर्क्ये-
त्यतिशयमुखरं तं स्तौति मोहान्धदृष्टिम् ॥४॥

खलमपि धनवन्तं धर्मपुत्रीकरोति
प्रकटितनिजमौर्ख्ये गीष्पतित्वं व्यनक्ति ।
कृपणजनधुरीणं स्तौति कर्णेन तुल्यं
कविवचनसमानालङ्कृतिप्रोतवाचा ॥५॥

परभृत इव काकग्राहकोऽप्यन्यपुष्ट-
स्त्वपरभृतकवर्गात् भेदयन् स्वामिनं स्वम् ।
प्रकटितनिजिभक्तिर्गूहितस्वार्थसक्तिः
कलमधुरवचोभिः कस्य तृप्त्यै न वा स्यात् ॥६॥

धनिकहृदयगर्वं वर्द्धयत्यन्वहं तद्-
वितरितधनकेशैः पूरयत्यात्मकुक्षिम् ।
श्रमजलमनिषिञ्चन् क्लेशलेशं विनाऽसौ
पणितनिजनरत्वो जीवति त्यक्तलज्जः ॥७॥

विलम्बी द्वारेषु प्रभुगृहगतश्चर्मचटक-
स्सदा तस्योपान्ते मशक इव कर्णेजपपरः ।
परौन्नत्यापातौ किरति वचसा पल्लिवदसौ
अपूर्वोऽयं सर्पो रिपुकुलमदष्टं विधमति ॥८॥

जयति जगति काकग्राहको निःसमानः
परशतविनिपातादात्मसौख्यं प्रपुष्णन् ।
विरलसुजनलोके नैजवाचां विलासै-
स्सृजति खलु बहून् यस्सज्जनान् धर्मगुप्त्यै ॥९॥

वेदविद्भ्यो नमः

श्रुतिप्रतिष्ठानिरतैर्द्विजाग्र्यै-
रधीतिबोधाचरणैकनिष्ठैः ।
अकिञ्चनैरप्यतिपुण्यभाग्भि-
स्संरक्षितेयं खलु वेदमाता ॥१॥

आशैशवादध्ययनैककृत्यै-
राबाल्यमाचाररतैरतन्द्रैः ।
आयौवनान्तं विमुखैर्धनार्जने
पवित्रितेयं खलु भारतावनिः ॥२॥

श्रुतश्रियोर्नित्यविरोधितायां
श्रुतं श्रयामो न रमां भजामः ।
इति प्रतिज्ञामनुपालयन्तो
महीसुराः कस्य न वन्दनीयाः ॥३॥

अपौरुषेयानखिलप्रमाणान्
इहाप्यमुत्रापि शुभंकरिष्णून् ।
आम्नातशब्दान् हृहि ये धरन्ति
तेभ्यो नमो वैदिकतल्लजेभ्यः ॥४॥

अकृतकपदगुम्फैर्मूर्त्तिमद्दैवतौघैः
मधुरिमधुरिगण्यैर्मङ्गलैर्मञ्जुनादैः ।
श्रवणयुगलपेयैर्मार्जकैः कश्मलानां
क्षितिसुरवदनोत्थैर्भाग्यवन्तो रमन्ते ॥५॥

व्यासस्तुतिः

व्यस्ता वेदास्तदास्तामुपनिषदुदितास्सूत्रितास्तत्त्वमुख्याः
ध्वस्तं ध्वान्तं, कुरूणां चरितमपि महाभारताख्यं निबद्धम् ।
न्यस्तो धर्मः पुराणेष्वतुलितकृपया येन चाष्टादशषु
कस्तं स्तोतुं समर्थो निगम-जलनिधेर्मन्थने मन्दराद्रिम् ॥१॥

यस्सर्गप्रतिसर्गवंशचरितं मन्वन्तराणां कथाः
वंशानामनुवर्णनाः भगवतो दिव्यावतारान् शुभान् ।
आचण्डालमथायतीन्द्रमुचितान् आचारभेदांस्तथा
सत्पौराणिकसूक्तिभिर्व्यरचयत् तं नौमि पाराशरिम् ॥२॥

क्वचिन्मातुः प्रीत्यै हिमकिरणकुलस्याङ्कुरं वर्द्धयन्तं
क्वचिद्व्यस्यन् वेदान् श्रुतिशिखरगतं तत्त्वमासूत्रयन्तम् ।
क्वचिच्छिष्यान् गोपीजनरमणकथाः श्रावयन्तं स्वसूनौ
शुके ब्रह्मीभूय व्रजति सुतधिया तस्य पश्चाच्चरन्तम् ॥३॥

क्वचिद्धर्मान् नित्यान् वनभुवि वसतः पाण्डवान् बोधयन्तं
क्वचिच्चाख्यानं तत् कुरुचरितमयं लेखयन्तं गजास्यम् ।
क्वचिद्वादव्याजाच्छिवगुरुजनुषः सूत्रभाष्येषु शङ्कां
निरस्यन्तं व्यासं भजत घनरुचिं ज्ञानशक्तिस्वरूपम् ॥४॥

देशिकरूपिण्यै मात्रे नमः

(नवरात्रपूजाकाले श्रीकाञ्ची-श्रीचरणानां वपुषि त्रिपुरसुन्दरीं प्रत्यक्षीकृतवता रचितानि पद्यानि ।)

मातश्चेतसि मे वसन्ति बहवः कामादयश्शात्रव-
स्तेषां ज्ञानमुषां मतिं छलयतां यो दुष्करो निग्रहः ।
सोऽयं माहिषमासुरं रिपुवपुर्निष्पाद्य तच्छोणित-
स्फीतालंकृतहस्तया सुकर इत्येषोऽस्ति मे निश्चयः ॥१॥

मातर्मामकदर्विधेर्विलसितैर्दारिद्र्यदुःखादिभि-
र्धर्मापेतकुमार्गमार्गणपरैर्नाशाय संचोदितः ।
विष्णोर्वक्षसि नित्यवासरतया संप्रेक्षितश्चेत्त्वया
धन्योऽहं भविता न वेद्मि सुलभं तस्मादुपायान्तरम् ॥२॥

मातर्मोहमहान्धकारभरिते दुष्कर्मकान्तारभू-
मध्ये दिग्भ्रममावहन्नशरणस्तप्ये शिशुर्मूढधीः ।
वीणापुस्तकमण्डितात्तव कराच्चिन्मुद्रयालंकृता-
न्मन्ये नान्यदिहास्ति दक्षमवनावुद्धारणे मादृशः ॥३॥

मातश्चित्तवचःप्रवृत्तिजनितान् पापानुमे नाशय
दुर्गे ! दानवदुर्मदप्रशमिनि ! क्रोधं ममोत्सादय ।
वाणि ! प्राक्तनवासनामलचयं ज्ञानाम्भसा क्षालय
लक्ष्मि ! त्वत्पदपङ्कजे मधुकरावस्थां ममाङ्गीकुरु ॥४॥

मातश्शम्भुरुषाग्निदग्धमदनप्रोज्जीवने या त्वरा
या रुद्यद्द्रविडार्भकं प्रति पुरा स्तन्यप्रदाने कृता ।
या मूकं कविसार्वभौमपदवीसंप्रापणे दर्शिता
सैवाद्यापि मदीयरक्षणविधौ सन्दर्शनीया त्वरा ॥५॥

मातस्त्वं प्रकृतिस्त्वदीयमखिलं यन्मायिकं दृश्यते
मोक्षोऽस्स्मात् त्वदधीन इत्यपि मया सद्भ्यो बहुभ्यः श्रुतम् ।
मोक्षादूर्ध्वमपि त्वदीयमहिमासान्निध्यबोधच्युति-
स्स्याच्चेन्नैव वृणोमि मुक्तिमपि यन्निःश्रेयसं ह्यन्यथा ॥६॥

मातस्संप्रति वामभागकलितत्वद्रूपसंशोषित-
क्रोधः शम्भुरसौ किरत्यवितथां तां शंकराख्यां निजाम् ।
नो चेन्मन्युमयो जगल्लयकरः क्वासौ विषादी महा-
रुद्रो भीकरताण्डवो जनिजुशमासेव्यतां यास्यति ॥७॥

मातस्त्वत्करुणारसामृतझरीधौताघमात्मानम-
प्यानेतुं तव पादपद्मसविधे मय्यस्ति रूढा स्पृहा ।
सोऽहं दुष्कृतकण्टकैरभिवृतो नैव स्वयं पारया-
म्युद्धर्तुं तव दृष्टिपातसरणीनिःश्रेणिलब्धिं विना ॥८॥

मातर्देशिकतां गतां तव कलां श्रीमज्जयेन्द्राभिध-
स्वेच्छाशक्तियुतां समस्तजगतां क्षेमंकरीं शाङ्करीम् ।
पीठे स्कान्दपुराणगीतविभवे श्रीकामकोट्याह्वये
भ्राजन्तीं भजतामघौघशमनीं चिद्रूपिणीं भावये ॥९॥

आचार्यस्तवमणिमाला

दीप्तीकुर्वन्नगरमभितः पादरेणुस्फुलिङ्गै-
स्सार्थीकुर्वन्निजकरुणया शङ्करीं शङ्कराख्याम् ।
दूरीकुर्वन् दुरितजनितान् भक्तचित्तान्धकारान्
विश्वोत्कृष्टं विलसतितरां कामकोटिप्रदीपः ॥१॥

श्रुत्यन्तेषु मनस्सु संयतधियां, सत्रेषु सम्यग्घुते-
ष्वध्यात्मे दृढलग्नहृत्सु, विधिना दत्तेष दानेष्वपि ।
यद्भानौ च विभाति धीर्विशदयन् भर्गो वरेण्य नृणां
दिष्ट्या तद विषयं गतो नयनयोराचार्यरूपं महः ॥२॥

किरीटं रौद्राक्षं शिरसि यतिदण्डं करतले
मुखे मन्दस्मेरं सितभसितलिप्त च निटिलम् ।
दयाक्ष्मणोः कोणे प्रणतजनसौभाग्यजननीं
वहन्नस्मद्भाग्यं चरति यतिरूपेण भुवने ॥३॥

आनन्दवर्षिनिजवीक्षणपातमात्र-
प्रोच्चाटिताश्रितहृदिस्थमहान्धकारम् ।
उद्धर्तुकाममखिलानुपदेशवाक्यै-
राचार्यपादमपुनर्भवहेतुमीडे ॥४॥

श्रीजयेन्द्रवन्द्यमानपावनाङ्घ्रिपङ्कजं
पाणिपल्लवावसक्तयोगदण्डमण्डितम् ।
भस्मरागभूषिताङ्गमर्चितेन्दुशेखरं
चन्द्रपूर्वशेखरेन्द्रदेशिकं तमाश्रये ॥५॥

द्वैतहीनवेदतत्त्वबोधनेन सन्ततं
लोकहृद्गतान्धकारकृन्तने कृतत्वरम् ।
रुद्रनेत्रभूषिताङ्गमद्रिजाङ्घ्रिषट्पदं
चन्द्रपूर्वशेखरेन्द्रदेशिकं तमाश्रये ॥६॥

बिल्वपत्र मण्डितोत्त माङ्गसङ्गितेजसं
व्युप्तकेशमस्तपाशमाशुतोषरूपिणम् ।
कामकोटिपीठमध्यवासिनं जगद्गुरुं
चन्द्रपूर्वशेखरेन्द्रदेशिकं तमाश्रये ॥७॥

नमस्संयमीन्द्राय शान्तान्तराय
नमस्सच्चिदानन्दरूप रताय ।
नमः श्रीजयेन्द्रेण संपूजिताय
नमश्चन्द्रचूडेन्द्रयोगीश्वराय ॥८॥

आनन्दाब्धेस्सम्भरन्नच्छमम्भः
प्रादुर्भूतः कामकोट्यद्रिशृङ्गे ।
ज्ञानासारैः कर्मघर्माभितप्तान्
सिञ्चत्यस्मान् शङ्कराचार्यमेघः ॥९॥

(१९५९)

आचार्यसूक्तिमुक्तावली

यद्वर्णाश्रमसंविभागघटितो धर्मो भवेच्छाश्वतं
ह्यन्यत्सर्वमुदेति नूनमचिरान्नाशं प्रयाति स्वयम् ।
तस्माद्वैदिकधर्ममार्गपरता नैवोज्झितव्या जनै-
रित्यस्माननुशासते प्रतिदिनं तुभ्यं गुरो मे नतिः ॥१॥

संप्रार्थ्यो यदि नस्ततस्स भगवान् सर्वज्ञतां नार्हति
तोष्यश्चेत्स्तुतिभिः कथं स भुवने भिन्नो धनाढ्यान्नरात् ।
कार्तज्ञस्य निवेदनाय च मनःकापेयताशान्तये
वन्द्यो ह्रीश्वर इत्युदीरितवते तुभ्यं गुरो मे नतिः ॥२॥

वेदान्तेषु यदामनन्ति तदिति स्मृत्यादयो यत्पराः
यच्चान्ते परिशिष्यते लयविधौ भिन्नेष्वभिन्नं च यत् ।
यत्तत्वं भुवनग्रसिष्णु निखिलं यस्मिन् प्रतिष्ठां गतं
तत्त्वं नाऽपरमित्युरीरितवते तुभ्यं गुरो मे नतिः ॥३॥

केने यक्षमुदीरितं दिविषदां गर्वापनोदाय यत्
तद्ब्रह्मेत्यवबोधयच्छतमखं गौरी हिमाद्रेस्सुता ।
यैवं वेदशिखोपगीतविभवा ज्ञानार्थिनस्तामुमां
संसेवध्वमिति प्रचोदितवते तुभ्यं गुरो मे नतिः ॥४॥

योगो नाम वियोग एव मनसो दुःखस्य संयोगतो
नोर्ध्वं गच्छति नाप्यधः पतति यो योगी विमुक्तिं गतः ।
यद्वन्मुञ्चति बन्धनं फलगतं ह्यौर्वारुकी वल्लरी
तद्वत्त्र्यम्बकसेवकं मृतिरिति प्रोवाच यस्तं भजे ॥५॥

ढक्का नृत्तसमुद्धृता शिवकरे द्विःसप्तकृत्वोऽनदत्
तस्मात्पाणिनिनादजातमखिलं सूत्रस्वरूपं गतम् ।
तद्भाष्यं समभूत्पतञ्जलिचलन्मञ्जीरशिञ्जारवा-
दित्थं शब्दजनिं निरूपितवते तुभ्यं गुरो मे नतिः ॥६॥

सर्वस्य दुःखस्य हि मूलकारणं
कामश्च कालो भुवि जन्मभाजाम् ।
तस्मात्स्मरध्वंसिनमन्तकान्तकं
भजध्वमित्युक्तवते नमस्ते ॥७॥

देहोत्पत्तिविपत्तिचक्रवशगो जीवश्चिरं भ्राम्यति
सौषुप्तोऽस्य विराम एव विलयः संहाररुद्रे शिवे ।
प्रालेया करुणा समं जनिजुषां तापं व्यपोहत्यतः
शंभुर्वन्द्यतमस्त्विवतीरितवते तुभ्यं गुरो मे नतिः ॥८॥

मनःकुरङ्गं चपलं करेण
नियम्य संवीतकरीन्द्रचर्मा ।
हृदि स्थितः पञ्चमुखः शिवश्चेत्
न भीरिति प्रोक्तवते नमस्ते ॥९॥

स्मरकरगतचापं पञ्चबाणांश्च धृत्वा
स्वयमथ परमेशं मोहयन्ती स्मरारिम् ।
प्रणतजनहृदिस्थं कामभुच्छोषयन्तीं
भजति गिरिसुतां यस्सद्गुरुस्तं नमामि ॥१०॥

दयापूर्णैर्दीर्घैर्दुरितदमनैर्दुःखदलनै -
स्तवापाङ्गैर्दीनं स्नपय कृपया मामपि गुरो ।
न ते काचिद्धानिर्मम भवति लाभोऽपि परमः
समं शिष्टाशिष्टौ शिशिरयति राकाहिमकरः ॥११॥

जयति जयेन्द्रः

ब्रह्मानन्दमहोदधिं यतिवरं संसार-कालानला-
ल्लोकान् रक्षितुमात्तमर्त्यवपुषं श्रीमज्जयेन्द्राभिधम् ।
नास्तिक्यान्धतमोऽपनोदनविधावद्वैतसूर्यायितं
शंभोश्शांकरमानमामि महसं श्रीकामकोटिस्थितम् ।१।

गुरुपादसरोरुहबद्धदृशं
वरशङ्करदेशिकपीठगतम् ।
जनमानसमानसहंसममुं
परहंसमहं सततं कलये ॥२॥

विफलीकृतमन्मथबाणचयं
सफलीकृतदेशिकचित्तगतम् ।
अधरीकृतभृङ्गमपाङ्गदृशा
विमलीकृतशिष्यचयं कलये ॥३॥

जय जयेन्द्र ! यतीन्द्र ! जनप्रिय
गुरुकृपाम्बुधिचन्द्र चिरं जय ।
जयतु शाङ्करपीठमिदं सदा
विजयतां गुरुवंशमिदं सदा ॥४॥

श्री राघवः पद्मभूषणम्

(डा० वी० राघवन्-महोदयानां "पद्मभूषण" विरुदप्रदानमुपलक्ष्य)

शिष्या वयं प्रमुदिता बहुशोऽस्मदीय-
भाग्यातिरेकमनुचिन्त्य च साभिमानाः।
यत्पद्मभूषणविभूषितकीर्तिभाजः
श्रीराघवार्यचरणाः गुरवो जयन्ति ॥१॥

सङ्गीतं बहुमानितं कविगिरां संभावितं गौरवं
पूज्यं स्थानमुपाश्रिता भुवि पुनः सा वृत्तिराध्यापिकी।
साहित्यं च सभाजितं द्रविडभूपाण्डित्यमामोदितं
यत् श्रीराघवपण्डिता बहुमताः पद्माद्यभूषाख्यया ॥२॥

श्रीपाददामोदरसातवलेकराभिनन्दनम्

आम्नायजातमखिलं यमुपेत्य कृष्ण-
द्वैपायनं गतयुगे गतभीर्बभूव ।
प्राप्ते कलौ खलजनप्रचुरे च लोके
दामोदरादितरमादरदं न वेत्ति ॥१॥

परं वृद्धभावेऽप्यनल्पप्रयत्नः
सदा सप्रयत्नोपि निःस्वार्थशीलः ।
अतन्द्रस्वभावो मधुस्यत्युपेत्य
स दामोदरः षट्पदो वेदपद्मम् ॥२॥

येषां चित्ते भरतधरणीसंस्कृतिर्जागरूका
येषां गोत्रप्रवरसरणिः स्मारयत्याढ्यतां स्वाम् ।
येषां वेदध्वनिमुखरितं भाति चित्तं सदैव
श्रीपादार्ये द्विजकुलमणौ तेऽधमर्णा हि सर्वे ॥३॥

यन्निःश्वासमया गिरोऽतिगुरवो नैजप्रमाणायिताः
धर्माधर्मविवेचनैकनिकषाः कालत्रयेऽप्यक्षराः ।
सोऽयं सर्वगतः पुराणपुरुषः स्वाम्नातमारक्षितुं
श्रीपादाङ्कितदामपूर्वमुदरं पायात्सहस्रं समाः ॥४॥

शंकर एकेडमी

(एतन्नाम्न्याः संस्थायाः दिल्ल्यां स्थापने रचित श्लोकः)

उद्धर्ता वेदराशेः प्रणतजनमनोमोहतामिस्रभेत्ता
काञ्च्यां श्रीकामकोट्यां लसति गुरुवरश्शेखरश्चन्द्रपूर्वः ।
यज्ज्योत्स्नामण्डलान्तः स्फुरति गुणमयी शंकराकेडमीयं
पुष्णात्वस्मासु संस्था गुरुचरणरतिं वेदमार्गे च सक्तिम् ॥

गुरुपवनपुरेशस्तवः

श्रीनारायणभट्टपादकविता यस्याङ्घ्रिपङ्केरुहे
शिञ्जन्नूपुरतां गता सुकृतिनश्शब्दापयत्यन्वहम् ।
आञ्जं माधवभूसुरेण घटितं यन्नामसङ्कीर्त्तनं
कर्णे कुण्डलयुग्मतां व्रजति तं वातालयेशं भजे ॥१॥

नाऽहं भट्टतिरिर्यदीयगद्यजश्शोको गतः श्लोकतां
नास्ति श्रीधरपण्डितस्य धिषणा व्यासोक्तिविश्लेषणे ।
पून्तानस्य निसर्गभक्तिरपि मे नास्ति त्वदङ्घ्रिद्वये
नाहं वेद्मि कथं च केन च भवत्कारुण्यमासादये ॥२॥

मम दुरितशतेभ्यो भीतभीतास्त्वदन्या
ह्यभयवरदहस्ता देवताः किं नु मे तैः ।
मदवनविषये ते साहसं नैव कुर्यु-
र्वरद तव पदाब्जान्नास्ति मेऽन्यच्छरण्यम् ॥३॥

परम तव गुणज्ञान् पासि किं तत्र चित्रं
तव गुणचरिताभ्यां सर्वथा दूरसंस्थम् ।
पवनपुरपते ! मां नोद्धरेश्चेत्त्वदीयो
वरदविरुद एषः दीनबन्धोमृषा स्यात् ॥४॥

गुरुपवनपुरेश ! त्वत्पदाम्भोजयुग्मे
व्रजतु मधुकरत्वं मानसं मामकीनम् ।
शुकमुखकमलोत्था यत्र पीयूषधारा
जनिमृतिभयरोगोन्मूलनी नित्यलभ्या ॥५॥

कुसुमसहचरं ते कोमलं पादयुग्मं
वसति हृदि कथं मे ह्यश्मसारे कठोरे।
इति यदि विचिकित्सा, त्वत्पदान्निष्पतन्ती
सुरसरिदुपलानां चूर्णने दृष्टवीर्या ॥६॥

प्रपन्नानामार्त्ति स्मितकिरणजालैः परिहरन्
कराङ्गुल्यभ्यन्तःप्रसृतनवनीतं परिलिहन्।
स्वमायावैचित्र्यभ्रमितखलजन्तून् परिहसन्
जयत्यस्मद्भाग्यं गुरुपवनपुर्यां धृतवपुः ॥७॥

गुरवे नमः

सौलभ्यं मूर्त्तिमत् किं श्रुतिशिखरगतं किन्नु तत्त्वं सरूपं
कारुण्ये कामहन्तुः किमु विहिततनुर्मेदिनीं सञ्चरिष्णुः।
भूयः किं भाष्यकर्तुर्जनिरिदमिति यं वीक्ष्य लोको विकल्पान्
याति, श्री कामकोटिस्थितगुरुतिलक ! त्वां कथं वर्णयामि ॥

यत्कारुण्यसुधार्णवप्रमथनोद्भूतो जयेन्द्राभिधो
विश्वाह्लादकरोऽमृतांशुरनघः प्रोज्जृम्भते पुष्कलः
कामाक्षीदरहासकान्तिनिवहो भस्मत्रिपुण्ड्रायते
यद्भाले तमनन्यधीरुपगतोऽस्म्याचार्यचूडामणिम् ॥

जम्बूक्षेत्रे कृतजलवसतेश्शङ्करस्य प्रियायाः
कर्णभूषाद्वयघटनविधौ चक्षणो यः कराग्रः।
त्रातुं भीतेर्युगपदभिमतान् दातुमस्मादृशेभ्यो
दक्षं यत्तं गुरुवर ! भवतो नौमि पाणिं समुद्रम् ॥

कामाक्ष्याः करुणाब्धिजृम्भणविधौ यत्पूर्णचन्द्रायते
स्वान्तेवासिजयेन्द्रवक्त्रकमलोल्लासाय पूष्णायते ।
शिष्याज्ञानदवाग्निनाशनविधौ यत्कालमेघायते
काञ्चीश्रीगुरुनेत्रकोणजनुषे तस्मै नमस्तेजसे ॥

काञ्चीक्षेत्रे भुवनमहिते कामकोट्याख्यपीठे
कामेश्वर्याः कलितकरुणाम्बोधिकल्लोलरूपाम् ।
काञ्चित्कान्तिं नतजनमनोऽभ्यन्तरे प्रेषयन्तं
आचार्यस्य प्रथितकरुणं नेत्रयुग्मं नमामि ॥

संपुष्णन् श्रुतिमातरं जनमनस्यास्तिक्यमुद्बोधयन्
सिञ्चन् भक्तिलतां सदा करुणया दीनान् समाश्वासयन् ।
शास्त्रज्ञान् बहु मानयन प्रशिथिलान् देवालयान् नूत्नयन्
काञ्चीश्रीगुरुवर्यपादकमलं विश्वं चरन्तं भजे ॥

वात्सल्यम्

अयथावदुक्तपदपङ्क्तिभिर्मुधा
बहुजल्पनाय कृतयत्नमाननम् ।
परिचुम्ब्य वत्सहृदयोत्थितां ह्रियं
परिमार्ज्य कोऽपि सुकृती प्रसीदति ।।१।।

अतिमुग्धमन्दहसितश्रिया ज्वल-
द्वदनं विलोक्य निजनन्दनस्य यः ।
स्मरति व्रजस्थवनिताप्रतारणात्
स्मितशोभिकृष्णवदनं स भाग्यवान् ।।२।।

शिवायनम्

अघोरा घोरा च त्रिपुरहर यत्ते द्वितनुता
श्रुतिप्रोक्ता यद्यप्युभयमपि मन्ये शिवतनू ।
यतस्ते वामार्धे हिमगिरिसुता मङ्गलमयी
तदन्ये लोकानामभयकरमुद्रा विलसति ॥१॥

उद्वेल्लद्युनदी तरङ्गनिचयैर्यन्मस्तकं फेनिलं
यन्नामध्वनिरन्तकस्य हृदयोत्कम्पाय सञ्जायते ।
यन्नेत्रारणिसम्भवे हुतवहे हव्यायते मन्मथ-
स्सोमऽसौ मम भक्तिवार्द्धि विषये सोमायतां शङ्करः ।२।

चूडालंकृतशीतरश्मिशकले फालस्थनेत्रानल-
ज्वालालीढसुमेषुचित्रशलभे वामार्द्धसक्ताबले
नीलाभ्रद्युतिमत्करालगरलच्छायागले मङ्गले
लास्योन्मिश्रितनृत्यकेलिनिरतेचित्तं ममास्तां शिवे ।३।

कन्धरे कालिमा नेत्रयोर्नीलिमा
वक्षसि श्वेतिमा मस्तके चन्द्रमा ।
वामभागे ह्युमा पादयो रक्तिमा
यस्य सोमस्समे भातु चित्ते सदा ॥४॥

किमेषस्ते हासः पुरमथनकृत्ये व्यवसितः
कटाक्षव्याक्षेपो मदनदहने ख्यातमहिमा ।
पदाम्भोजः किं ते यमनियमने दृष्टविभवः
जयन्तीत्थं गौर्यास्सुरतसमये नर्मवचसः ॥५॥

आर्द्रस्ते कचभार एष कथमित्याशङ्क्य सापत्नतां
पृच्छन्तीं गिरिजामपह्नुतिवचो भङ्ग्या समाश्वासयन्।
वर्षासु त्वदुपान्तवासतृषितश्शीघ्रं समभ्यागतः
क्लिन्नोऽस्मीति यदीरितं भगवतो जीयान्मृषाभाषितम्।६।

नेदिष्ठाप्युपगूहिता न हि मया प्रेष्ठाऽपि नो चुम्बिता
विस्रस्तं वसनं तथापि सुरतं संभाव्यते नावयोः।
गार्हस्थ्यं विफलं ममेति गदतः कान्ताविभक्ताङ्गिनो
मिथ्या तद्वचनं हरस्य कलये संसारविच्छित्तये ।।७।।

कपर्दभूतैर्द्युनदीप्रवाहैरपांगयुग्मोत्थकृपातरङ्गैः ।
शिरस्थशीतांशुमरीचिजालैः प्रयागतामेति भवस्य मूर्त्तिः ।।८।।

हेमाद्रिश्चापदण्डो रजतमयगिरिस्तावकी वासभूमि-
र्हैमाद्रिस्ते गृहिण्या जनक इति यतो मित्रभावोऽद्रिभिस्ते।
पापाद्रिं मे ततस्त्वं दलयसि न हर ! त्वत्पदप्रापणे मे
विन्ध्याद्रित्वं गतोऽयं कुरु कलशमुनेः कौशलं विश्वनाथ।९।

स्थविरवृषभयाने भर्तुरुत्सङ्गसंस्था
भुजगततिभिरारात्पीड्यमाना भवानी ।
वसनवसतिहीनं भिक्षुमीशं स्वकीयं
परिगणयति मूर्त्तं प्राक्तनं पुण्यपुञ्जम् ।।१०।।

सुधामधस्तादकरोद्धलाहलो
भुजङ्गमाः भास्वरभूषणायिताः
परेतभूमिर्मणिहर्म्यतां गतो
महेशसङ्कल्पमयेन्द्रजाले ।।११।।

यमस्य पाशः कुसुमस्रगायितो
श्मशानभूतिर्गमितो विभूतिताम् ।
करीन्द्रकृत्तिश्च दुकूलतां गतो
महेशसङ्कल्पमयेन्द्रजाले ।।१२।।

जातकदोषः

भिक्षावृत्तिस्तदपि गरलं भैक्ष्यमेवोपलभ्यं
आशावासो वसतिरनिशं प्रेतभूम्यां कपालिन् !
दारिद्र्यं ते भुवनविदितं यद्यपीत्थं प्रभूतम्
जायायुग्मे तव रतिरहो जातकस्यैव दोषः ॥१॥

जामातुस्ते श्वशुरभवनाद्वस्त्रमेकं न लब्धं
यत्त्वं चार्मं वसनमनिशं देव धत्सेऽतिकुत्सम् ।
आस्तां तावद्धिमकरकरस्यन्दिपीयूषधारां
त्यक्त्वा यत्त्वं गरलमपिबो जातकस्यैव दोषः ॥२॥

धनुर्हेम्नामद्रिर्धनदत्रिभवस्ते करगतः
कुमारस्सेनानीर्दशमुखमुखा पार्षदगणाः ।
पुरारे पत्नी ते नगपतिसुता मंगलमयी
तथापि त्वं भैक्ष्यं चरसि कथमेषा ग्रहगतिः ॥३

अनन्तरत्नप्रभवात्समुद्रादादेयमन्यद्गरलात्त्वेश ।
वस्त्वन्तरं न स्मृतिमागतं किं हा हन्त ते जातकदोष एषः ॥४॥

सदान्नपूर्णा नगराजकन्या किरातपत्नीत्वमवाप देवी ।
त्वदीयपाणिग्रहणप्रभावादलङ्घ्यदोषं खलु जातकं ते ॥

बाणासुरस्य भवने सकलत्रपुत्रो
दौवारिकस्त्वमभवः स्वयमीश्वरोऽपि ।
कुन्तीसुतस्य धनुषा शिरसि प्रहारः
प्राप्तस्त्वया तदपि जातकदोषतस्ते ॥६॥

वामे भागे पतिस्त्वां वहति मम पुनः स्थानमस्त्युत्तमाङ्गे,
दृष्टिर्मय्येव पत्युर्वदनमपि न ते द्रष्टुमिच्छा प्रियस्य,
मय्येवासक्तचित्तो, वद कथमनया प्राप्त एवार्धदेहः,
सापत्न्येऽस्मिन् विवादे प्रचलति शिव ते गेहवासे क्व शान्तिः ॥७॥

गंगाभुजङ्ग निवहा हिमवत्सुतेति
शैत्यप्रदं परिकरं स्वयमाकलय्य ।
वह्निं करे वसति सिद्धचितासमीपे
कुर्वन् व्यथां वहसि जातकदोष एव ॥८॥

षडास्य-गजवक्त्रयोर्जठरवह्निसन्तर्पण
क्षुधार्दितनिजानुगप्रमथवृन्दसरक्षणम् ।
महोक्षमहिषीद्वयाश्रितकुटुम्बमित्थं धुरं
कथं वहसि धूर्जटे कथय कीदृशं जातकम् ॥९॥

अन्यापदेशाः

कुरभीन्द्रकुम्भमधिरुह्य पिपीलिकेय-
मात्मानमिन्द्रपदमामनुतेऽधिरूढाम् ।
पांसुर्यदा कलभशुण्डजफूत्कृतेन
साकं पतत्युपरि तावदियं सुरश्रीः ॥१॥

काको माहिषकर्णकोटरमलास्वादे निबद्धाशय-
स्तच्छृङ्गाग्रविधूननेन चकितो दूरेऽपसर्पत्यहो ।
कण्डूत्यापगमेन मीलितदृशा व्यक्ता शिरःकम्पनै
र्या सा सैरिभहर्षसूचनपरा श्लाघाऽपि भीतीयते ॥२॥

कुसुमसहचरत्वान्निर्गुणोऽप्येष तन्तुः
स्रजि सुरभिविडम्बी जायते नाऽत्र शङ्का ।
स्वयमपि तु सुमानां शीघ्रशैथिल्यभाजां
सुघटनमुपकुर्वत् सार्थनामा गुणोऽसौ ॥३॥

आलाने निगडीकृतः कतिपयैस्तुच्छैर्नरैः कुञ्जरः
काकोलूककपोतकोकिलशकैः पूतीकृतो विष्टया ।
शुण्डोद्धूलितपांसुभिर्निजतनुं प्रच्छाद्य रक्षन् स्वकं
मानं, दीनदशां निगूहति परात् नान्यद्दयां मृष्यति ॥४॥

पद्मिन्याः परितः स्वचाटुवचनैस्तस्याः स्तुतीः श्रावय-
न्नाकण्ठं च तदाननाम्बुजरसं स्वैरं निपीयोन्मदः ।
पङ्कालोडनधूर्त्तकेलिकुतकं दृष्ट्वागतं सूकरं
तस्यापि स्तवनोन्मुखो ह्यलिरयं का वा कृतघ्ने घृणा ॥५॥

वापीं स्नातुमितस्य मत्तकरिणो गण्डस्थलप्रस्रव-
द्दानार्थी मधुपाधमः कमलिनीं तावत् स्वभोज्यायिताम् ।
त्यक्त्वाऽभ्येत्य करीन्द्रकर्णविवरे पैशन्यमामन्त्रयन्
पद्मोत्सादनमेव कारयति तं का वा कृतघ्ने घृणा ॥६॥

वंशीविलासः

आमूलमस्यावगतिर्न शक्या श्रुतिं प्रपद्येति विचिन्त्य वंशी ।
विहाय कृष्णश्रुतिमूलभागं तस्याधरे लग्नमनाश्चकास्ति ॥१॥

आम्नायगन्धयुतगोपकिशोरवक्त्र-
वातेन पूरिततनुं मुरलीं नमामि ।
या निःस्वनैस्तदधरामृतपानजातै
राचार्यतां व्रजति गोपकुलाङ्गनानाम् ॥२॥

करद्वयगृहीतया प्रियतमेन कंसारिणा
तदीयमधरामृतं निभृतमापिबन्त्या मुदा ।
कपोलमणिदर्पणं मुहुरभिस्पृशन्त्या हरे-
स्त्वया मुरलि किं तपः कथय को व्रतोऽनुष्ठितः ॥३॥

निकुञ्चितपदाम्बजं चलितपिञ्छकेशाञ्चलं
विडम्बितनवाम्बुदं दरविभग्नकण्ठं हरेः ।
शरच्छशिकरामृतैः स्नपितमात्तहासं वपु-
र्वने ददृशुरङ्गना मुरलि ! ते कृपावैभवात् ॥४॥

मुकुन्दकरसंगता तदधरेण चास्वादिता
तदीयमुखमारुतैस्सततमन्तराप्लाविता ।
तदङ्गुलिनखांशुभिर्विरचिताब्जहारावलि-
स्तनोषि पशुपाङ्गनाहृदयमीर्ष्यया व्याकुलम् ॥५॥

गोपालसंज्ञां घटितां स्वनाम्ना
विधाय वेणो ! त्वमितो महत्त्वम् ।
वेत्रेण शंखेन धनुर्गदाभ्यां
दुष्प्रापमन्यैश्च सुदर्शनाद्यैः ॥६॥

कान्तारे वननिर्झरीपरिसरे या कीचकानां कुले
जाता तुच्छतनुश्च रन्ध्रबहुला वाताशनी दुर्बला ।
कृष्णाख्येन भिषग्वरेण करजैस्संस्पृष्टमात्रा सक्र-
त्सान्द्रानन्दमयी विभासि मुरलि ! त्वं ह्युल्लसद्यौवना ॥७॥

नादब्रह्मविभावनैकनिपुणा नारायणप्रेयसी
वेदान्तोदितसामगाननिरता ब्रह्मामृतस्यन्दिनी ।
ज्ञातृज्ञेयलयाश्रयाऽखिलजगत्तापत्रयोन्मूलनी
वंशी कृष्णकराब्जकेलिभवने हंसीव राराजते ॥८॥

वनभुवि सहगोपैर्भोक्तुकामस्य शौरे-
र्जठरपटविलग्नां वीक्ष्य वंशीं विधाता ।
प्रलयजलधिमध्ये गर्भवासोपयुक्तं
स्मरति कमलनालं विष्णुनाभिप्ररूढम् ॥९॥

उपनिषदि निगूढं तत्त्वमध्यात्मसंज्ञं
वनभुवि चरतीति ख्यापयन्ती स्वनादैः ।
व्रजयुवतिजनानां गोपगोवत्सकानां
करबदरसमानं बोधयित्री त्वमेव ॥१०॥

वनभुवि दवदाहज्वालयालीढगात्रा
शिथिलिततनुयष्टिः कीचकत्वं प्रपन्ना ।
अतिकरुणमप्याक्रन्दनं मुञ्चमाना
मुरहरकरतल्पे वंशि ! मोमुद्यसेऽद्य ॥११॥

मधुस्यति रिपुर्मधोस्त्वयि सुधारसस्यन्दिनि
प्रयच्छसि च शिक्षणं परभृतां निजालापनैः।
विचिन्वति निजार्थमप्यकृतका श्रुतिस्त्वत्स्वने
व्रजेश्वरकराश्रिते मुरलि ! मां कृतार्थीकुरु ॥२२॥

सरभसमुपभुक्ते चोरणोपाकृत्तदुग्धे
मुखपरिसरदेशाक्तगोक्षीरलेशः ।
प्रकटयति कदाचिच्चौर्यमित्यात्तशङ्का
परिमृजसि दयार्द्रा वंशि वक्त्रं हरेस्त्वम् ॥१३॥

गोविन्दभुक्तनवनीतकचैस्तदोष्ठ-
लग्नैर्निजाङ्गमभितो मुरली विलिम्प्य ।
तस्याधरे ललितकोमलपल्लवाभे
मा भूद्रुजेति मृदुतां वहति स्वकाये ॥१४॥

मधुकर इव वंशि ! त्वं यदा माधवस्य
गन्धान् स्मितविकसितवक्त्राम्भोजमारात् प्रयासि ।
सकलविषयगन्धण्न् दूरमुत्सार्य मन्ये
स्मरसि न मम दैन्यं तस्य कर्णेऽभिधातुम् ॥१५॥

स्वैरं नन्दकिशोरमन्दहसितज्योत्स्नामयूखत्विषा
स्वाङ्गं राजतमाकलय्य यमुनाकुञ्जेषु विद्युच्छविम्।
सृष्ट्वाऽऽसन्नतराम्बुवृष्टिचकिता गोपीर्निवार्यान्ति कात्
निर्बाधं बलसोदराधररसं वंशि त्वमासेवसे ॥१६॥

जयन्तु नृहरेर्नखाः

बीभत्स-रौद्र-रतिजन्यरसत्रयस्य
निष्पादने युगपदेव कृतत्वरो यः ।
सृष्टिस्थितिप्रलयनाट्यकलाविदग्ध-
श्चित्ते ममाऽस्तु नृहरेर्नखसूत्रधारः ॥१॥

प्रह्लादमाह्लादयितुं निजाभि-
र्ज्योत्स्नाभिरिन्दीवरबन्धुतां गताः ।
लक्ष्मीकटाक्षोर्मि - कलिन्दकन्या-
समागमे गाङ्गतरङ्गफेनाः ॥२॥

दैत्येन्द्रदोर्गर्ववनं प्रदग्धुं दावानलाभा नृहरेर्नखाग्राः
मच्चित्तगाढान्धतमोऽपहत्यै दशार्कबिम्बद्युतिमावहन्तु ॥३॥

कायाधवे कल्पलताप्रवालाः दैत्योरसि प्रेतपतेस्त्रिशूलाः ।
बालेन्दवस्सागरजाकचाग्रे नखा नृसिंहस्य शुभाय सन्तु मे ॥४॥

रक्षोजक्षतजैर्जपासमरुचिं याता हरेर्ये नखाः
बालार्कद्युतिमावहन्ति कमलावक्षोरुहक्ष्माधरे ।
कामक्रोधमहापिशाचयुगलप्रोच्चाटने मान्त्रिकाः
स्तम्भोद्भूतविचित्रसिंहवपुषो दीप्ता नखाः पान्तु नः ॥५॥

रक्षन्तु मां दितिसुतान्त्रकिणप्रवाहै-
रुद्भूतमौलिगतगौरजटातरङ्गैः ।
लक्ष्मीकटाक्षततिभिर्युगपद्विलिप्ताः
रक्तासिताश्शबलिताश्च हरेर्नखाग्राः ॥६॥

शिशुविलासः

पादाङ्गुष्ठं वदनकुहरे न्यस्य मायार्भको यो
ह्येकश्शिश्ये वटतरुपुटे प्राकृतप्रक्षये प्राक् ।
संप्रत्येनं दुहितृतनयं पश्यतो मानसे मे
सोऽसावाविर्भवति तमहं नौमि बालं पुराणम् ॥१॥

ईषन्निकुञ्चिनयनद्वयभृङ्गजुष्ट-
मव्याजहासविकसद्द्विजहीनमब्जम् ।
तारङ्गमर्मररवायितमञ्जुवाचं
धन्यं सुधाचषकमाननमर्भकस्य ॥२॥

मुखेन्दुनिष्यन्दिसुधारसस्रवै-
रुत्पाद्य शोभां पयसां पयोनिधेः ।
हस्तेन गृह्णन् जननीकुचाम्बुजं
विडम्बयत्येष हि शेषशायिनम् ॥३॥

सद्योनिर्गतपल्लवद्वयनिभं पादं मुहुस्ताडयन्
हासोन्मिश्रितरोदनैश्च जननीश्रद्धां समावर्जयन् ।
वक्षोजग्रहणोन्मुखौ करतलावब्जार्गलाभौ वहन्
कस्याऽयं हि शिशोर्मुदे न भविता स्तन्याय कोलाहलः ॥

गं गं रवाश्चूचुकचूषणोत्थाः
धं धं निनादाः पदताडनोत्थाः ।
उच्छ्वासशब्दा अपि नासिकोत्थाः
स्तनन्धयोद्भावितसाधुवादाः ॥५॥

निम्नानतावोष्ठयुगाग्रभागा-
वीषच्च निम्नं चिबुकस्य मध्यम् ।
कोणत्रयस्था रशनाग्रपीठे
सा वैखरी भाति शिशोर्मुखाब्जे ॥६॥

अरुणकरपुटान्तः पद्मकोशक्रमेण
श्रयति मधुकराभे मातृवक्षोरुहाग्रे ।
इतरकुचसरोजास्वादनादेति वत्सो
मधुकर मधुकोशाकारतामेककाले ॥७॥

भ्रमरपटलकान्तिर्मातृवक्षोरुहाग्रः
प्रविशति निजवक्त्राम्भोजकोशेऽर्भकोऽसौ ।
नयनयुगलपक्ष्म मीलयन् रात्रिबुद्ध्या
विहितवदनपद्मे भृङ्गवृन्दं रुणद्धि ॥८॥

मधुस्यति शिशौ निजे स्तनकुशेशये मातुर-
प्यपाङ्गमधुपः स्वयं बहिरुपेत्य तृष्णाकुलः ।
प्रफुल्लमुखपङ्कजं प्रतिसरत्यसावर्भकं
परस्परपिपासितौ युगपदेव संतृप्यतः ॥९॥

स्रवत्स्तन्यचीनांशुकालंकृता सा
दरस्मेरदीपप्रभाभास्यमाना ।
पदाघातसञ्जातमञ्जीरनादा
शिशोर्वक्त्ररङ्गे नटी भाति जिह्वा ॥१०॥

पाणिद्वन्द्वेन मातुः कुचतटपटहं ताडयन् नर्मवाचा
तस्या वात्सल्यमेवाऽमृतरसभरितं स्तन्यमित्यालपन्तम्
ब्रह्मानन्दानुभूतिं मुनिजनसुलभां दापयन्तं ददानं
ज्ञातृज्ञेयैक्यरूपायितशिशुममलं भावये ज्ञानमूर्त्तिम् ।११।

निजाङ्गपरिवर्त्तनं प्रथमतः प्रयत्नेन यत्
कृतं पुनरयत्नतो मुहुरिति स्वयं गर्वितः।
समुन्नमितमस्तकः करतलेन गां ताडयन्
प्रफुल्लहसितच्छलाद्विजयपोषमातन्वते ॥१२॥

शश्वदङ्ग परिवर्त्तनोद्यता
स्वार्भकस्य करमप्रसारितम् ।
मोचयेति वदतीव दीनता-
पूर्णमस्य नयनोत्थयाचनम् ॥१३॥

उद्वर्त्तिताङ्गो निजनासिकाग्रे-
णाघ्राय भूमिं मुहुरेष बालः।
पृथ्वी स्वयं गन्धवतीति तथ्यं
नैय्यायिकोक्तं विशदीकरोति ॥१४॥

वराहमूर्त्तेर्मुखगन्ध एषः
किं वा पृथोर्दोहनतैलगन्धः ।
इतीव वेत्तुं मुहुरेष पृथ्वी-
मुद्वर्तितो जिघ्रति बालकोऽसौ ॥१५॥

मासत्रयं शब्दगुणैकयुक्तं
शून्यं हि पश्यन् गगनं हताशः।
उद्वर्त्तिताङ्गो निजकेलिरङ्गं
भुवं विलोक्याभंक एष हृष्टः ॥१६॥

मातुः सकाशादपनेतुमागता
धात्रीति पृथ्वीं परिशङ्कमानः।
पद्भ्यां कराभ्यामभिताडयन् शिशुः
स्वमातृवात्सल्यमभिव्यनक्ति ॥१७॥

अस्पृष्टषड्वैरिविकारजात-
मानन्दमात्राश्रितचित्तवृत्तिम् ।
स्वप्नानुभूतात्मसुख हसन्तं
शिशु कथं ज्ञानविहीनमूचुः ॥१८॥

वारं वारं कटितटगतं क्लिन्नकौपीनवस्त्रं
निःसार्यान्यद्वसनमभितो वेष्टन्यत्या जनन्या।
रोषं दृष्ट्वा चकितवदसावर्भको मातृनेत्रं
सूत्रेणार्द्रं रचयति यतः साश्रुनेत्रेव भाति।१९।

पादाहतीभिः कृततूर्यघोषे
तालप्रहारे च कृते कराभ्याम् ।
लास्यं विधातुं शिशुवक्त्ररङ्गे
वात्सल्यलक्ष्मीः समुपैति हृष्टा ॥२०॥

मातृहस्तमपनीय तत्कुचं
पाणियुग्मधृतमापिबन् मुदा ।
अर्भकोऽनुसरतीव लीलया
पाञ्चजन्यधमनोद्यतं हरिम् ॥२१॥

चिबुकमुभयकोणे निम्नमीषत्प्रफुल्ल-
स्मितरुचिरमुखाब्जं नीलविस्तारनेत्रम्।
नवकिसलयकान्तिं पाणियुग्मं च चञ्चत्
पदयुगमभिपश्यन् कस्य चेतो न हृष्येत्।२२।

अर्द्धोद्वर्त्तितगात्रमस्थिरशिरो लोलं च नेत्रद्वयं
लालाम्बुस्रवदास्यमीषदवनौ संलग्नमेकं पदम्।
अन्यच्चोद्धृतमावहन् शिशुरयं हस्तेन चोत्सर्पणा
चेतो मे हरति प्रसारितकरश्चोरः शिशुच्छद्मना।२३।

निद्रां गतोऽयमिति मातरि चूचुकाग्रं
निःस्सार्य वक्त्रविवराच्चलितुं यदेच्छति
सुप्तोऽस्मि नाहमिति तां प्रतिबोधयिष्णुः
क्रन्दत्यसौ युगपदेव हसत्ययं शिशुः ।२४।

ईषत्कुञ्चितनेत्रमुद्गतदरस्मेरप्रदीप्ताधरं
किञ्चिद्दर्शितजिह्वमुद्धतकरद्वन्द्वाङ्गुलीभासुरम् ।
शश्वत्पादयुगाहतावनितलं तत्पांसुभिर्धूसरं
पश्यन्नेत्रमनः प्रियं दुहितृजं रोमाञ्चितोऽहं मुदा ।२५।

मातुस्ताते वदनकमलाचुम्बनायानतास्ये
द्व्यह्नादीर्घाच्चिबुकघटिताश्मश्रुकूर्चाद्विभीतः ।
उद्गृह्योभौ करकिसलयावंगुलीभिः प्रगृह्णन्
नासारन्ध्रं मुखमपसरन्नर्भकस्तं रुणद्धि ।२६।

नीरदोऽस्मि न तु शारदाभ्रकः

तुङ्गसत्यमहीधरशिखरे
वार्द्धिवारिनिवहेन पूरितः ।
अञ्जनाद्रिसमनीलतां वहन्
नीरदोऽस्मि न तु शारदाभ्रकः ॥१॥

सस्यपादपवीरुधलताभि-
र्भूतलं कुसुमवाटिकामयम् ।
शीतलं सुरभितं रचयिष्णु-
र्नीरदोऽस्मि न तु शारदाभ्रकः ॥२॥

कूटनीतिकटुघर्मशोषितां
भारतीं गिरमतीव दुःखिताम् ।
फुल्लमन्दहसितां चिकीर्षु-
र्नीरदोऽस्मि न तु शारदाभ्रकः ॥३॥

दौष्ट्यदावदहनोष्मणा परं
दग्धमार्त्तमवनीसुरबीजम् ।
उप्तमार्षकृषकैर्जिजीविषु-
नीरदोऽस्मि न तु शारदाभ्रकः ॥४॥

ऊषरायितभारतावनीं
वेदमन्त्रजलधारया पुनः ।
कर्त्तुमेष कलमाभिपूरितां
नीरदोऽस्मि न तु शारदाभ्रकः ॥५॥

गर्जितं मम नु धर्मदुन्दुभे-
मन्द्रनादमथ सामगीतकम् ।
ज्ञानदीप्तिततयश्च विद्युतः
नीरदोऽस्मि न तु शारदाभ्रकः ॥६॥

वञ्चकास्सुरगिरस्सिसेविषा-
च्छदमना भुवि चरन्ति ये खलाः ।
तान्नयामि पविनाऽद्य भस्मसा-
न्नीरदोऽस्मि न तु शारदाभ्रकः ॥७॥

धूर्त्ततां दहनवन्निगूह्य ये
नम्रतां भसितवद्वहन्ति तान् ।
कृष्णभस्मचयतां निनीषु-
र्नीरदोऽस्मि न तु शारदाभ्रकः ॥८॥

कलिविलासः

अन्नापणाद्वार्धुषिकत्ववृत्त्या
देवस्वमोषात् परवित्तचौर्यात् ।
नीचाश्रयाच्चार्जितवित्तराश्या
यान्त्याढ्यतामद्य खलाः पृथिव्याम् ॥

वातेशानन्दलहरी

वहन्ती कारुण्यं नयनयुगकोणे सकलदं
सृजन्ती भक्तानां मनसि परमानन्दलहरीम् ।
दलन्ती संसारप्रभवमखिलं तापनिवहं
लसन्ती मूर्त्तिः काप्यनिलपुरि नित्यं विजयते ॥१॥

श्रुतीनां तात्पर्यप्रकटनविधौ बद्धवपुषं
श्रुतानां वागर्थप्रभवमहसामप्यविदितम् ।
श्रितानां पापौघप्रशमनपरं किञ्चिदसितं
श्रमाणां साफल्यं भजत कविगिरां वातपुरगम् ॥२॥

गणेशाय नमः

महाविघ्नशैलान् समुत्पाट्य शश्वत
स्वशुण्डोत्थकण्डूतिमुत्सारयन्तम् ।
विरूपाक्षवृद्धोक्षमध्यारुरुक्षं
मदालम्बनं नौमि हेरम्बमीशम् ॥१॥

प्रातः स्मरामि गणनाथमनाथबन्धुं
विघ्नाद्रिपाटनपटुं वटुमप्रमेयम् ।
हस्ताब्जलग्नरदखण्डमखण्डदीप्ति
खण्डेन्दुमण्डितमपण्डितहृद्दुरापम् ॥२॥

प्रातः स्मरामि भजतां दुरितान्तकारिं
लम्बोदरं प्रियसुतं जगदम्बिकायाः ।
सम्मोददं करविराजितमोदकं त-
मम्भोदमार्तजनदुःखदवाग्निशान्त्यै ॥३॥

अग्रे दीयमान-चित्र-परिचयः

(१) २१.३.१६८० तारिकायां राष्ट्रीय-संग्रहालये देववाणीपरिषदस्तृतीय-वार्षिकाधिवेशनोद्घाटनावसरे मञ्चस्थाः (वामतो दक्षिणं) १. डा० सी० आर० स्वामिनाथः, तदानीं केन्द्रीयशिक्षामन्त्रालये सहायक-परामर्शदाता (संस्कृते), २. परिषदः कार्यवाहकाध्यक्ष आचार्य-रमेशचन्द्र शुक्लः, ३. उद्घाटनकर्ता मुख्यातिथिः पं० पी० एन० पट्टाभिराम शास्त्री ४. परिषन्महासचिवः डा० रमाकान्त शुक्लः।

(२) ११.३.१६८० तारिकायां राष्ट्रीय - संग्रहालय - सभागारे देववाणी-परिषदा समायोजितस्य अखिलभारतीय - संस्कृत - कविसम्मेलनस्य अध्यक्षतां कुर्वन् डा० सी० आर० स्वामिनाथः (सर्वतो दक्षिणं) तिष्ठति। मुख्यातिथिः श्री त्रिलोकिनाथ चतुर्वेदी, तदानीं भारतीय लोकप्रशासनसंस्थाननिदेशकः (वामतो द्वितीयः) कविसम्मेलनस्योद्घाटनं कृतवान् तृतीयवार्षिकाधिवेशन - स्मारिकां च समुन्मीलितवान्। वामतस्तिष्ठति कविसम्मेलनसंयोजकः परिषन्महासचिवो डा० रमाकान्त शुक्लः।

(३) २६.३.१६८१ ई० तारिकायां दिल्लीविश्वविद्यालयस्य टैगोरसभाभवने देववाणी-परिषदः सारस्वतसमारोहान्तर्गतं समायोजिते 'अक्षरश्लोक'-कार्यक्रमे सहभावित्वं कुर्वन्तः (वामतो दक्षिणं) १. श्री के० पी० ए०

मेननः, तदानीं प्रतिरक्षामन्त्रालयसचिवः, २, डा० सी० आर० स्वामिनाथः तदानीं शिक्षामन्त्रालये सहायकपरामर्शदाता (संस्कृते) ३. डा० उमेशचन्द्र पाण्डेयः, ४. आचार्य रवीन्द्र नागरः, डा० रमाकान्त शुक्लः, ६. पं० विष्णुकान्त शुक्लः। द्वितीयपंक्त्याम् पं० विश्वनाथ शास्त्री, पं० सोनटक्के-आचार्य रमेशचन्द्र शुक्ल-प्रभृतयोऽभिनन्दिता विद्वांसस्तिष्ठन्ति।

(४) २९.३.१९८२ ई० तारिकायां देववाणी-परिषदस्तत्त्वावधाने अभिनीतस्य 'सुवर्णांगुलीयम्' इत्येतन्नाम्नो नाटकस्य कलाकारैः सह विराजन्ते डा० सी० आर० स्वामिनाथ-श्री के० पी० ए० मेनन-डा० मण्डन मिश्र डा० रमाकान्त शुक्लाः (तृतीयपंक्त्यां क्रमशस्तृतीय-चतुर्थ-पञ्चम-षष्ठाः)। नाटकमिदं कालिन्दी-कालेजस्य छात्राभिः, श्रीमत्या रत्नम्-नीलकण्ठन्-महाभागायाः (सर्वतो दक्षिणम् उपविष्टायाः) निर्देशने, प्रस्तुतमासीत्।

(५) २७.५.१९८२ ई० तारिकायां देववाणी-परिषदा शिक्षामन्त्रालये उपपरामर्शकत्वेन प्रोन्नतस्य डा० सी० आर० स्वामिनाथस्य तथा च शास्त्रचूडामणिपण्डितत्वेन सम्मानितानां स्वदस्यानामभिनन्दनं कृतम्। अस्मिन्नवसरे (वामतो दक्षिणं) १. डा० रमाकान्त शुक्लः (परिषन्महासचिवः), २. डा० मण्डन मिश्रः, श्रीलालबहादुरशास्त्रि - केन्द्रीय-संस्कृतविद्यापीठ-प्राचार्यः (मुख्यवक्ता), ३. डा० अमरनाथ पाण्डेयः, काशी-विद्यापीठ-संस्कृत-विभागाध्यक्षः (वक्ता), ४. डा० सी० आर० स्वामिनाथः (अभिनन्दनीयः), ५. डा० रामकरण शर्मा, राष्ट्रिय-संस्कृतसंस्थाननिदेशकः (समारोहाध्यक्षः), ६—८. आचार्य रमेशचन्द्र शुक्ल - आचार्यश्रीसोहनलाल गौड - आचार्य श्री लालनकृष्णपण्ड्याः (शास्त्रचूडामणिपण्डिताः)।

(६) यथापूर्वं डा० रमाकान्त शुक्लतः आचार्य रमेशचन्द्र शुक्लं यावत्।

(७-८) २७.५.१९८२ तारिकायां विद्वदभिनन्दने समारोहाध्यक्षो डा० रामकरणशर्मा डा० सी० सी० आर० स्वामिनाथं तिलकेन, श्रीफल-माल्याङ्गवस्त्रसमर्पणेन च सत्कृत्य नमस्करोति। देववाणी-परिषन्महा-सचिव-सहसचिवौ डा० रमाकान्त शुक्ल.श्री रवीन्द्रनागरौ डा० शर्मणा साकं तिष्ठतः।

(९) १७.९.१९८२ तारिकायां गुरुवायूरस्थे रुक्मिणी-मण्डपे देववाणी-परिषद् गुरुवायूरकेन्द्रीयसंस्कृतविद्यापीठ-कालिकट-आदर्शसंस्कृतविद्या-पीठयोः सहयोगेन केरलीयभक्तकवेः श्री ओट्टूर उण्णिनम्बूदिरिपाद-महाभागस्याभिनन्दनं तल्लिखितस्य देववाणी-परिषत्प्रकाशितस्य 'राधाकृष्णरसायनस्य' समुन्मीलनोत्सवञ्चायोजितवती। अस्मिन्न-वसरे (वामतो दक्षिणम्) १. मुख्यातिथिः श्री के० करुणाकरन्, केरलराज्यमुख्यमन्त्री, २. श्री पी०सी० वी० एलयत्, ३. श्रीओट्टूर-उण्णिनम्बूदिरिपादः, ४. श्री आञ्जम माधवन् नम्बूदिरिः ५. डा० सी० आर० स्वामिनाथः (समारोहाध्यक्षः)।

(१०) दिल्लीविश्वविद्यालयस्य टैगोर-सभागारे २१.१.१९८३ तारिकायां देववाणी-परिषदः षष्ठवार्षिकाधिवेशनस्य उद्घाटनसमारोहे मञ्चस्थाः (वामतो दक्षिणम्) १. उद्घाटनकर्ता डा० सी० आर० स्वामिनाथः केन्द्रीयशिक्षासंस्कृतिमन्त्रालये उपशिक्षापरामर्शदाता (संस्कृते) २. विशिष्टातिथिः डा० रामकरण शर्मा, ३. परिषदध्यक्षो डा० कृष्णकान्त शुक्लः, ४. परिषन्महासचिवो डा० रमाकान्त शुक्लः। ५. श्रीमती सरोज साहनी सुरभारती-वन्दनां करोति।

(११-१२) राष्ट्रीय-संग्रहालय-सभागारे २०-३-१९८३ तारिकायां देववाणी-परिषदा 'शंकरअकादमी' - सहयोगेन राष्ट्रपतिपुरस्कृतानां संस्कृत-विदुषामभिनन्दमनुष्ठितम् । पण्डितकमलापति त्रिपाठी विद्वदभिनन्दन-समारोहस्याध्यक्षतामकरोत् । १२ संख्यके चित्रे सः देववाणी-परित्पक्षतः श्री चन्द्रमौलिशुक्लं पुरस्कुरुते । आचार्यवदरीनाथशुक्लः देववाणी-परिषदश्चतुर्थ - पञ्चमसंयुक्ताधिवेशनस्य समुद्घाटनकर्ता पद्मभूषण पं० पट्टाभिराम शास्त्री, परिषदध्यक्ष आचार्य वेदानन्द झा मञ्चमधितिष्ठति । पृष्ठभूमौ पुरस्कार-वितरण-व्यवस्थां सम्पादयन्तः (वामतो दक्षिणं) डा० रमाकान्त शुक्ल - डा० मण्डन मिश्र-डा० सी० आर० स्वामिनाथास्तिष्ठन्ति ।

११ संख्यके चित्रे २१-३-१९८२ तारिकायां देववाणी-परिषदायो-जितस्य अक्षरश्लोक - कार्यक्रमस्य अध्यक्षतां कुर्वन् डा० सी० आर० स्वामिनाथः शिक्षामन्त्रालये सहायकशिक्षापरामर्शदाता (मध्यस्थः) । सहभागिन सन्ति (वामतो दक्षिणं) १. श्री भवेन्द्र झा, २. पं० विष्णुकान्त शुक्लः, ३. आचार्यरवीन्द्र नागरः, ४. श्री के० पी० ए० मेनन, ५. श्रीमती कुञ्जुकुट्टि तम्बुराट्टि ७. डा० रमाकान्त शुक्लः, ८. पं० पी० एन० पट्टाभिराम शास्त्री, ९. श्री नीलकण्ठम् नम्पूतिरिः, १०. श्री के० उन्नीकृष्णन् ११. श्री परमेश्वर नम्पूतिरिः ।

(१३) २.४.१९८३ तारिकायां भारतीय - विद्याभवन-सभागारे देववाणी-परिषत्प्रकाशितं 'श्रीबदरीशसुप्रभातम' नाम संस्कृतस्तोत्रकाव्यं मुख्या-तिथिः भारतीयसर्वोच्चिन्यायालयाधीशन्यायमूर्तिः श्रीरङ्गनाथ मिश्र-महाभागः (दक्षिणस्थः) समुन्मील्य काव्यकर्त्रे डा० सी० आर० स्वामि-नाथमहाभागाय (वामस्थाय) समर्पयति ।

(१४) २१-८-१९८३ तारिकायां दिल्लीविश्वविद्यालयस्य टैगोर - सभागारे देववाणी-परिषदोऽष्टमसङ्कल्पनादिवसमुपलक्ष्य समायोजिते अखिल-भारतीयसंस्कृतकविसम्मेलने काव्यपाठं कुर्वन् डा० सी० आर० स्वामिनाथः (१ संख्यके चित्रे) ।

○

(चित्रम् १)

देववाणी-परिषद् दिल्ली
तृतीयवार्षिकाधिवेशनम्
(२१,२२-३-१९८०)

(चित्रम् २)

देववाणी-परिषद् दिल्ली
तृतीयवार्षिकाधिवेशनम्
भारतीय संस्कृत कवि सम्मेलनम्
२१-३-१९८०

(चित्रम् ३)

(चित्रम् ४)

(चित्रम् ५)



(चित्रन् ६)

(चित्रम् ७)



(चित्रम् ८)

(चित्रम् ९)



(चित्रम् १०)

(चित्रम् १४)


देववाणी - परिषद्, दिल्ली
अष्टमसंस्कृतदिवस - समारोहः
२१ - ८ - १९८३
अखिल भारतीय संस्कृत कवि सम्मेलनम्

देववाणी-परिषद्वार्ता

(१) आचार्यरमेशचन्द्रशुक्लाय विशिष्टपुरस्कारः

देववाणी-परिषदोऽध्यक्षपदं समलंकुर्वद्भ्यः आचार्य श्री रमेशचन्द्रशुक्ल-महाभागेभ्यः तत्संस्कृतसपर्यार्थम् उत्तरप्रदेशसंस्कृताकादम्या पञ्चविंशतिसहस्र-रूप्यकात्मको विशिष्टपुरस्कारः प्रदास्यते ।

'सुगमरामायण'-'श्रीकृष्णचरित'-गीतमहावीर'-'भारतस्वातन्त्र्यसंग्रामेति-हास'-'चारुचरितचर्चा'-'प्रबन्धरत्नाकर'-'नाट्य-संस्कृति - सुधा'-'रसदर्शन'-कर्तारोऽष्टसप्ततिवर्षदेशीया आचार्यशुक्लमहाभागा अद्यत्वे 'नवभारतपुराण'स्य रचनायां संलग्नाः सन्ति ।

(२) डा० मण्डनमिश्राय पुरस्कारः

देववाणी-परिषद आजीवनसदस्याय डा० मण्डनमिश्रमहाभागाय 'मीमांसादर्शनम्' इत्येतदस्य ग्रन्थस्य रचनार्थम् उत्तरप्रदेशसंस्कृताकादम्या दशसहस्र (१०,०००) रूप्यकात्मको विशिष्टपुरस्कारः प्रदास्यते ।

संस्कृतप्रचाराय समर्पितसर्वस्वो डा० मण्डनमिश्रमहाभागोऽद्यत्वे राष्ट्रिय-संस्कृत-संस्थानस्य निदेशकः सन् संस्कृतस्य यामनितरसाधारणीं सेवां विधत्ते तथा समस्तमपि संस्कृत-जगत् सुपरिचितमेवास्ति ।

देववाणी-परिषत्परिवार उभयोरपि पुरस्कृतयोर्विदुषोः सम्मानेन नितरां प्रसीदति ।

(३) विद्वदभिनन्दनम्

देववाणी-परिषदा 'शंकर एकेडेमी'-'संस्कृत-सेवा-संस्थान'-'मीमांसा' संस्थानां सहयोगेन १६-३-१९८५ ई० तारिकायाम् नयी दिल्लीस्थे श्रीलाल-बहादुरशास्त्रिकेन्द्रीयसंस्कृत-विद्यापीठे राष्ट्रपतिपुरस्कृताना पं० जग्गू आलवार अयंगार - पं० आनन्द झा - पं० कुलमणि मिश्र - डा० दलसुख डाह्याभाई मालवणिया-डा० शशिधरशर्मणां संस्कृतविदुषाम्, उत्तरप्रदेशसंस्कृतकादम्या पञ्चविंशतिसहस्ररूप्यकात्मकविशिष्टपुरस्कारेण सम्माननीयानामाचार्य

श्रीरमेशचन्द्रशुक्लमहाभागानाम्, दशसहस्ररूप्यकात्मकपुरस्कारेण सम्माननीयानां डा० मण्डनमिश्रमहाभागानां च समभिनन्दनं कृतम् ।

समारोहस्याध्यक्ष्यं सुप्रसिद्धविधिवेत्ता डा० लक्ष्मीमल्ल-सिंघवी-महाभागः, मुख्यातिथित्वं च शिक्षामन्त्रालये संयुक्तपरामर्शदाता श्री त्रिलोकीनाथ-धरमहाभागो व्यधाताम् । केन्द्रीयशिक्षामन्त्रालये संस्कृतोपपरामर्शदाता डा० सी० आर० स्वामिनाथ - महाभागः, संस्कृत-सेवा-संस्थान-मन्त्री आचार्य रामदयालु शास्त्री, मीमांसा - सचिवः डा० रामसुरेशपाण्डेयः, देववाणी-परिषन्महासचिवः डा० रमाकान्त शुक्लश्च अंगवस्त्र-श्रीफल-पुष्पहाराभिनन्दन पत्रैर्विदुषामभिनन्दनं चक्रुः । समारोहस्यं संचालनं डा० रमाकान्तशुक्लेन धन्यवादज्ञापनं च लालबहादुरशास्त्रिकेन्द्रीयसंस्कृतविद्यापीठकार्यवाहकप्राचार्येण आचार्यमणिनाथ झा-महाभागेन कृतम् ।

"संस्कृत-नाट्य-समारोह"– "कवि-सम्मेलने" सम्पन्ने

"देववाणी-परिषद्" ३१-३-१९८५ तारिकायां दिल्लीविश्वविद्यालयस्य टैगोर-सभागारे "बालसंस्कृत-नाटक-प्रदर्शनम्" "अखिलभारतीयसंस्कृतकवि-सम्मेलनं" चायोजितवती । बालसंस्कृत-नाटक-प्रदर्शनार्थं नवदिल्ल्याः "गुडविल पब्लिक स्कूल" नाम्नी संस्था विशिष्टं पुरस्कारमलभत ।

कविसम्मेलने देशस्य विभिन्नेभ्यो भागेभ्य आगतैरेभिः सप्तविंशति-कविभिः स्वकाव्यरचनाः प्रस्तुताः—

१. डा० विन्ध्येश्वरीप्रसाद मिश्रः (पन्नातः), २. डा० पुष्पा त्रिवेदी (बिलासपुरतः), ३. डा०कमलेशदत्त त्रिपाठी (उज्जैनतः), ४. आचार्य वेदानन्द झा (दिल्लीतः), ५. डा० राजेन्द्र मिश्रः "अभिराजः" (प्रयागतः), ६. डा० उमाकान्त शुक्लः (मुजफ्फरनगरतः), ७. डा० प्रशस्यमित्र शास्त्री (रायबरेलीतः), ८. प्रो० वि० वेंकटाचलम् (उज्जैनतः), ९. डा० कृष्णकान्त शुक्लः (बरेलीत), १०. डा० सी० आर० स्वामिनाथन् (दिल्लीतः), ११. श्री श्रीनिवास रथः (उज्जैनतः), १२. श्री विष्णुकान्त शुक्लः (सहारनपुरतः), १३. श्री दीपक घोषः (कलकत्तातः), १४. डा० सत्यपाल नारंगः (दिल्लीतः), १५. कविरत्न श्रीकृष्ण सेमवालः (दिल्लीत.), १६. डा० परमानन्द शास्त्री (अलीगढ़तः), १७. डा० इच्छाराम द्विवेदी (मैनपुरीतः), १८. डा० सुधाकराचार्य त्रिपाठी (मेरठतः), १९. श्री रामकृष्ण शर्मा (दिल्लीतः), २०. डा० हर्षनाथ मिश्रः (दिल्लीतः), २१. श्री वी० रामचन्द्रन् (दिल्लीतः), २२. डा० सुबोधचन्द्र पन्तः (दिल्लीतः), २३. श्री पी० एन० पी० नम्पूतिरिः (दिल्लीतः), २४. श्री ओमप्रकाश ठाकुरः (दिल्लीतः):

२५. डा० रमाकान्त शुक्लः (दिल्लीतः), २६. श्री टी० वी० परमेश्वर अय्यरः (दिल्लीतः), २७. आचार्य रमेशचन्द्र शुक्लः (दिल्लीतः)।

समारोहस्य मुख्यातिथिना डा० सी० आर० स्वामिनाथमहाभागेन संस्कृत-कविता सामयिकीनां कालजयिनीनां च भावनानामभिव्यक्तेः मनोहारि-साधनात्वेन प्रतिपादिता। तेनात्रावसरे देववाणी-परिषत्प्रकाशितो डा० विन्ध्येश्वरीप्रसादमिश्रविरचितश्च "सारस्वतसमुन्मेषः" इति कवितासंग्रहोऽपि समुन्मीलितः। कवि-सम्मेलनस्य प्रारम्भं नववर्षीयः शिशुः अभिनव शुक्लो दशावतार-प्रार्थनयाकरोत्। सम्मेलनस्याध्यक्ष्यं परिषदोऽध्यक्षैराचार्यरमेशचन्द्र-शुक्लमहाभागैः संचालनं च महासचिवेन डा० रमाकान्त शुक्लेन कृतम्।

(—रमा शुक्ला)

संस्कृत-वार्ता

(१) कर्णपुरे 'कौस्तुभ'-समारोहः

संस्कृत-प्रचार-प्रसारार्थं समर्पितया 'कौस्तुभ'-नाम्न्या संस्थया १८-३-१९८५ ई० तारिकायां कानपुर-नगरस्य प्रेमनगरक्षेत्रे विद्वदभिनन्दन-ग्रन्थविमोचन-कविसम्मेलनानां समायोजनं कृतम् ।

संस्थासचिवेन डा० प्रकाशमित्र-शास्त्रिमहाभागेनात्रावसरे वयोवृद्ध-विदुषोः पं० केशवदे-शुक्ल—डा० मुंशीरामराम शर्मा सोम-महाभागयोः समभिनन्दनं कृतम् । डा० नलिनी शुक्लाया निर्देशने आचार्यनरेन्द्रदेवमहिला-महाविद्यालयस्य छात्राभिः संस्कृतगीतानि प्रस्तुतानि ।

'देववाणी-परिषद्, दिल्ली'-संस्थायाः त्रैमासिकपत्रस्य 'अर्वाचीन-संस्कृतस्य' सम्पादकेन डा० रमाकान्त शुक्लेनात्रावसरे डा० नलिनीशुक्ला लिखितः 'कथासप्तक'-ग्रन्थः समुन्मीलितः ।

तदनु कविसम्मेलनं प्रारब्धम् यत्र श्री पवन वाजपेयी, डा० विश्वम्भर-नाथद्विवेदी, श्री वागीश शास्त्री, आचार्यसोमदत्त वाजपेयी, डा० नलिनी शुक्ला, डा० प्रशस्यमित्र शास्त्री, पं० केशवदेव शुक्लः, श्री सुरेश अवस्थी, श्रीदूधनाथ शर्मा 'श्रीशः', श्री शंकरदत्त शास्त्री, श्री छैलबिहारी 'वाणः', श्री सुमन दुबे, श्री राजकिशोरसिंह, श्री रामभजन त्रिपाठी 'सारंग', श्री सूरजप्रसाद गुप्तश्च स्व संस्कृत-हिन्दी-कविताः प्रस्तुतवन्तः ।

अस्य कविसम्मेलनस्य संचालनं डा० विश्वम्भरनाथद्विवेदि—श्री सारङ्गाभ्यां कृतम् आध्यक्ष्यं च डा० रमाकान्त शुक्लेन कृतम् । डा० प्रकाशमित्र शास्त्रि महाभागः नूनमेतदायोजनार्थं वर्धापनीयोऽस्ति ।

(२) डा० स्वामिनाथाय सौप्रस्थानिकमभिनन्दनम्

३१-३-१९८५ ई० तारिकायां केन्द्रीयशिक्षामन्त्रालयस्य संस्कृतोप-परामर्शदातृपदात् डा० सी० आर० स्वामिनाथ-महाभागः सेवानिवृत्तिं लभते—इति हेतोरस्य महानुभावस्य कृते देशस्य पटना-मद्रास-पुणे-दिल्ली-प्रभृतिनगरेषु विविधसंस्थाभिः सौप्रस्थानिकान्यभिनन्दनान्यायोज्यन्त येषु डा० स्वामिनाथकृता संस्कृत-सेवा समुपश्लोकिता बभूव ।

२८-३-१९८५ तारिकायां नयीदिल्लीस्थ-शिवाजीकालेजे दिल्ली-विश्वविद्यालयदक्षिणपरिसरसंस्कृतपरिषद्-नागपब्लिशर्स—चौखम्बासंस्कृतप्रतिष्ठानसंस्थानां संयुक्ततत्त्वावधाने डा० स्वामिनाथाय अभिनन्दनग्रन्थः समर्पितोऽभूत्। अत्रावसरे डा० पुष्पेन्द्र कुमार-डा० रमाकान्त शुक्ल-डा० स० सु० जानकी-प्रो० वि० वेंकटाचलम्-डा० मण्डन मिश्र-प्रो० हूजा (गुरुकुल कांगडी वि०वि० कुलपति)-प्रभृतिभिः डा०स्वामिनाथस्य संस्कृत-सपर्या समभिनन्दिता:। उत्सवस्य अध्यक्षता प्रो० के० कृष्णमूर्ति महाभागेन मुख्यातिथित्वं च डा० कपिला-वात्स्यायन-महाभागया कृतम्।

२९-३-१९८५ ई० तारिकायां नयीदिल्लीस्थे श्रीलालबहादुरशास्त्रि-केन्द्रीयसंस्कृतविद्यापीठे डा० स्वामिनाथस्य वाल्मीकिमवलम्ब्य भाषणं जातम्। इदं हि भाषणं 'श्रीलालबहादुरशास्त्रि स्मारक व्याख्यानमालायाम्' जातम्। आयोजनस्य अध्यक्षता सम्पूर्णानन्दसंस्कृतविश्वविद्यालय-कुलपतिभिः डा० रामकरणशर्मभिः कृता।

तदनु डा० स्वामिनाथस्य अभिनन्दनं जातम्। अस्याभिनन्दनसमारोहस्याध्यक्षता भारतीयसर्वोच्चन्यायालयस्य न्यायाधीशैः माननीयन्यायमूर्तिभिः श्री रङ्गनाथमिश्रमहाभागैः कृता। अत्रावसरे कामेश्वरसिंहसंस्कृतविश्वविद्यालय-कुलपतिः डा० जयमन्तमिश्रमहाभागः, तिरुपतिविद्यापीठप्राचार्यः श्रीबाल-सुब्रह्मण्यम्-महाभागः, राष्ट्रियसंस्कृतसंस्थाननिदेशकः डा० मण्डन मिश्रमहाभागः, देववाणीपरिषन्महासचिवः डा०रमाकान्त शुक्लः, विद्यापीठकार्यवाहकप्राचार्यः प्रो० मणिनाथझामहाभागश्च स्वशुभकामनाः प्रकटीचक्रुः। डा० स्वामिनाथायैकमभिनन्दनपत्रमपि समर्प्यत।

(३) मेरठविश्वविद्यालयसंस्कृतप्राध्यापकपरिषद एकादशमधिवेशनं सम्पन्नम्

गाजियाबादनगरस्थ-महानन्दमिशनस्नातकोत्तरमहाविद्यालये मेरठ-विश्वविद्यालयसंस्कृतप्राध्यापकपरिषदो द्विदिवसीयम् एकादशमधिवेशनं ४-४-१९८५—५-४-१९८५ तारिकयोः सम्पन्नं यत्र शोध-संगोष्ठी, विचार-गोष्ठी, संस्कृत-कवि-गोष्ठी उन्मुक्ताधिवेशनञ्च सम्पन्नतामगच्छन्। अस्योद्घाटनं डा० मण्डन मिश्रमहाभागेन कृतम्। परिषन्मन्त्रिणा डा० उमाकान्त शुक्लमहाभागेन वार्षिकप्रगतिविवरणं प्रस्तुतम्।

(४) इटलीराष्ट्रे 'शारदा'-दैनिकम्

वाराणसीये जागतिक-संस्कृत-परिषदः पञ्चमे महाधिवेशने (ऑक्टोबर

दिल्ली-राजधानी-नगरे विश्व-हिन्दी-सम्मेलने (ऑक्टोबर ८३), १९८१), रायपुरे (डिसेंबर ८१) तथा जलगांव-नगरे (जाने. ८४) अखिल-भारतीय-मराठी-साहित्य-सम्मेलन-द्वये तथैव विदेशेषु सर्वप्रथमम् अमेरिका-राष्ट्रे षष्ठे विश्व-संस्कृत-सम्मेलने (ऑक्टोबर ८४), श्रीपरशुराम-क्षेत्रे डेरवण-ग्रामे यज्ञानुष्ठान-महोत्सवे (डिसेम्बर ८४) दैनिकीत्वेन प्रकाशन-साहस-विक्रमं कृत्वा विश्वप्रिया 'शारदा' पाक्षिकी पत्रिका संप्रति इटली-राष्ट्रे सान-मारिनो-नगरे संकल्पिते प्रथमे जागतिक-योग-आयुर्वेद-महाधिवेशने (६,७,८,९ जून १९८५) प्रतिदिनं पुनरपि दैनिकीत्वेन प्रकाशिता भवेत् ।

उत्तरप्रदेशसंस्कृताकादमी-पुरस्काराः

उत्तरप्रदेशसंस्कृताकादमी एकलक्षरूप्यकात्मकेन १९८: वर्षीय **'विश्व-संस्कृत-भारती'**—नामकेन सर्वोच्चपुरस्कारेण वयोवृद्धविद्वांसं पण्डितप्रवरं श्रीरघुनाथशर्ममहाभागं सभाजयिष्यति ।

अकादमी पञ्चविंशतिसहस्ररूप्यकात्मकपुरस्कारैः आचार्यरमेशचन्द्रशुक्ल-आचार्य कालिकाप्रसादशुक्ल-आचार्य आद्याप्रसादमिश्रमहाभागान्, दशसहस्ररूप्यकात्मक **'बाणभट्टपुरस्कारेण'** डा० श्रीनाथहसूरकरमहाभागं, दशसहस्ररूप्यकात्मक **'शांकरपुरस्कारेण'** डा० मण्डन मिश्र-महाभागं, पञ्चसहस्ररूप्यकात्मकैः विशेष - पुरस्कारैश्च पद्मभूषणआचार्यबलदेवउपाध्याय - पद्मभूषण आचार्यपट्टाभिरामशास्त्रि - स्वामिविद्यानन्दसरस्वती - आचार्यवसन्तत्र्यम्बक - शेवडे-डा० जगन्नाथपाठक-आचार्य विष्णुदत्तशर्ममहाभागांश्च शीघ्रमेव दिल्यामायोज्यमाने एकस्मिन् समारोहे सभाजयिष्यति । प्रधानमंत्री श्री राजीवगान्धी महाभागः पुरस्कारवितरणं कर्तुं सम्प्रार्थ्यते ।

(—रमा शुक्ला)

अर्वाचीनसंस्कृतम् (R.N. 34554/79)

१. प्रकाशन का स्थान — नयी दिल्ली

२. प्रकाशन की आवधिकता — त्रैमासिक

३. मुद्रक तथा प्रकाशक का नाम, राष्ट्रीयता तथा पता — डा० रमाकान्त शुक्ल (देववाणी-परिषद्, दिल्ली-कृते) ६, वाणी-विहार, नयी दिल्ली-११००५९

४. सम्पादक का नाम, राष्ट्रीयता तथा पता — डा० रमाकान्त शुक्ल, भारतीय, ६, वाणी-विहार, नयी दिल्ली-११००५९

५. उन व्यक्तियों के नाम और पता जो इस पत्रिका के मालिक या साझेदार हैं अथवा जो इसकी सारी पूँजी के एक प्रतिशत से अधिक के हिस्सेदार हैं। — देववाणी-परिषद्, दिल्ली ६, वाणी-विहार, नयी दिल्ली-११००५९

मैं, डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल
महासचिव, देववाणी-परिषद्, दिल्ली
प्रकाशक

सूचना

अर्वाचीनसंस्कृतस्यायमङ्कः सप्तमे वर्षे द्वितीय-तृतीय-संयुक्ताङ्कोऽस्ति। अग्रिमोऽङ्कः (चतुर्थोऽङ्कः) १५ अक्टूबर १९८५ ई० तारिकायां प्रकाशयिष्यते।

सम्पादकः

सूचना

अर्वाचीनसंस्कृतम् का यह अंक सप्तम वर्ष का द्वितीय तथा तृतीय संयुक्त अंक है। अगला (चतुर्थ) अंक १५ अक्टूबर १९८५ ई० को प्रकाशित होगा।

सम्पादक

INFORMATION

This is the joint II & III number of VII Volume of *Arvācīnasaṃskṛtam*. The next (IV) number will be brought out on 15 Oct. 1985.

Editor



शास्त्रे विस्तृतयुक्तिजालजटिले सौन्दर्यसारात्मके
साहित्ये च समं विहारचतुरा प्रज्ञा यदीयाऽद्भुता ।
सम्प्राप्तामलकीर्तिपूरितदिशः श्रीस्वामिनाथाभिधः
सोऽयं भारतभागधेयमहिमा नित्यं विजेजीयताम् ॥

'देववाणी-परिषद् दिल्ली'-कृते डॉ० रमाकान्त शुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नई दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा, ६, वाणी-विहार, नई दिल्ली ११००५९ तः प्रकाशितम्-अर्वाचीन-संस्कृतम् (७/२-३) (अप्रैल-जुलाई १९८५ संयुक्तांकः)
प्रधानसम्पादकः-डॉ० रमाकान्त शुक्लः । प्रकाशनतिथिः १५.४.१९८५ ई० ।

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

सप्तमवर्षे चतुर्थोऽङ्कः

अक्तूबर १९८५

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः,

सांख्ययोगाचार्यः

प्रकाशिका

देववाणी-परिषद्, दिल्ली

८, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

अर्वाचीनसंस्कृतम् (७/४)

विषय-सूची

विषयः	लेखकः	पृष्ठांकः
१. सम्पादकीयम्		१
२. भवतामभिमतम्		२
३. महाप्रयाणम्	(कविरत्न श्रीकृष्ण सेमवालः)	३-३४
४. देवीन्दिराऽन्तर्हिता	(प्रो० रेवप्रसाद द्विवेदी)	३५-३८
५. अध्यक्षीयमभिभाषणम्	(डा० रमेशचन्द्र शुक्लः)	३९-४८
६. वार्षिकविवरणम्	(डा० रमाकान्त शुक्लः)	४९-६७
७. आयव्ययविवरणम्		६८-८५
८. चित्रद्वयम्		८६
९. देववाणी-परिषद्वार्त्ता	(रमा शुक्ला)	८७-८८
१०. संस्कृत-जगद्वार्त्ता	(,,)	८९-९४
११. समीक्ष्यपुस्तकानि		९५

वार्षिकग्राहकशुल्कम्

विंशतिरूप्यकात्मकम् Rs. 20.00 (भारते)

पौण्डद्वयं डालरपञ्चकं वा (विदेशेषु)

Annual Subscription

Rs. 20.00 (In India)

5 Dollars or 2 Pounds (Abroad)

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नई दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहार, नई दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (७/४)। प्रधानसम्पादकः— डा० रमाकान्तशुक्लः। प्रकाशनतिथिः ३१.१०.१९८५।

अर्वाचीनसंस्कृतस्य सप्तमवर्षीयश्चतुर्थोऽङ्कः इन्दिरा-पुण्यतिथौ प्रकाश्यते। अस्मिन्नङ्के कविरत्नश्रीकृष्णसेमवालप्रणीतं महाप्रयाणं नाम श्रद्धाञ्जलि-काव्यं साङ्गलहिन्दीभाषानुवादं प्रकाश्यते। कविनास्य रचना ३१.१०.१९८४ ई० तारिकायां प्रारब्धा द्वित्रिदिवसैश्च सम्पूर्णा। रचना दिल्ल्यामेव कृता। अस्मिन् काव्ये इन्दिराजीवनवर्षप्रतीकभूतेषु ६७ पद्येषु कविना स्वर्गीयायाः श्रीमत्या इन्दिरागान्धि-महाभागायाः सद्गुणाः कीर्तिताः, तस्यै श्रद्धाञ्जलिश्च दत्तः। तस्या हत्याया उदन्तमाकर्ण्य कविः कदाचित् घातुकौ निन्दति, कदाचिद् भुशुण्डिमुपालभते, कदाचिद् गोलिकाः धिक्कुरुते। कदाचिच्च मृत्युमुपालभते—

अयि काल! दयामयीं शुभां, कुशलां शासनशासिकामिमाम्।
जननीं भरतावनेः प्रियां, हरतः किन्नु दयागता न वा ॥४७॥

कवेरनुसारं श्रीमत्यै इन्दिरागान्ध्यै वास्तविकः श्रद्धाञ्जलिरयमस्ति :—

संघर्षपूरितमिदं तव जीवनं हे
मातस्सदा दिशतु लोकहिताय शिक्षाम्।
त्वद्दर्शितं जननि पूज्यपथप्रयाणं
श्रद्धाञ्जलिश्चरणयोः स हि तेऽत्र मान्यः ॥६०॥

अतः परं सनातनोपाह्वकविवरडा० रेवाप्रसादद्विवेदिमहाभागेन ३१-१०-१९८४ तारिकायां रात्रौ वाराणस्यां रचितैका कविता 'देवीन्दिराऽन्तर्हिता' प्रकाश्यते। अस्यां कवितायां श्रीमत्या इन्दिरागान्धिमहाभागाया हत्यायां क्षोभः, तद्गुणानां सत्कारः, राष्ट्रस्य सर्वोच्चित्वं, नवनियुक्तप्रधानमन्त्रिणः श्री राजीवगान्धिनो नेतृत्वे देशस्य कल्याणकामना— इत्येतदादिकाः प्रवृत्तयोऽवलोक्यन्ते। कवेः भावनास्ति —

मात्रा यत्प्रियदर्शिनीत्यभिधया संरक्ष्य सम्पोषितं
राष्ट्रं भारतसञ्ज्ञकं हिमगिरेरादक्षिणं सागरम्।
नूनं तस्य तथैव भावि परितो भूयस्तरां पोषण
राजीवेत्यभिधस्य योग्यतनयस्याग्रेसरत्वेऽधुना ॥(१८)

अत परं देववाणी-परिषदः सप्तमाष्टमसंयुक्तवार्षिकाधिवेशने प्रस्तुतानि अध्यक्षीयभाषण-वार्षिकविवरणायव्ययविवरणानि, देववाणी-परिषद्वार्ता, संस्कृत-जगद्वार्ता च प्रकाश्यन्ते।

अर्वाचीनसंस्कृतस्यायमङ्कोऽपरिहार्यकारणैः किञ्चिद्विलम्बेन प्रकाश्यते। तदर्थं पाठकाः क्षन्तुमर्हन्ति प्रकाशकम्।

प्रथमा इन्दिरा-पुण्यतिथिः विदुषामाश्रवः



३१-१०-१९८४ प्रधानसम्पादकः

भवतामभिमतम्

(१)

'शारदा' पाक्षिकम्

झेलम पत्रकारनगरी, पुणे-४११०१६

सस्नेहादरं नमो नमः सन्मित्रवर्याय डॉ० शुक्लाय रमाकान्तार्याय ।

देववाणी-परिषत्-प्रकाशितं 'अर्वाचीनसंस्कृतम्'-स्वामिनाथ-विशेषाङ्कं संप्राप्य महान् मे प्रमोदः। भारत-केन्द्र-शासनस्य शिक्षा-मन्त्रालये संस्कृत-विभागे डॉ० शास्त्रपुरं रामकृष्ण-स्वामिनाथार्य-सदृशः वेद-शास्त्र-विद्या-समलंकृतः संस्कृत-विद्या-विश्व-हित-चिन्ता-परायणः संस्कृताधिकारी शासकः सुदुर्लभः। शारदाकाराणां सुचिरं सुपरिचितेनापि तेन साकं शासकीयकार्यानु-शासन-विषये यद्यपि महती नो मत-भिन्नता तर्ह्यपि तद्गुणाः पूजा-स्थानं शारदा-काराणाम् इति नैव विस्मरणीयम्। डॉ० स्वामिनाथ-विशेषाङ्कं प्रकाश्य युक्तमेव समये समाचारि भवादृशेन देववाणी-परिषत्प्राणाधारेण। तादृशं देववाणी - समुपासक - मूर्धन्यं अर्वाचीन - संस्कृत - संपादकं सानन्दम् अभिनन्दितुम् एव पत्रमिदं प्रेष्यते। स्वीकुर्वन्तु हार्दा मे धन्यवाद-साहस्रीं सर्वाङ्गसुन्दर-विशेषाङ्क-प्रकाशनार्थम्। विनीतः

वसन्त गाडगीलः

(सम्पादकः 'शारदा')

(२)

वैदिक संशोधन मण्डल

तिलक विद्यापीठ नगर, पुणे-३७

सादरं नमो नमः।

अर्वाचीनसंस्कृतमित्यस्य त्रैमासिकस्य 'स्वामिनाथविशेषाङ्कः' भवद्भिः उपायनीकृत्य प्रेषितः। तं प्राप्य अनुगृहीताः स्मः। अस्मिन् अङ्के डॉ० स्वामिनाथविषयकाः ये लेखाः सन्ति तेभ्यः डॉ० स्वामिनाथशर्मणां व्यक्तित्वस्य सुस्पष्टं दर्शनं भवति। ते लेखाः संशोधकानां वाचकानां च कृते बोधप्रदाः भवेयुः।

एष अङ्कः अस्मद् ग्रन्थालयस्य पञ्जिकायां (Register) प्रवेशितः अस्ति।

पुनरपि धन्यवादाः।

भवदीया स्नेहाङ्किता,
बंदना सेलूकरः
(ग्रन्थपालः)

संपा. डॉ० रमाकान्त शुक्लः
'अर्वाचीनसंस्कृतम्'
देववाणी-परिषद्
६, वाणीविहार; नयी दिल्ली ११००५९

महाप्रयाणम्

(श्रद्धाञ्जलिकाव्यम्)

(हिन्द्याङ्गलभाषानुवादसहितम्)

प्रणेता :

कविरत्नम् श्रीकृष्णसेमवालः

मुद्रक : देववाणी प्रिण्टर्स
उत्तम नगर, नई दिल्ली-११००५६

महाप्रयाणम्

MAHĀPRAYĀṆAM

संसारस्थितिनाशपालनरतं विश्वेश्वरं पावनम्,
हर्षाक्रोशवियोगशोकनिलयं ध्यात्वा प्रभुं सादरम् ।
पूज्यां तां प्रियदर्शिनीं च जननीं नत्वा प्रियामिन्दिरां,
श्रद्धायाः कुसमाञ्जलिः सुमनसा तस्यै मया दीयते ॥१॥
वाणी वाक्यविहीनतामुपगता पाणिः क्रियाशून्यताम्,
बुद्धिश्चञ्चलतां गता जननि हे पादौ स्थिरौ संगतौ ।
नेत्रे वै तमसावृते प्रतिगते मातर्हतायां त्वयि,
हा हा सर्वविधैव सम्प्रति गता निश्चेतना मे गतिः ॥२॥

संसार की उत्पत्ति, नाश एवं विकास में तत्पर विश्व के स्वामी पवित्र, हर्ष, आक्रोश, वियोग एवं शोक के स्थान, सभी प्राणियों के आश्रयभूत एवं शान्तिदाता उस परब्रह्म परमात्मा का ध्यान करते हुए पूजनीय मातृरूप प्रियदर्शिनी श्रीमती इन्दिरा गाँधी को मैं श्रद्धाञ्जलि अर्पित करता हूँ ।१।

हे माँ ! तेरी मृत्यु की सूचना प्राप्त होने पर मेरी वाणी में गूँगापन, हाथों में शून्यता, बुद्धि में चञ्चलता और पैरों में स्थिरता आ गयी तथा आँखों में अन्धेरा छा गया, इस प्रकार मेरी समस्त क्रियाविधि निश्चेतन हो गयी ।

1. Devoutly meditating on that pure Supreme Absolute, eagerly engaged in the creation. sustenance and dissolution of the Universe; the repository of delight, protestful shout, sadness and separation; the place of repose of all living beings and the bestower of eternal peace, I offer my humble and respectful tribute to the venerable Mother Shrimati INDIRA GANDHI PRIYADARSHINI.

2. O Mother, on hearing the dreadful news of thy death, my power of speech turned dumb, my hands became weary and languid, my brain perturbed, my feet benumbed and my eyes enveloped in darkness. Thus all my activities came to a standstill.

लोके ते विमलं यशोऽनवरतं प्रोद्भासतां दीप्यताम्,
इत्थं चेतसि चिन्तयञ्जननि हे धृत्वा धृतिं तत्क्षणम्।
श्रद्धायास्सुमनोऽञ्जलिं सुमनसा भक्त्याऽर्पयन् सत्कविः,
काव्ये भावनिबन्ध लिखति सः श्रद्धाञ्जलिं सादरम् ॥३॥

आकाशे परिलक्ष्यते मलिनता नम्रा दिशोऽपि ध्रुवम्,
म्लानत्वं भुवि पादपादिषु तथा वायोर्महावक्रता।
रम्या हा धरिणी विवर्णवदना सन्दृश्यते साम्प्रतम्,
हा हा ब्रूहि किमद्य चात्र भवति ह्येतन्महानर्थकम् ॥४॥

हे माँ ! संसार में तेरा स्वच्छ यश निरन्तर देदीप्यमान होता रहे इस भावना को हृदय में विचार कर इस गहरे दुःख में शीघ्र ही धैर्य को धारण करके श्रद्धारूपी पुष्पाञ्जलि को पवित्र मन से भक्तिपूर्वक अर्पित करता हुआ मैं काव्य में अपनी श्रद्धामयी भावनाओं को बाँध कर श्रद्धाञ्जलि रूप में इस काव्य को सादर लिख रहा हूँ।३।

आज आकाश में मलिनता, दिशाओं में नम्रता, पेड़-पौधों में मुर्झायापन, वायु में वक्रता और पृथ्वी में खिन्नता दिखायी दे रही है। अरे ! बताओ आज संसार में ऐसा कौन सा अनर्थ हो गया है जिससे सारी प्रकृति प्रतिकूल दिखायी पड़ती है।४।

3. Mother dear, may thy spotless fame spread ever and anon illuminating the entire world. This thought appeared in my mind presently whereupon I consoled myself and wrote these verses with a pure and devoted heart to be humbly dedicated to thee as my loyal tribute.

4. A sullying dimness has enveloped the atmosphere; the quarters have stooped down; the trees and creepers appear faded and lustreless; the wind seems to blow crookedly; the entire earth appears sad and forlorn. O tell me what calamity has befallen the world. The very Nature has adopted a singularly unfavourable attitude.

इत्थं चिन्तयता तदैव कविना संरुद्धकण्ठेन हा !
दुःखेनातिविवर्णभावमनसा चाकाशवाण्या तया।
मन्दामन्दतया श्रुतं निगदितं कैश्चिद्विमूढैर्जनैः,
हत्या भारतगौरवस्य विहिता मान्येन्दिराया भुवि ॥५॥

वृत्तं निशम्य तदिदं समभूत्तदानीं,
नेत्रान्धता भुवि जनस्य मनःसु पीडा।
वक्षः प्रताड्य मनुजो विललाप भूयः,
हा हा हता सुजननी मम सेन्दिराद्य ॥६॥

ऐसे सोचते हुए कवि ने उसी समय अवरुद्ध कण्ठ से अत्यन्त दुःख एवं खिन्न भाव से धीमी-धीमी एवं त्वरित ध्वनि में आकाशवाणी कही हुई आवाज सुनी कि "किन्हीं मूढ़ लोगों ने भारत की गौरवभूत प्रधानमन्त्री श्रीमती इन्दिरा गाँधी की हत्या कर दी है" ।५।

इस समाचार को सुनकर समस्त लोगों की आँखो में अन्धेरा छा गया तथा मन को गहरा सदमा पहुँचा और वे 'आज मेरी माँ इन्दिरा मर गयी हैं' ऐसा कहते हुए छाती पीट-पीट कर रोये।६।

5. The Poet was brooding thus over the chaotic appearance of Nature when from the All India Radio an announcement was broadcast in choking words of sorrowful import :—The Hon'ble Prime Minister Shrimati Indira Gandhi has been shot dead by certain evilminded persons today.

6. On hearing this announcement everyone was stunned and overwhelmed. All became blind with tears welling up in their eyes and the minds extremely distressed. They screamed aloud beating their bosoms and falteringly uttering the words "Our Mother Indira is dead !"

निश्चेतनाः भुवि लुठन्ति जनाश्च केचित्,
केचित्क्वचित् व्यथितमानसमानवाश्च ।
विक्षिप्ततामुपगता व्यपहाय धैर्यम्,
वृत्तं निशम्य मरणस्य तवाद्य मातः ॥७॥

यस्याः प्रभाभरितभारतवर्षमेतत्,
लोके विकासपथमत्यधिकं प्रयातम् ।
सा मातृभूहितरता जगदम्बिकाद्य,
क्रूरैर्हताऽत्र विहितं ननु निन्द्यकर्म ॥८॥

हे माँ इन्दिरे ! तुम्हारी मृत्यु के अप्रिय समाचार को सुनकर कुछ लोग अचेतन होकर जमीन पर लुढ़क गये और कहीं कोई अत्यंत दुःखी होकर समस्त धैर्य को त्याग कर पागल से हो गये ।७।

जिस श्रीमती इन्दिरा गाँधी की प्रतिभा से परिपूर्ण होता हुआ भारतवर्ष अत्यन्त उन्नति को प्राप्त हुआ उस मातृभूमि की सेवा में संलग्न, समस्त संसार की मातृरूपा श्रीमती इन्दिरा गाँधी की आज क्रूर पापियों ने हत्या कर अत्यन्त निन्द्य कार्य किया ।८।

7. Mother Indira, the stunning news of thy death has struck down everyone senseless. They are rolling down on the ground in the excess of their grief maddening them to a frightful extent forsaking their fortitude.

8. Verily a base and foul deed was perpetrated by these ruthless ones by killing Indira Gandhi the Mother Figure of the entire Earth, who was engaged in the welfare of her Motherland and whose brilliant glory enabled the land of Bharata to blossom into a highly developed state of progress and prestige.

या भारतस्य महते हितचिन्तनाय,
दत्तावधानहृदया नितरां प्रवृत्ता।
अत्यन्तपूत हृदयां किल सेन्दिराद्य,
हा हा विमूढमतिभिर्निहिता कृतघ्नैः ॥९॥

प्रातः प्रयाणमतुलं जनताहिताय,
गेहात्कृतं सपदि हृष्टहृदा ययाद्य।
मार्गे दुरात्मचरितैः जननी हता सा,
हा भारतं विनिहतं निहतं धरायाम् ॥१०॥

जो इन्दिरा गाँधी भारतवर्ष की भलाई के लिए एकमत होकर हमेशा तल्लीन रहती थी, उस पवित्र हृदय श्रीमती इन्दिरा गाँधी की मूढमति लोगों ने आज हत्या कर दी।९।

जिस श्रीमती इन्दिरा गाँधी ने अत्यन्त प्रसन्नचित्त से आज लोकहित के लिए प्रातःकाल ही घर से अतुलनीय प्रस्थान किया था, अत्यन्त कष्ट है कि मार्ग में ही दुष्ट चरित्र वालों ने श्रीमती इन्दिरा गाँधी की हत्या करके मानो सम्पूर्ण विश्व में भारत की हत्या कर दी हो।१०।

9. Ungrateful wretches of vicious heart have struck down dead, our beloved Indira Gandhi of spotlessly pure heart who had always been engaged in singleminded attention towards the all round prosperiety of our Motherland Bharata Varsha.

10. With great eagerness and assiduity she left the house early in the morning in her round of engagements to bring about the welfare of the common people. But Lo! the spiteful iniquity of the base ones caused her death-nay, the death of the Motherland itself !!

यस्या उदारचरितं हृदयं विलोक्य,
दुष्टा भ्रमन्ति भवने सततं हि तस्याः।
विश्वासभूहृदयधारिणि मातृरूपे,
तैरेव तत्र निहता त्वमयीन्दिरे हा ! ! ११॥

"मातः" सदा भणति योऽत्र विनम्रभावैः,
प्रातः सदा नमति यो विनयप्रदर्शी ।
मूढाविमौ, विनिहता किल सा च ताभ्याम्,
तत्सद्मनि त्वरितमेव किमन्यकष्टम् ॥१२॥

जिस श्रीमती इन्दिरा गाँधी के उदार हृदय को देखकर के दुष्ट जन तेरे भवन में ही निरन्तर घूमते रहते थे, अत्यन्त विश्वास को हृदय में धारण करने वाली मातृरूपा हे इन्दिरा गाँधी ! अत्यन्त कष्ट है कि उन्होंने तुम्हें तुम्हारे ही घर में मार दिया ।११।

जो निरन्तर तुम्हारे घर में तुम्हें माँ कह कर पुकारता था और जो प्रातःकाल तुम्हें प्रणाम करता था, इन्हीं दोनों मूर्खों ने तुम्हारे ही घर में तुम्हारी हत्या की है, इससे अतिरिक्त कष्ट क्या हो सकता है ।१२।

11. Taking advantage of your largehearted benevolence these iniquitous wretches frequented your abode. It is indeed a pity that they struck you dead despite the fact that you were treating them like a loving mother.

12. One of the killers hovered round you always calling you 'Mother'. Another one used to pay respects to you every morning with feigned veneration. What can be more shameful than this betrayal of trust and confidence by these fools who murdered you in your own house !!

भव्याकृतिः परमपावनपावनी सा,
सौम्याकृतिः जनमनस्सुविनोदिनी सा।
भूमौ यदा निपतिता मृदुलेन्दिरा सा,
किं नो विकम्पितवती धरिणी प्रभूता !! १३॥

हा हा परार्थहितचिन्तनदत्तचित्ता,
ध्यानस्थिता धृतिमती हृदि बद्धभावा।
एकात्मवृत्तिनिरता जननीन्दिरा सा,
पाषाणखण्डहृदयैर्निहता तदैव ॥१४॥

उत्कृष्ट आकृति, अत्यन्त पवित्र, सरल स्वभाव, प्राणिमात्र के मनों को आनन्दित करने वाली, कोमल देहधारिणी वह इन्दिरा गाँधी जब पृथ्वी में गिरी होगी तब क्या पृथ्वी कम्पायमान नहीं हुई होगी ? अर्थात् अवश्य पृथ्वी कम्पायमान हुई होगी।१२।

दूसरों की भलाई की चिन्ता में दत्तचित्त, ध्यानस्थित धैर्यशालिनी, हृदय में शुद्ध विचारों को बाँधने वाली एकाग्रचित्त से कार्यनिरत उस आदरणीया इन्दिरा गाँधी को, अत्यन्त दुःख है कि, उसी समय पत्थर के टुकड़ों की तरह दिल वालों ने खत्म कर दिया।१४।

13. The very Earth would have trembled with excessive shock when you the personification of all noble qualities that endeared yourself even to the layman fell on the ground.

14. I have no doubt that the heart of those murderers was harder than a piece of rock, for they have killed you who always thought of the welfare of others whose fortitude was without any parallel and who was like a mother unto all.

हे हे विनिन्द्यचरितौ ननु नो प्रयाता,
लज्जा दयापि मनसोः युवयोस्तदानीम् ।
हा हा यदा विनिहता जननीन्दिरा सा,
क्रूरैः करैश्च सुखदा भुवनस्य शोभा ।।१५।।

हे हे विमूढहृदयौ ! युवयोः कुकृत्यैः,
विश्वासभूर्व्यपगता भुवनादिदानीम् ।
सम्पूर्णविश्वमधुना युवयोश्चरित्रम्,
हा निन्दति प्रतिपथं कटुवाक्यजालैः ।।१६।।

हे निन्दनीय चरित वालो ! क्या उस समय तुम दोनों के मन में लज्जा और दया भी नहीं आयी, जब तुमने संसार की शोभा सम्पूर्ण प्राणियों को सुख देने वाली श्रीमती इन्दिरा गाँधी को क्रूर हाथों से मार डाला ।१५।

हे भटके मन वालो ! तुम्हारे कुत्सित कार्य के द्वारा आज संसार से विश्वास ही उठ गया है, सारा संसार आज तुम्हारे दुश्चरित्र की प्रत्येक राह पर कठोर वचनों के द्वारा निन्दा कर रहा है ।१६।

15. O wicked murderes ! did your hearts not have the feelings of pity and shame when you raised your hands wielding the murderous weapons to kill our mother, dear Indira Gandhi who shed lustre everywhere and who made all the people of the world happy and prosperous.

16. O Silly murderes ! the entire world condemns you with adverse remarks for the very names of trust, faith, confidence and loyalty have vanished from the world on account of your betrayal and offensively rank behaviour.

हे हे भुशुण्डि ! गलिता प्रथमं कथन्न,
हे गोलिकाः ! किमिति नो पतिता हि भूमौ ।
हे हे दुरात्मचरितौ च तथान्यमूर्खाः,
यूयं कथन्न विरताः निजनिन्द्यकृत्यात् ॥१७॥

हे हे निकृष्टचरिताः प्रियभूकलंकाः,
भूमौ स्थिता अपि सदा बहुभारभूताः ।
युष्मत्कुकृत्यमवलोक्य समस्तलोके,
हा लज्जते सपदि मानवमात्रमत्र ॥१८॥

हे बन्दूक ! तुम इन्दिरा गाँधी पर प्रहार करने से ही गल क्यों नहीं गयी और हे गोलियो ! तुम श्रीमती इन्दिरा गाँधी के शरीर पर लगने से पहले जमीन पर क्यों नहीं गिर गयीं ? हे निन्दनीय चरित्र वालो तथा इसी प्रकार के अन्य सहयोगी मूर्खो ! तुम लोग अपने निन्द्य कृत्य से क्यों नहीं विरत हो गये ? ।१७।

अरे ! निन्दनीय आचरण वाले एवं प्यारी भारत माँ के लिए कलंकरूप ! पृथिवी के भार रूप ! तुम्हारे इस कुत्सित कार्य को देखकर संसार का प्राणिमात्र लज्जित हो रहा है ।१८।

17. O stengun ! why did you not break into pieces before the attack on her ? O Bullets ! why did you not fall on the ground before hitting her ? O the two killers and others of that ilk ! why did you not stop from your bad deed ?

18. O wicked ones of base activities. you are a stigma on our beloved land. You were a burden unto this mother earth. There is no one in the world of living beings who does not feel ashamed for your foul deed.

धर्मान्धवृत्तनिरतैः यमदूतकल्पैः,
क्रूरैः करालहृदयैः कलिकल्मषाख्यैः ।
सर्वत्र धर्मसमभावनिविष्टभावा,
सा चेन्दिरा विनिहता समधर्मचेताः ॥१९॥

युष्मादृशामत्र विनिन्द्यकार्यै-
रन्योन्यविद्वेषविशेषतो हा ।
पीडापरा या घटनास्तु जाता-
स्ताः भ्रातृभावाय कलंकरूपाः ॥२०॥

धर्म में अन्धे हो आचरण करने वाले यमदूत रूप क्रूर-कराल हृदय, और कलियुग के कलंक रूप मूर्खों ने सर्वत्र समान धर्म का आचरण करने वाली अत्यन्त उदारचेता उस इन्दिरा गाँधी को मार डाला ।१९।

आप सरीखे लोगों के निन्दनीय कार्यों के द्वारा आपसी विद्वेष से जो दर्दभरी घटनाएँ घटी वे सभी भाईचारे के लिए कलंक रूप हुई ।२०।

19. The highly liberal hearted Indira Gandhi whose mind, words and actions were based on noble ideals of religious tolerance has unfortunately been done to death by these ruthless and hard hearted murderers guilty of blind bigotry who are not inferior to the messengers of YAMA the god of Death.

20. The painful incidents, occured due to your condemnable deeds, are a stigma on the fraternal understanding.

परस्परं स्नेहविशेषतस्समाः
शमं प्रयान्ति प्रथमं समस्याः ।
कदाप्यहो दारुणदुःखदायी
न घट्यतेऽयं घटनाक्रमोऽत्र ॥२१॥

परं विधातुस्तु विधानमेतत्
विचित्रमेव प्रतिभाति लोके ।
अहो करोत्येष समस्तकार्यं
जनस्तु तत्प्रेरणयैव नित्यम् ॥२२॥

आपस में स्नेहपूर्वक ये सभी समस्याएं पहले ही शान्त हो जाती तो यह अत्यन्त दुःख देने वाला घटना क्रम कभी नहीं घटता ।२१।

किन्तु इस संसार में विधाता का विधान विचित्र ही दिखाई देता है। संसार का प्राणी उससे ही प्रेरित होकर समस्त कार्य करता है ।२२।

21. Had all these problems been solved in an atmosphere of goodwill, this series of painful events would have never come up.

22. But, the writ of destiny seems to be quite strange and the worldly beings act according to it.

छिन्नद्रुमा इव यदा जननीन्दिरा सा,
भूमौ शुभा निपतिता मृदुलस्वभावा।
जातं तदा धरणि ते बहुकष्टमद्य,
नो वर्णनस्य करणे कविरत्र शक्तः ॥२३॥

निपतिता यदा श्रीमतीन्दिरा, सपदि ते प्रिये क्रोडसीमनि।
अयि धरे कथन्त्वं विदीर्णतां, न हि गता तदा मातृरूपिणी ॥२४॥

परमहो यदा विश्वमण्डले, न हि समाश्रयं यच्छति प्रजा।
अयि धरे तदा स्वाङ्कसीमनि त्वमपि यच्छसि स्नेहसौहृदम् ॥२५॥

कटे हुए वृक्षों के समान जब वह इन्दिरा गाँधी लोक कल्याण-कारिणी, कोमलस्वभाली मातृरूपा भूमि में गिरी होगी, तब हे पृथ्वी तुन्हें जो कष्ट हुआ होगा उसका वर्णन करने में कवि समर्थ नहीं है।२३।

हे धरे! आदरणीया श्रीमती इन्दिरा गाँधी जब तुम्हारी गोद में धड़ाम से गिरी होगी, तब क्या हे मातृरूपिणी पृथ्वी तुम्हारा दिल विदीर्ण नहीं हुआ होगा ? अर्थात् अवश्य हुआ होगा।२४।

परन्तु आश्चर्य है कि संसार में जब कोई भी प्राणी आश्रय नहीं देता है अर्थात् प्राणी मृत्यु को प्राप्त हो कर निराश्रित हो जाता है तब हे पृथ्वी ! तुम ही एक ऐसी हो जो अपनी निर्मल गोद में उसे स्नेह और सौहार्द प्रदान करती हो।२५।

23. The poet is not competent to describe the pain and anguish of the very ground where the tender hearted Mother Figure Indira Gandhi fell down like a tree cut at the very root.

24. O Mother Earth ! how is it possible that your heart is not rent to pieces when the esteemed Indira Gandhi fell into your lap all of a sudden ?

25. In the wide world when a living organism does not find shelter and succoure elsewhere it is you who lovingly and gladly bestow on it the pleasure of rest in your cosy lap.

यदि धरातले मातृरूपिणीं, परमपावनीमिन्दिरामिमाम् ।
न हि सुरक्षितुं सक्षमो जनो वद न कस्त्वदन्या समाश्रयेत् ॥२६॥

धरणि वेद्मि ते तां व्यथाकथां, कुटिलपापिनो धर्मचारिणः ।
भुवनभाविनः पुण्यधारिणः, त्वमयि यच्छसि स्वाङ्कनिर्मलम् ॥२७॥

धरणि धार्यते किं त्वया नहि, कुटिलसन्ततिः पापकारिणी ।
परमहो त्वया किं विधीयते, ननु समाश्रयी त्वं हि वर्तसे ॥२८॥

यदि संसार में मातृरूपिणी परमपावनी श्रीमती इन्दिरा गाँधी को भी व्यक्ति सुरक्षा देने में समर्थ नहीं है तो तुमही बताओ उन्हें तुम्हारे अलावा कौन आश्रय दे सकता है अर्थात् कोई नहीं ।२६।

हे पृथ्वी ! मैं तुम्हारी उस व्यथाकथा को जानता हूँ कि तुम्हें कुटिल, पापी, धर्मचारी, लोक कल्याणकारी, पुण्यधारी सभी प्राणियों को अपनी गोद में आश्रय देना पड़ता है ।२७।

हे पृथ्वी ! क्या तेरे द्वारा कुटिल सन्तान को आश्रय नहीं दिया जायेगा अर्थात् अवश्य दिया जायेगा, क्योंकि तुम भी क्या कर सकती हो कि तुम सब प्राणियों को आश्रय देने वाली हो इसलिए इन्हें भी तुम्हें आश्रय देना पड़ेगा ।२८।

26. No one else can accord peaceful and permanent rest to our beloved mother-like Indira. Only you are capable of it.

27. O Earth, I understand your unpleasant predicament of being compelled to offer asylum unto all and sundry, good and bad, the righteous and the iniquitous in your benevolent lap.

28. What else can you do but offer a place of rest for these sinful sons too Verily you are the succour unto all,

परमहो जगन्मृत्युना यया,
सपदि कम्पितं तत्क्षणं हि यत्।
प्रकटयत्यमुं श्रीमतीन्दिरा-,
गुणगणान्वितं गौरवं महत् ॥२९॥

अयि महोज्ज्वले ते मृतौ द्रुतम्,
विविधतामयी चित्रतापरा।
भरतभूरियं शोकविह्वला,
सपदि संगतानाथतां भुवि ॥३०॥

किन्तु जिस श्रीमती इन्दिरा गाँधी की मृत्यु से शीघ्र ही समस्त संसार कम्पित हो उठा इस प्रकार संसार का कम्पित होना ही तेरे महान् गुणगौरव को स्वतः प्रकट कर रहा है।२९।

हे अत्यन्त उज्ज्वल चरित्रशालिनी श्रीमती इन्दिरा गाँधी ! तेरी हत्या होने पर विविधतामयी और चित्र विचित्र रूपधारिणी यह भारतभूमि शोक से विह्वल हो करके आज संसार में अनाथ हो गयी है।३०।

29. The very fact that the entire world trembles and quivers, indicates your lofty stature for, at the death of Indira it is inevitable.

30. O hightly lustrous Mother Indira, the land of Bharata with the diversity of its cultural tradition and varieties of customs and manners has become helpless and forlorn due to thy premature death.

निधनतापरं वृत्तमप्रियं,
श्रवणयोर्यदा संगतं तव ।
हृदयतन्त्रिका शून्यतां गता,
निखिलदेहिनां मर्मवेदिनाम् ॥३१॥

भरतभूमहामात्य इन्दिरा,
दुरभिमानिभिर्नाशिताधुना ।
श्रुतमिदञ्च यैर्जायते च तद्,
हृदि विषादकोपादिकं सकृत् ॥३२॥

हे मातृरूपा इन्दिरा गाँधी तुम्हारे मृत्युपरक अप्रिय समाचार के कानों तक पँहुचते ही मर्मवेदी समस्त प्राणियों की हृदयतन्त्री शून्यता को प्राप्त हो गयी ।३१।

भारतवर्ष की प्रधानमन्त्री की आज किन्हीं दुष्टों ने हत्या कर दी, जिन्होंने यह समाचार सुना, उनके हृदय में विषाद, क्रोध, घृणा आदि एक साथ उत्पन्न हुए ।३२।

31. On hearing the unpleasant news of thy death, O Mother Indira, the very vitals of the entire living beings over the earth ceased to function.

32. Indira the Prime Minister of India has been killed by the vicious ones. Whoever heard this news was overwhelmed by distress and anger at the very instant.

विश्वेशासनदक्षतामुपगता या शासने शासिका
सम्पूर्णा भरतावनिः भुवितले संरक्षिता पोषिता।
तस्यास्तन्निलये कृतां कलुषितां संश्रुत्य हत्याकथाम्,
सम्प्राप्तं भयमद्भुतं जनहृदि श्रुत्वा दशां कष्टदाम् ॥३३॥

यस्याः शासनमागतं विकसितं भव्यं प्रियं भारतम्,
सर्वोत्थानपरम्परां प्रतिगतं सर्वप्रकारेण यत्।
तस्यास्तन्निलये निशम्य निधनं सर्वात्मना कष्टदम्,
संजातो मम मानसे ह्यतितरां खेदो हि मर्मान्तकः ॥३४॥

जो इन्दिरा गाँधी समस्त विश्व में अपने कुशल शासन के द्वारा लोकप्रियता को प्राप्त हो गयी थी जिसने सम्पूर्ण भारतवर्ष को बड़े प्यार और निष्ठा से पाला और पोसा उसके ही घर में किये गये हत्या के कलुषित वृत्तान्त को सुन कर समस्त संसार भयावह स्थिति को प्राप्त हो गया।३३।

जिस श्रीमती इन्दिरा गाँधी के शासनकाल में भारतवर्ष सभी प्रकार से फला, फूला विकसित हुआ, उस इन्दिरा गाँधी का उसके ही घर में सभी प्रकार से कष्ट प्रदान करने वाला निधन का समाचार सुन कर मेरे मन में अत्यन्त मर्मान्तक दुःख हुआ।३४।

33. She had been popular all over the world on account of her ability to administer her country which she protected and developed. On hearing the news of her murder at her very residence the dismay and fright in the hearts of the common people was much.

34. Our beloved country India attained full development and rapid progress in every respect during her rule. Her murder at her very residence was indeed horrible and it made me extremely sad,

यद् जात्यर्थमतीव लाभमधुना देव्या यया वै कृतम्,
तस्या एव सुतैरतीव विमला माता जगन्मोहिनी।
सा छद्माभिहता सदा हितकरी सद्धर्मरक्षारता,
हा हा चेतसि जायते बहुघृणा श्रुत्वा कुकृत्यञ्च तत् ॥३५॥
देशोत्थानमतिः प्रिया हितकरी श्रद्धास्पदा भाविनी,
सर्वैश्वर्यंकरी सदा सुखकरी पुण्यप्रदा शोभना।
श्रीभिस्संवलितेन्दिरा विनिहता दुष्टैश्च या साम्प्रतम्,
तेनैवात्र मनोऽति दुःखितमिदं क्रोधाग्निना दह्यते ॥३६॥

जिस समाज के लिए इन्दिरा जी ने अत्यन्त लाभ पहुँचाया उसी समाज के पुत्रों ने अत्यन्त विमल, संसार को प्रभावित करने वाली एवं निरन्तर परोपकार में लगी हुई सद्धर्म की रक्षा में दत्तचित्त उस इन्दिरा गाँधी को कपट से मारा। इसप्रकार के कुकृत्य के वृत्तान्त को सुनकर मानवमात्र के मन में घृणा उत्पन्न हो गयी।३५।

देश के उत्थान के लिए प्रवृत्त बुद्धि वाली, प्रिय एवं हितकारी श्रद्धास्पद आनन्ददायिनी, सभी ऐश्वर्यों को प्रदान करने वाली और सुख देने वाली, पुण्य को प्रदान करने वाली, ऐश्वर्य से सम्पन्न श्रीमती इन्दिरा गाँधी को आज दुष्टों ने मार डाला है इसीकारण मन आज अत्यन्त दुःखित होता हुआ क्रोध की अग्नि से जल रहा है।३६।

35. The mind of all human beings in the world is filled with contempt for the wicked ones for whose bolk she had done much in her magnanimous effort to accord security and all round development.

36. Her mind was always engaged in finding out ways and means for the uplift of the Motherland. She did everything to please the general public. She was large hearted and liberal minded. She was richly endowed with all good qualities. To hear that she has been killed by the wicked persons causes unhappiness all round and makes the heart burn wiih the fire of anger.

भुवनमण्डलमण्डनमण्डने,
जननि ते निधनस्य कथाश्रुतौ ।
वसुमती सकला ननु दृश्यते,
सघनदुःखपरा तमसावृता ॥३७॥

नयनवारिझरैः परिपूरिता,
हृदयशोकभरा व्यथितास्तथा ।
युवतयो युवका विलपन्ति हा,
पुनरहो पुनरेव पुनः पुनः ॥३८॥

समस्त संसार की शोभा रूप हे माँ इन्दिरा गाँधी ! तुम्हारे निधन के समाचार को सुन कर सम्पूर्ण पृथ्वी अपने को अत्यन्त दुःखी एवं अन्धकार से घिरी हुई अनुभव कर रही है।३७।

आँखों में आँसुओं की धारा, हृदय में शोक का सागर और अत्यन्त दुःखी समस्त युवक एवं युवतियाँ बार-बार विलाप करने लगे।३८।

37. O Mother Indira, you had been illuminating and embellishing the entire world and the news of your death makes all of them feel enveloped in darkness. They are excessively miserable.

38. The eyes are filled with torrents of tears, the heart with grief. Everywhere young men and women lament again and again.

भुवनकार्यविधेर्न हि वर्तते,
किमपि बोधपरश्च तथाप्यहो ।
सरलभावयुता भुवि बालकाः,
तव वियोगपरा विलपन्ति हा ॥३९॥

पलितकेशपरा सकला नराः,
निखिलनार्य इमाः व्यथितास्समाः ।
अहह ताः विलपन्ति मुहुर्मुहुः,
विमलवक्षप्रताडनतत्पराः ॥४०॥

संसार की क्रियाविधि का जिनको लेशमात्र भी ज्ञान नहीं है तब भी सरल स्वभाव वाले संसार के बालक तुम्हारे विरह में विलाप करते हैं।३९।

अत्यन्त वृद्ध एवं समस्त विश्व की नारियाँ अपनी छाती को पीट-पीट कर तुम्हारे निधन पर बार-बार विलाप कर रही हैं।४०।

39. The innocent children too of the entire world weep and cry though they have no knowledge of the intricasies of the workings of the worldly affairs.

40. The grey haired men and women too are distressed. They weep again and again beating their chests.

भुवनमण्डलमानव एव हि,
जननि ते निधनेन विलोक्यते ।
भयपरो व्यथितोऽपि च दुःखितो,
बहुविधस्त्रसितोऽपि च दृश्यते ॥४१॥

दिशस्समस्ताः प्रदिशस्समस्ता,
नभोऽपि भूमिश्च जगत्समस्तम् ।
श्रुत्वेन्दिराया निधनस्य वृत्तम्,
वियोगभूमिं प्रति संगतं हा ॥४२॥

हे माँ ! समस्त संसार का मानव मात्र तुम्हारे निधन से अत्यन्त दुःखित और भयपीड़ित एवं व्यथित और त्रस्त भी दिखायी दे रहा है ।४१।

समस्त दिशाएँ एवं प्रदिशाएँ आकाश और पृथ्वी तथा समस्त संसार श्रीमती इन्दिरा गाँधी के आकस्मिक निधन को सुन कर अत्यन्त वियोग को प्राप्त हो गये ।४२।

41. O Mother, men of the entire world are miserable at your death. They are filled with fear and terror at the turn of events.

42. All the quarters, the entire sky, the earth, nay the whole of the universe groan in their separation from you, O Indira.

विलपन्ति विश: प्रविशश्च तथा
गगनं विलपत्यतितारखैः ।
विलपत्यतिकष्टहृदा भुवनं,
निधनेन तवासमये जननि ॥४३॥

विलपन्ति खगा: पशवोऽपि नगा:,
विलपन्ति च कीटपतङ्गदला: ।
तरवो विलपन्ति वियोगभरा:,
निधनेन तवासमये जननि ॥४४॥

हे माँ ! तुम्हारे असमय निधन के कारण दिशाएँ विलाप करने लग गयी, सारा आकाश ऊँचे स्वर में विलाप करने लग गया । इतना ही नहीं, समस्त भूमिमण्डल अत्यन्त कष्ट से विलाप करने लग गया ।४३।

हे माँ ! तुम्हारे आकस्मिक निधन से दुःखी होती हुई दिशाएँ, प्रदिशाएँ, पशु, पक्षी, कीट, पतङ्ग, पेड़, पौधे आदि समस्त संसार वियोग से दुःखी होता हुआ विलाप कर रहा है ।४४।

43. On your untimely death, O Mother, all the quarters and the entire firmament lament loudly. The pain they feel is excessive.

44. The birds, animals and even hills and mountains lament. The germs and insects too lament. The trees lament in their separation at your untimely death, O Mother.

अयि ते मरणं विलोक्य हे, पवनश्चापि विरामागतः ।
विभया प्रभयापि चन्द्रमाः, प्रतियातो भुवि मन्दतां द्रुतम् ॥४५॥

भुवने तपनस्य तापनं, शिथिलत्वं तु तदा गतं ध्रुवम् ।
जननी जनवल्लभा यदा, प्रतियाता तु दिवं प्रतीन्दिरा ॥४६॥

अयि काल दयामयीं शुभां, कुशलां शासनशासिकामिमाम् ।
जननीं भरतावनेः प्रियां, हरतः किन्नु दयागता न वा ॥४७॥

हे माँ तेरी मृत्यु को देख कर के हवा भी रुक गयी और चन्द्रमा अपनी विभा एवं प्रभा से मन्दता को प्राप्त हो गया ।४५।

संसार में सूर्य का तेज भी तुम्हारी मृत्यु देखकर शिथिल हो गया, क्योंकि समस्त संसार की लोकप्रिय माँ आज स्वर्ग सिधार गयी ।४६।

हे मृत्यु ! दयामयी, कल्याणकारिणी, कुशलशासिका, भारतभूमि की प्यारी माँ श्रीमती इन्दिरा गाँधी को हरते हुए क्या तुमको दया नहीं आयी ।४७।

45. On perceiving your death, O Mother, the wind has come to a stand still. Bereft of its lustre and glitter the moon has become dull to the core.

46. When Mother Indira, the beloved of the layman wended her way to the heaven the blazing sun lost its capacity to scorch.

47. O Deity of Death, did not the duality of mercy befall you when you forcibly dragged the beloved mother of Bharata Varsha, the efficient administrator full of the milk of kindness ?

निजजन्मभुवः कृते यया, सकलं जीवनमर्पितं प्रियम् ।
हरतः किल चेन्दिराञ्च तां, मरण ! ब्रूहि दयागता न वा ॥४८॥

असहायधरामिमां प्रियां, परिहाय क्व गतासि सम्प्रति ?
भुवनभ्रमनाशकारिणि सपदि ब्रूहि दयामयीन्दिरे ॥४९॥

अयि यत्सुनिमेषमात्रतो भयभीताः प्रभवन्ति शासकाः ।
अनिमेषमिमं विलोक्य ते, हृदयं मे परिपीड्यतेऽधुना ॥५०॥

जिस माँ इन्दिरा ने अपनी मातृभूमि के लिए अपना समस्त जीवन आद्योपान्त अर्पित कर लिया उस इन्दिरा को हरते हुए हे मौत ! बताओ क्या तुम्हें दया आयी या नहीं ।४८।

हे दयामयी इन्दिरा ! इस प्यारी पृथ्वी को असहाय छोड़ कर तुम कहाँ चली गयी हो ? हे संसार के भ्रम को नाश करने वाली इन्दिरे ! शीघ्र हमें बताओ ।४९।

अयि इन्दिरा गान्धी ! जिस तुम्हारे निमेष मात्र से ही सारे संसार के शासक भयभीत होते थे, ऐसी तुम्हें आज अनिमेष देखकर मेरा हृदय अत्यन्त पीडा को प्राप्त हो रहा है ।५०।

48. O Death tell me; has mercy befallen you or not as you dragged that Indira who had dedicated her entire life for the sake of her motherland ?

49. O Benevolent Indira, the destroyer of confusion in the minds of the entire world, tell me quickly where you have gone leaving your beloved land of birth helpless.

50. The administrators of all the nations of the world were awe struck at the mere wink of your eyes. Now, seeing you winkless yourself, my heart grieves.

प्रथमं तु समाश्रयस्त्वया, सकलेभ्यस्तु सदैव दीयते।
परमद्य निराश्रया सती, पतिता सा भुवि कीदृशीन्दिरा ॥५१॥

कथमत्र विधे त्वयि द्रुतं, जननीं तां प्रति वक्रता गता।
यदियं जनसौख्यदायिनी, सहसा चैव हृता मनस्विनी ॥५२॥

प्रकृतेर्नियमोऽत्र वर्त्तते, भुवि यो जन्म दधाति मानवः।
स हि याति विलीनतामपि, नियमः स्वीकृत एष किन्त्वया ॥५३॥

पहले जिस इन्दिरा गान्धी के द्वारा संसार के प्राणिमात्र को पवित्र आश्रय दिया जाता था, वही आज तुम आश्रयविहीन हो करके पृथ्वी में किस तरह गिरी हो।५१।

हे विधाता ! तुम श्रीमती इन्दिरा गाँधी के प्रति शीघ्र ही इस तरह कैसे वक्र हो गये हो जो तुमने समस्त प्राणियों को सुख प्रदान करने वाली मनस्विनी श्रीमती इन्दिरा गाँधी को सहसा ही हर लिया है।५२।

इस संसार में प्रकृति का नियम है कि जो मनुष्य संसार में जन्म लेता है वह अवश्य ही विलीनता को प्राप्त होता है हे इन्दिरे ! क्या तुमने इसी नियम को स्वीकार किया है।५३।

51. Formerly, O Indira succour was extended by you to all and sundry; but how is it that you yourself have become bereft of succour ?

52. This noble minded Mother, she who accorded happiness unto the common man, is looked askance at by you, O Fate !

53. There is a Law of Nature that the man who is born gets dissolved too. Has that Law been adopted by you ?

मनसा वचसापि कर्मणा, मनुजैर्विश्वनिवासिभिस्समैः ।
सुमनोञ्जलिभिः प्रपूज्यते, चरणस्ते सततं हि श्रद्धया ॥५४॥
अयि भारतमानवर्द्धिनि, सरले हा प्रियदर्शिनीन्दिरे ।
निधनस्य दशां विलोक्य ते, महदाक्रोश इहैव जायते ॥५५॥
अयि भारतभूस्थले स्थले, महदाक्रोशपरा समागता ।
जनताहृदयेषु तत्क्षणं, विपुला क्रान्तिविनाशकारिणी ॥५६॥

मन से, वाणी से एवं कर्म से संसार के समस्त प्राणी अत्यन्त श्रद्धा से तुम्हारे चरणों में सुमनाञ्जलि अर्पण करते हैं ।५४।

भारत के सम्मान को बढ़ाने वाली सरल, निश्छल हे श्रीमती इन्दिरा गाँधी ! तुम्हारी मृत्यु की स्थिति को देखकर सभी लोगों के हृदय में अत्यन्त आक्रोश उत्पन्न हुआ और हत्यारों के प्रति प्रतिशोध की भावना उत्पन्न हो गयी ।५५।

इस जघन्य कृत्य के कारण भारत के प्रत्येक भूभाग में अत्यन्त आक्रोश से भरी हुई अत्यन्त विनाशकारिणी क्रान्ति जनता के हृदय में उत्पन्न हो गयी ।५६।

54. Floral tribute is paid at thy feet faithfully by all the people of the vast world mentally, verbally and physically.

55. O Priyadarshini Indira, thanks to you the honour and prestige of India has gone up. On seeing you dead a feeling of revengeful hatred against the murderers attended with revulsion has enveloped the people's heart.

56. On account of this repulsive act every corner of India is infested with a rebellious spirit that does not hesitate to strike down at opposition.

जननी निधनेन दुःखितः, सुत एष दयावशं गतः।
अयि तेन नियन्त्रितस्तदा, नरसंहारभयावहो द्रुतम् ॥५७॥

क्रोधाग्निं भुवनस्य भावभरितं सम्यक्प्रकारेण यः,
सद्बुद्ध्या शमयन्नतीव विकलाञ्चैतामशान्तिं तथा।
लोके स्वात्मधृतिं विपत्तिसमये योऽदर्शयत्सम्प्रति,
भूयादेष स एव सौख्यनिलयो राजीवगान्धी सदा ॥५८॥

माता की मृत्यु से अत्यन्त दुःखी राजीव गाँधी इस नरसंहार रूपी क्रान्ति को देखकर अतिशय द्रवीभूत हो गया और उसने शीघ्र ही इस नरसंहार रूपी भयावह स्थिति पर अविलम्ब नियन्त्रण पा लिया ।४७।

श्रीमती इन्दिरा गाँधी के प्रति श्रद्धामयी भावनाओं के कारण जनता में उठी हुई क्रोधाग्नि को और विकराल अशान्ति को लोकहित में अपनी सद्बुद्धि के द्वारा जिस राजीव गाँधी ने शान्त करते हुए संसार में विपत्ति के समय अतिशय धैर्य को प्रदर्शित किया वही राजीव गाँधी संसार के समस्त प्राणिमात्र के लिए सुख-सम्पत्ति का आश्रय-स्थान बने ।५८।

57. Though griefstricken due to the death of his mother her beloved son Rajiv melted with pity at this rebellious holocaust and stopped it from further escalation.

58. The frightful disturbance to peace that had its origin in the spontaneous anger of the loyal people was curbed by Rajiv Gandhi who exhibited great fortitude at the time of great danger full of grief. May he be the source of comfort and consolation to all living beings.

मातस्त्वदीयचरणाम्बुजभक्तिभावाः,
स्नेहाश्रुपूरितपराः प्रियभारतीयाः ।
स्वप्नेऽपि विस्मृतिपथं न कदापि लोके,
नेष्यन्ति चारुचरितं तव पावनं तत् ॥५९॥

संघर्षपूरितमिमं तव जीवनं हे,
मातस्सदा दिशतु लोकहिताय शिक्षाम् ।
त्वद्दर्शितं जननि पूज्यपथप्रयाणं,
श्रद्धाञ्जलिश्चरणयोः स हि तेऽत्र मान्यः ॥६०॥

हे माँ ! तुम्हारे कमलरूपी चरणों के प्रति भक्तिभाव से परिपूर्ण स्नेहाश्रु से द्रवीभूत समस्त भारतीय तुम्हारे सुन्दर एवं पवित्र चरित्र को स्वप्न में भी नहीं भूलेंगे ।५९।

संघर्ष से परिपूर्ण लोकहितकारी तुम्हारा जीवन संसार में लोककल्याण की शिक्षा प्रदान करता रहे और तुम्हारे द्वारा लोकहित के लिए प्रदर्शित पूजनीय मार्ग पर चलना ही तुम्हारे चरणों में सच्ची श्रद्धाञ्जलि होगी ।६०।

59. O Mother Dear, all the Indians are dedicated in their heart of hearts to the loyalty to you and what you stand for. They will never forget your lifelong endeavour for everything good.

60. Let this life of thine, full of struggle, impart a valuable lesson to all the people. Traversing the path pointed by thee shall alone be the most fitting tribute unto thee.

किं किं त्वया नहि कृतं जननीन्दिरे हे,
हा भारतस्य यशसे महते हिताय ।
तस्माद्धि भारतमिदं मनसा स्मरन्ते,
श्रद्धाञ्जलिं चरणयोः वितनोति भक्त्या ॥६१॥

देशाय वै वीरगतिं गतायाः, रक्तस्य यस्याः पतिताः कणाः ये ।
ते ते भविष्यन्ति सदैकतायाः, प्रतीकरूपाः जगतीतलेऽस्मिन् ॥६२॥

युगो विलीनस्तु सह त्वयैव, हे मातृरूपे जगदम्ब भव्ये ।
विश्वेतिहासे तव शासनस्य, ह्यद्यावधि किन्न मनोरमोऽयम् ॥६३॥

हे माँ ! तुमने भारत की भलाई के लिए क्या-क्या नहीं किया ? उन्हीं सत्कार्यों को मन से स्मरण करता हुआ सारा भारतवर्ष आपके चरणों में श्रद्धाञ्जलि अर्पण कर रहा है ।६१।

उस श्रीमती गाँधी के देश के लिए वीरगति को प्राप्त होते हुए उसके शरीर से जितनी भी खून की बूँद इस धरती पर गिरी होंगी वे सभी इस संसार में हमेशा राष्ट्रीय एकता की प्रतीक होंगी ।६२।

हे मातृरूप कल्याणकारिणी श्रीमती इन्दिरा गाँधी ! विश्व के इतिहास में आज तुम्हारे शासन का सुन्दर युग तुम्हारे साथ ही विलीन हो गया ।६३।

61. What all things have been done by you to raise living standard in India ! They are thankfully remembered by the Indians and their tribute to you.

62. The drops of blood shed by her when she attained the goal of the heroes will symbolise the unity and integrity of the Nation.

63. An era has come to an end alongwith you, O Mother of divine qualities ; in the History of the world the era of your administration shall ever be an inspiring period,

अखण्डतायै भुवि भारतस्य, त्वदीयमेतद् बलिदानमत्र।
स्वर्णाक्षरैस्ते रजतस्य पट्टे, लेखिष्यतीति प्रियनाम मातः ॥६४॥
महाप्रयाणं भुवनात्तवेदं, न विस्मरिष्यन्ति कदापि लोकाः।
प्रणम्यभक्त्यापि च निष्ठयापि, समर्चयिष्यन्ति पदाम्बुजं ते ॥६५॥
यावच्चन्द्रदिवाकरौ विलसतो यावच्च वायुस्तथा,
यावद्व्योम विराजते जननि हे यावद्धरा शोभते।
यावद्विश्वमिदं विभाति सकलं यावज्जलं निर्मलम्,
तावत्कीर्तिरतीव भव्यविमला ते राजतां भ्राजताम् ॥६६॥

हे माँ! संसार से तुम्हारे इस महाप्रयाण को संसार कभी भी नहीं भूलेगा और भक्ति एवं श्रद्धा से प्रणाम करता हुआ तुम्हारे कमलरूपी चरणों की हमेशा पूजा करेगा।६५।

हे जननि! इन्दिरे! जब तक सूर्य और चाँद शोभायमान हैं, जब तक वायु, आकाश, पृथ्वी, जल एवं विश्व विद्यमान हैं, तब तक तुम्हारी अत्यन्त उज्ज्वल एवं स्वच्छ कीर्ति संसार में देदीप्यमान होती रहे।६६।

हे माँ! भारतभूमि की अखण्डता के लिए तुम्हारा यह बलिदान चाँदी के पट्ट पर सोने के अक्षरों में निश्चय रूप से लिखा जायेगा।६४।

64. Your martyrdom for the preservation of the national integrity and solidarity of India shall be engraved in golden letters and set in silver frames.

65. The people will never forget your dignified departure from this world. They will adore your lotus like feet and bow down to them with great devotion.

66. O Mother Indira, may your renown of spotless purity shine gloriously as long as the moon and the sun blaze; as long as the wind blows; as long as the sky extends far and wide; as long as the earth revolves; as long as there is water in the oceans; as long as the universe exists.

श्रद्धाञ्जलिमिमं भक्त्या श्रद्धाभावसमन्वितः ।
तामेवार्पयेद्देवीमिन्दिरां लोकमातरम् ॥६७॥

श्रद्धाभाव से समन्वित होता हुआ यह कवि भक्तिपूर्वक इस श्रद्धाञ्जलि को लोकमाता उन इन्दिरा जी के ही चरणों में अर्पित करता है।६७।

67. THIS VERBAL TRIBUTE IS LAID AT THE FEET OF DEVI INDIRA, THE UNIVERSAL MOTHER WITH DEVOTION AND FAITH.

इति कविरत्नश्रीकृष्णसेमवालविरचितं 'महाप्रयाणम्' समाप्तम्।

देवीन्दिराऽन्तर्हिता !

(प्रो० रेवाप्रसाद द्विवेदी, वाराणसी)

(१)

गोलीभिः सहसाऽङ्गरक्षणकृतां संवर्षिताभिः क्षता
मेघे विद्युदिवाद्य हा भगवती देवीन्दराऽन्तर्हिता ।
विश्वं स्तब्धमिवास्ति पूर्णमधुना, काष्ठा रुदन्ति, क्रुधा
चेतः संप्रति दह्यते, मुखमिदं लिप्तं नु नः कज्जलैः ॥

(२)

गान्धी देवी बत बत गता स्वर्गमद्य प्रभाते
स्वैरेवाङ्गैरिव परिजनैः पीतरक्ता क्षणेन ।
एवंभूतैर्विषधरशतैर्दश्यमानाऽपि मात-
र्मेदिन्यद्य श्वसिषि किमिव, क्षीयसे किं न तूर्णम् ॥

(३)

को वा कुत्र सुरक्षितः प्रतिगृहं यद् दस्यवो जाग्रति,
ज्वालाभिः परिवारितोऽङ्कुर इव श्वासोऽस्मदीयोऽस्थिरः ।
वामं दक्षिण एष, दक्षिणमसौ वामश्च नश्चर्वितुं
धिग् धिग् दैत्यमुखायते कटुरटद्दंष्ट्राऽट्टहासोत्कटः ॥

(४)

झञ्झावातशतैश्चला जलनिधेरुत्तालवीचिव्रजा-
घातैर्जर्जरिता च नः खलु तरी येन स्म संधार्यते ।
तं हे नाविक! कूपदण्डमह हा स्वैरेव हस्तैर्भवान्
धिग् धिक् कर्त्तितुमाः कृतान्तसदृशैः केनासि संशिक्षितः ॥

(५)

सर्वेषां कृतरक्षणोऽपि मम यः कर्तुं क्षमो न प्रियं
मह्यं नैव स रोचते मम करे तस्मै कृपाणः शितः।
इत्थं मानव केन हन्त गुरुणाः त्वं दीक्षितः, किं शिर-
स्ते वज्रेण विनिर्मितं, भवति नो किं वान्यहस्तेऽस्त्रकम् ॥

(६)

त्वं सुन्दो यदि नोपसुन्दतितरां किं ते समक्षं स्थितः
कालः क्रूरकरालवक्त्रकुहरो द्वावेव वां चर्वति।
चक्षुः क्षुद्रतमा पटी बत कुतः संप्रावृणोत्यद्य ते
धिग् धिक् त्वं प्रतिवेशिने गृहपतौ क्रूरायसे यद् दृढम् ॥

(७)

स्वार्णे तिष्ठति मन्दिरे गुरुवरः, तत्कूर्चके सिच्यते
तैलं सौरभधिक्कृतैलमथ तत्कुक्षौ प्रसादः परः।
शिष्य ब्रूहि महीतले तव कुटी कुत्रास्ति, तत्रास्ति किं
दीपो मृत्तिकया कृतोऽपि भवते किं सक्तवोऽपि स्थिराः ॥

(८)

श्रद्धे ! किं वद नास्ति साम्प्रतमपि ज्वालाकरालोदरः
शान्तः कश्चन तावकः शतशतप्राणाशनः पावकः।
अल्ला तिष्ठति दूर एव, स च नो पार्श्वेऽस्त्यकालो, महा-
वीरो बाष्पति, रोदिति प्रशिथिलः कृष्णः स्वतन्त्रे नरे ॥

(९)

कर्त्ता त्वं, फलभुग् गुरुस्त्वयि शतं पापानि, पुण्यं गुरौ,
मृत्युस्तेऽधिकृतः, पिचण्डकुहराऽऽवापो गुरूणां कृते।
इत्थं शिष्य ! बुसेन जीवति वृषे धान्यश्रिया मण्डितः
स्वामी यां करुणां क्रियात् किमु ततः साऽन्या गुरूणां त्वयि ॥

(१०)

सीमान्तान् परिरक्षितुं गृहिवरैर्यः कल्पितोऽध्वा यतो
याता भारतराष्ट्ररक्षणचणा नैके महायोगिनः ।
श्रद्धामात्रसमर्चितस्य निखिलैस्तस्यैव चेद् दुर्गता
स्वाराज्याय, गृहे स्व एव, किमतः स्याद् बुद्धिभेदः परः ॥

(११)

खालिस्तानमिति स्वतन्त्रमिह चेद् राष्ट्रं भवेद् भारते
पाकिस्तानमिवैव तेन खलु कः शिष्यस्य लाभो भवेत् ।
क्षेत्रं स्वल्पमथो निवासिनिवहो भूयान्, विना दस्युतां
नैषां कुक्षिरहो भ्रियेत, यदि वा युद्धस्य सोऽयं क्रमः ॥

(१२)

धर्मान्धा यदि धर्ममेव वृकतां संप्रापयन्ते, गवां
मांसैस्तर्पितुमस्य कुक्षिमथ ये केचित् क्रमन्तेतराम् ।
तेषां कूर्चवनानि पश्यतितरां कालाग्निरेषोऽद्य त-
त्कुक्षिर्वाञ्छति हव्यकव्यनिचयं कोष्णीकृतं सङ्करैः ॥

(१३)

कल्याणी ननु बुद्धिरस्य महतो राष्ट्रस्य यत् संकटे
भावैक्यं प्रतिपद्य नेतृनिवहो जागर्त्यदो रक्षितुम् ।
व्यक्तिस्तिष्ठति दूर एव नितरां, प्राप्ते विपत्तिक्षणे
राष्ट्रं केवलमीक्ष्यते कृतिवरैः, राष्ट्रं परं दैवतम् ॥

(१४)

राजीवो युवकः, स्थिरः, शुभमतिः, कालप्रबोधोद्धुरः,
कर्त्तव्यप्रतिभानवान् युवहिते श्रीसंजयस्याग्रजः ।
राष्ट्रस्यास्य स चेत् प्रधानपदवीं प्राप्तोऽभिनन्द्यं हि त-
ल्लक्ष्मीरीप्सति तं य ईप्सति न तां नैष्कर्म्ययोगेश्वरः ॥

(१५)

क्षेत्रं निर्भरमुर्वरं, सलिलमुत्कूलं, शुभो दोहदो-
द्रेको, बीजमुदस्तदोषमधिकं मात्रासु च प्राजितम् ।
यस्त्वेकं गृहमेधिनां वर भवत्पक्षेऽधुना शिष्यते
क्रूरं तद्धि तपो धिया सहकृतं यस्मिन् स्वतन्त्रो भवान् ॥

(१६)

मेरुः सर्षपति स्थलत्युदनिधिर्दावस्तुषारत्यल-
ङ्कारो भावति सद्य एव रसति स्वैरं च भावस्तदा।
आलस्यं परिधूय साधनशतैरुत्खातशल्यः पुमान्
विज्ञानेन समृद्धुरो ननु यदा सन्नाहमाटीकते ॥

(१७)

शम्पा स्फूर्जथुनिष्ठुराऽपि सहसा तद्वक्षसः स्पर्शतः
साध्वीव प्रमदा प्रशाम्यतितरां, यो धूमकेतुव्रजः,
पुच्छं तस्य निकृत्तमूलमवशं कुत्रापि निक्षिप्यते,
द्वारि द्वन्द्वभियाऽथ ते कुवलयापीडा न वै जाग्रति ॥

(१८)

मात्रा यत् प्रियदर्शिनीत्यभिधया संरक्ष्य संपोषितं
राष्ट्रं भारतसंज्ञकं हिमगिरेरादक्षिणं सागरम् ।
नूनं तस्य तथैव भावि परितो भूयस्तरां पोषणं
राजीवेत्यभिधस्य योग्यतनयस्याग्रेसरत्वेऽधुना ॥

सी/२, जोधपुर कालोनी
काशी हिन्दू विश्वविद्यालयः, वाराणसी-५
३१-१०-१९८४ ई०

'देववाणी-परिषद्, दिल्ली-'

सप्तमाष्टमसंयुक्तवार्षिकाधिवेशनावसरे

प्रस्तुतानि

अध्यक्षीयाभिभाषण-

वार्षिकविवण-आयव्ययविवरणानि

५-८-१९८५ ई०

सोमवासरे

देववाणी-परिषदः सप्तमेऽष्टमे च संयुक्ते वार्षिकाधिवेशने परिषदध्यक्षाणाम् आचार्यश्रीरमेशचन्द्रशुक्ल-महाभागानामध्यक्षीयमभिभाषणम्

(१)

श्रीमन्तः ! सुरभारतीं प्रचलितां सम्यग् विधातुं क्षिता-
वेतस्याखिलभारतस्य रुचिरां सर्वोत्तमां सम्पदम् ।
लग्नाया भवतां सतां परिषदः स्वान्तोज्ज्वलाया इह
पूर्णत्वं नवसंख्यकाब्दसमयोऽस्याः देववाण्याः गतः ॥

(२)

उत्थानस्य कृते हि संस्कृतगिरोऽस्मद् भारतीयं प्रियम्
उद्योगान् विदधाति शासनमिदं यान् साम्प्रतं भारते ।
ते श्लाघ्यास्तु परं निधिः सुरगिरि श्रेष्ठः प्रियो यः स्थितः
ज्ञानं छात्रजगल्लभेत सकलं तस्य प्रयत्नो भवेत् ॥

(३)

विद्यावेश्मसु भारतेऽत्र सकलेषु स्थापिताः कोविदाः
स्युः सर्वत्र समस्तशास्त्रनिपुणाः ज्ञानश्रिया सेविताः ।
आचारोत्तमतीक्ष्णबुद्धिसुजनास्तेजस्विनः पावनाः
कुर्युस्ते मनसोपदेशविविधश्रेष्ठप्रकृष्टप्रियान् ॥

(४)

विज्ञाः संस्कृतवाङ्मयस्य महतो ज्ञानोदधेः सादरं
ग्रन्थेभ्यो जनताप्रियेड्यललितव्यासादिविद्वत्कृत-
श्रेष्ठेभ्यो ह्युपदेशमञ्जुलशुभान् कुर्युर्मुदा भावुकान्
गीतायाः श्रयणं विधाय सुधियो रामायणस्यापि च ॥

(५)

आदायाखिलनीति-धर्मपरकं भव्यं महाभारतं
नानाख्याननिधिं समुज्ज्वलबहुज्ञानश्रिया शोभितम् ।
किं वाध्यात्मिकमञ्जुलोपनिषदः संश्रित्य यद् वा स्मृतीः
वेदान् वा परिगृह्य काव्यमथवा विद्वान् वदेत् सस्मितम् ॥

(६)

कार्यः स्यादुचितः स यत्नपरमो नो छात्रवृन्दं यथा
पन्थानं प्रभवेद् ग्रहीतुमशुभं शोच्यं प्रवृत्त्यप्रियाम् ।
नष्टां कर्तुमिमां नितान्तमलिनां क्षुद्रामघैर्दूषितां
गृह्णीयात् सफलं हि दण्डपरुषं नः शासनं सत्वरम् ॥

(७)

विद्वांसः सुरभारती-गुरुजनाः वेदादिशास्त्राब्धयः
सर्वं छात्रगणं सदैव सुरवाग्विद्यालयानां प्रियम् ।
शास्त्र्याचार्यविभक्तिगं हि मनसा स्वं पाठयन्तु श्रियाः
उत्कर्षाय च संस्कृतस्य गुरुताभाजो महिम्नः कृते ॥

(८)

अस्मत्संस्कृतभारती विजयते यस्यां श्रुतिः शोभते
शोभन्ते स्मृतयः कृताः हि ऋषिभिर्मन्वादिभिर्मञ्जुलाः ।
शास्त्राणि प्रथितानि सर्वजगतीमङ्गल्यकारीणि च
राजन्ते शुभदर्शनानि विदुषां तन्त्रञ्च सूत्रादिकम् ॥

(९)

सर्वा भान्ति च यत्र लोकजननीज्ञानप्रदानोद्यत-
श्रेयः श्रीनिधिसुन्दरोपनिषदोऽपि ब्राह्मणानां घटाः ।
आयुर्वेदमहीजनामृतनिभः प्राणप्रदः पोषको
ज्योतिः शास्त्रहितावहं च जगतो यत्रास्ति संशोभितम् ॥

(१०)

विज्ञानं विविधं नृजीवनहितं सर्वोदयाधायकं
यत्राभान्ति कलाः प्रियाः सुललिताः मानोपपत्तिस्थिताः।
चञ्चच्चारुनितान्तसुन्दरवृहद्रम्या मनोमोददाः
नानाख्यानकथाः प्रियत्वमधुरा बालोपदेशस्थिताः ॥

(११)

आचारोत्तमदर्शकं शुचिमतिज्योतिर्हि रामायणं
भावाभाललितां च यत्र किरतो दीप्तिं महाभारतम्।
जैनानां विदुषां च बौद्धविदुषां सिद्धान्तभा भ्राजते
चार्वाकादिमतञ्च संस्कृतगिरि स्वीयां छविं वर्षति ॥

(१२)

कौटिल्यस्य सुधीश्वरस्य रुचिरं शास्त्रं च यत्र प्रियम्
अर्थे तद्रचितं जगद्धितपरं वैदुष्यसद्भूषितम्।
यत्राभान्ति च हृद्यनीतिविविधा ज्ञात्वा जनो जीवनं
ता लोके सुखपूर्वकं गमयितुं सज्जायते शक्तिमान् ॥

(१३)

साहित्यं परमाद्भुतं च सरसं हृद्यं भृशं शोभते
स्तोत्राणि प्रचुराणि भान्ति नितरां यस्यां सुराणां गिरि।
श्लेषालिङ्गितसूक्तयः सुरुचिरा हास्यप्रिया वाक्तति-
र्जन्यानामतिदारुणं भययुतं दृश्यं च रौद्रं वृहत् ॥

(१४)

तत्त्वं लौकिकलाभबोधनपरं गीर्वाणवाण्यामिह
भास्वद् भाति भृशं चकास्ति च पुनश्चाध्यात्मिकं वैभवम्।
तस्मात् संस्कृतवाक् समग्रजगतीभाषाशिरोभूषणं
संसारं सकलं सदैव समुदं संसेवमानेक्ष्यते ॥

(१५)

विद्या तारपरा च विद्युदभिधा वेदे चकास्ते हि नः
मन्त्रास्ते प्रतिपादयन्ति सुतरां येषामृषिः सर्वथा ।
निर्देशं विदधत् सुखेन मतिमान् ग्रन्थे दयापूर्वको
नन्दो दृष्टिपथं प्रयाति जगती विद्वज्जनानां सदा ॥

(१६)

वेदाः सन्ति हि वस्तुतो गुरुतमा ज्ञानाब्धिसत्योदभवाः
विद्यानां विमलप्रकर्षमहिमश्रीः भौतिकीनामपि ।
विज्ञा भाति च तत्र तां विदधते व्यक्तां तपःपावनाः
तेभ्यस्तीक्ष्णधियोऽधियान्ति सकलं तं तं पदार्थप्रियम् ॥

(१७)

यानं यद् गगने प्रयाति च जले यद् याति सम्यग् रये
अस्मत्संस्कृतवाङ्मये विवरणं स्पष्टं तयोश्चाप्यते ।
भोजादिक्षितिपैर्बुधैर्विरचिताः ग्रन्थाः प्रधीश्लाघिताः
शिल्पाद्यासु कलासु चापि विशदं कुर्वन्ति सद्वर्णनम् ॥

(१८)

मान्यश्रीधनपालकोविदकृते ग्रन्थे जगत्पूजिते
सम्यङ्मूर्तिपरा च वास्तुपरका चित्रश्रिता सत्कलाः ।
प्रेक्ष्यन्ते सुनिरूपिताः अभिहिताः स्तुत्याः समग्रैर्बुधैः
बुद्ध्वा ताः रसिकं सुधीजनकुलं मोदं भृशं विन्दते ॥

(१९)

सम्पूर्णाः क्षितिसम्पदो ललितया रीत्या सुधीतल्लजः
श्रीविद्यापतिपण्डितः स्वरचनामध्ये मुदा गायति ।
प्राज्ञाः भूमिपरिक्रमां सहृदयास्तस्य प्रमोदप्रदां
हित्वा तां हि पठन्तु कार्यमितरद् विज्ञैरुपश्लोकितम् ॥

(२०)

सद्ग्रन्थं व्यदधात् कलाविषयकं रामावतारप्रधीः
नानादेशपराञ्च रम्यरचनां विद्वान् स एवाकरोत्।
वैशिष्ट्यं भरतावनेश्च सुखदञ्चान्यत्र सोऽदीदृशत्
एता ज्ञानविवर्द्धिकाश्च कृतयो गीताः सुधीसंसदा ॥

(२१)

अस्मिन् संस्कृतवाङ्मये विलसति श्रीशुभ्रविद्योत्तमा
नक्षत्रग्रहमण्डले हि विपुले प्रेम्णा भृशं गीयते।
विद्वद्भिर्मधुरातिविस्मयकरे देशस्य नोऽत्र प्रिये
चक्रुः सद्विषये स्वकीयरचनाः वाण्यां सुराणां बुधाः ॥

(२२)

अस्मद्भारतशासनञ्च नितरां भक्त्या महत्या मुदा
विद्याम्भोधिमहार्यभट्टविदुषः स्मृत्याममुञ्चद् ग्रहम्।
एषा संस्कृतभारती सुकृतिनी यत्राभवन्नीदृशाः
विद्वांसो लिलिखुः स्वकीयरचनाः यस्यां हि ये सादरम् ॥

(२३)

सङ्गीतं मधुरं तदस्ति ललितं गीर्वाणवाण्यामिह
यत् संश्रित्य जनो न मानससुखं प्राप्तुं क्षमः केवलम्।
दिव्याध्यात्मिकमञ्जुमोदममितं मुक्तिञ्च लब्धुं द्रुतं
शक्नोत्यत्र तु येन याति न पुनर्मृत्युं जनुश्चापि ना ॥

(२४)

एषा संस्कृतभारती ह्यनुपमा धत्ते महः सुन्दरं
सम्राज्ञी जगतीतलस्य विदिता भाषाङ्गनानामियम्।
अस्यामेव महाद्भुतः समुदितो वेदो धनुःसंज्ञकः
शस्त्रास्त्राणि च संयुगस्य निखिलान्युच्चैः स वक्ति प्रियः ॥

(२५)

अस्यां व्याकरणं नितान्तविपुलं प्रेष्ठं प्रकृष्टं महत्
छन्दःशास्त्रमपि प्रकर्षरुचिरं कम्रं महीयोऽस्ति च।
कः कल्पं च निरुक्तशास्त्रसुभगं जानाति नो पण्डितः
शिक्षा चापि महीयसी विहरतेऽस्यामेव वाण्यां मुदा ॥

(२६)

शश्वद्भाति कृषिर्मनोज्ञविमला क्रीडाश्च नानाविधाः
नृत्यं साधु चकास्ति चारुललितं विद्या च पाकाभिधा।
गेया मञ्जुलभानिशं शुचिशुभाः आनन्ददाः सिद्धयः
इत्थं संस्कृतवाग् विभाति नितरां सौभाग्यलक्ष्मीश्रिता ॥

(२७)

दुःखं नैव हि शासनं न च जना विज्ञानविद्याविदो
धीमन्तो न च वाग्मिनः सुरगिरो नो कोऽपि चान्योऽवनौ।
आनेतुं व्यवहारपावनदिशि ध्यानं प्रदत्तेऽधुना
तस्मादद्य समस्तमर्त्यजगती निन्द्याध्वगा वीक्ष्यते ॥

(२८)

अस्या देवगिरो नितान्तगहनाच्छ्रेयस्कराद् वाङ्मयात्
लोकश्रेयसि चापि लग्नहृदयाद् विज्ञानविद्योज्ज्वलात्।
जर्मन्यादिकराष्ट्रविज्ञपुरुषा ज्ञानं महत् प्राप्य च
ह्याविर्भावमकार्षुरेव जगति द्रव्याणि भूयांस्यपि ॥

(२९)

मन्यन्ते मनुजा इहास्ति बहवः स्तोत्रादिकं केवलं
ते नूनं नितरां भ्रमेण च मनाक् सत्यं तदीयं वचः।
विद्यन्ते परमोपयोगिविषया लाभप्रदा भौतिकाः
लोकेष्टा अपि भान्ति सर्वविधिना सम्पत्प्रभूताः प्रियाः ॥

(३०)

एतस्या अवलम्बनं सुरगिरः श्रेयो जगत्याः कृते
एषा यच्छति सन्ततं समुचितं सर्वं सुखं मङ्गलम् ।
धर्मंस्थान् कुरुते जनान् हि निखिलान् कामांश्च सर्वान् पुमान्
लब्धुं चार्हति सद्य एव हृदयाभीष्टान् महीमण्डले ॥

(३१)

अस्यामेव समस्तसद्गुणगणोऽसौ राष्ट्रभाषापरो
भव्यश्रेष्ठविभो विभाति सुतरां सर्वाङ्गपूर्णोन्नतः ।
तस्माद् वाचमिमां स्वदेशसुधियः कुर्वन्तु भूत्वोद्यताः
सर्वस्मिन्नपि जीवने व्यवहृतां स्याद् येन भाषोदिता ॥

(३२)

एतां संस्कृतभारतीं बुधजनाः गीर्वाणवाणीविदः
सर्वत्रैव निरन्तरं व्यवहृतां कुर्वन्तु भक्त्यन्विताः ।
गार्हस्थ्ये सकलेऽपि कार्यनिवहे संस्कारसर्वेषु च
सर्वेषूत्सवमञ्जुलेषु सुरगीर्वाच्या भवेत् सादरम् ॥

(३३)

मन्त्री मुख्य इमामतिप्रियगिरां संसेवमानोऽधुना
विद्वद्वृन्दनितान्तविश्रुतरमाकान्तो हि शुक्लर्षभः ।
नो केनेह नु वीक्ष्यते परिषदः सर्वे भवन्तोऽपि च
साहाय्यं प्रचुरं विधाय सुजनाः कुर्वन्तु तं सूच्छ्रितम् ॥

(३४)

गत्वा मौरिशसं कुशाग्रधिषणश्चामेरिकां सत्वरं
सम्यक् संस्कृतभारतीमकुरुत श्रेयस्करीं श्रीयुताम् ।
कृत्वा सर्वजगत्सुपूजितपदां मन्त्रिप्रधानो हि तां
शुक्लो भूविदितो मतो मतिमतां कान्तो रमायाः अहो ॥

(३५)

अर्वाचीनमिदं हि संस्कृतवचः सक्तं भवन्तो बुधाः
पत्रं यच्च पठन्ति सम्प्रति शुभं तद् भावभव्यान्वितम् ।
सेवायां भवतामियं निधाय परिषद् काव्यश्रियोद्वेल्लितं
सर्वां संस्कृतनिष्ठविज्ञजगतीं संसेवते सादरम् ॥

(३६)

ग्रन्थान् नूतननूतनांश्च परिषन्नीत्वा प्रकाशं बहून्
सर्वेषां भवतां करोति हृदयं प्रीत्यान्वितं सर्वदा ।
ज्ञानं किञ्च नवीनवेद्यविषये संवर्द्धितं सर्वथा
नित्यं चेत्थमियं सभासुरगिरो नानोपकारश्रिता ॥

(३७)

अर्वाचीनविशिष्टसंस्कृतवचोभूषाश्रितश्रीजुषा
पत्रेण प्रथितं भृशं च परिषद् विद्यानिधिं कोविदम् ।
संलब्धोज्ज्वलकीर्तिभूषितदिशं श्रीस्वामिनाथाभिधं
प्रीत्या साध्वभिनन्दितं कृतवती क्षोण्याः महागौरवम् ॥

(३८)

एषा मेऽस्ति निवेदना सविनयं शृण्वन्तु सद्बन्धवः
सर्वे भारतवासिनः सुरगवीमम्बां दयामानसाम् ।
स्नेहार्द्रां शरणं बुधाः सुमतयः कल्याणकाङ्क्षाप्रियाः
आगच्छन्तु भवन्त आशु च पुनः श्रेष्ठाः भवन्तु क्षितौ ॥

(३९)

भूयात् स्वस्तिमती शताब्दमधुरायुःसेवितेयं सभा
सर्वे संस्कृतसेविनो बुधजनाः अध्येतृवृन्दप्रियाः ।
भूयासुः शतवर्षजीवनभृतो विद्यानवद्यस्थिताः
अस्मद्भारतमेदिनी विजयतां वाण्यां सुराणां रता ॥

(४०)

कृपालुं त्वां याचे प्रणतनिटिलः कृष्ण भगवन् !
कृपा कार्या क्षिप्रं भरतवसुधावासिमनुजाः ।
जगच्छ्रेयोलग्नाममरसुखदां संस्कृतगिरां
नयन्तु द्रागेव प्रमुदितहृदा स्वव्यवहृतिम् ॥

शुभं भूयात्

—रमेशचन्द्र शुक्लः
अध्यक्षः
देववाणी-परिषद्, दिल्ली

आर ६, वाणी-विहारः,
नयी दिल्ली-११००५९

५-८-१९८५

देववाणी-परिषदः सप्तमेऽष्टमे च संयुक्ते वार्षिकाधिवेशने महासचिवेन प्रस्तुतं

वार्षिकविवरणम्

सम्मान्या अध्यक्षमहाभागाः, अभ्यागता अतिथयः, प्रेयांसः परिषत्सदस्याः, सभासदश्च !

देववाणी-परिषदः सप्तमेऽष्टमे च संयुक्तावार्षिकाधिवेशनेऽहमत्रभवद्भ्यः सर्वेभ्योऽपि स्वागतं व्याहरन् परिषदो द्विवार्षिकं विवरणं प्रस्तौमि। षट्-सप्तत्युत्तरैकोनविंशतिशततमेशवीयेऽब्दे दिसम्बरमासस्य त्रयोदश्यां तारिकायां विधिवत् पंजीकृतायाः 'देववाणी-परिषद्, दिल्ली'-संस्थायाः त्र्यशीत्युत्तरैकोन-विंशतिशततमेशवीयाब्दस्य जनवरीमासस्य एकविंशं दिवसं यावत् क्रियाकलापो मया परिषदः षष्ठे वार्षिकाधिवेशने संकेतित आसीदिति कृत्वा तत ऊर्ध्वमस्याः कार्यकलापान् संक्षेपतः कीर्तयामि।

देववाणी-परिषदः षष्ठं वार्षिकाधिवेशनम्

देववाणी-परिषदः पंचदिवसाभिव्यापि षष्ठं वार्षिकमधिवेशनं २१-१-१९८३ तमेशवीयायां तिथौ दिल्लीविश्वविद्यालयस्य टैगोरसभाभवने समारब्धं भूत्वा २५-१-१९८३ तमे दिनांके सन्ध्यायां 'श्रीराम सेण्टर फार आर्ट एण्ड कल्चर, नयी दिल्ली-११०००१' इत्येतदाख्ये प्रेक्षागृहे सम्पन्नतामगमत्।

समारोहस्योद्घाटनं भारतसर्वकारस्य शिक्षामन्त्रालये संस्कृतोपपरामर्श-दाता डा० सी० आर० स्वामिनाथ-महाभागो व्यधात्। उद्घाटनसमारोहे राष्ट्रियसंस्कृतसंस्थानस्य निदेशकः डा० रामकरणशर्ममहाभागो विशिष्टातिथित्वेन समुपातिष्ठत्। वार्षिकविवरणं प्रस्तुवता देववाणी-परिषन्महासचिवेन (डा० रमाकान्त शुक्लेन) सूचितं यत्परिषत् तस्मै विदुषे 'पण्डितराजजगन्नाथपुरस्कारं' समर्पयिष्यति यः संस्कृतग्रन्थस्य फारसी-भाषायाम् अरबी-भाषायां वा, अरबी-फ़ारसी-ग्रन्थस्य च संस्कृतभाषायां सफल-मनुवादं विधास्यति। परिषदा संस्कृताशुलिपेर्विकासार्थं योजनैका दिल्ली-

प्रशासनद्वारा भारतसर्वकारस्य शिक्षामन्त्रालयेऽनुदानार्थं प्रेषिता। महासचिवेनेदमपि सूचितं यद् उत्तरप्रदेशसंस्कृताकादम्या १९८१ तमेशवीयेऽब्दे परिषदा प्रकाशिताश्चत्वारो ग्रन्थाः पुरस्कृताः।

परिषदोऽध्यक्षेण डा० कृष्णकान्तशुक्लमहाभागेन स्वाध्यक्षीये भाषणे दिल्ल्यां संस्कृताकादम्याः स्थापनाया आवश्यकता रेखांकिता। तेन विश्वविद्यालयस्तरे संस्कृतविभागेषु संस्कृतमाध्यमस्य विलोपे चिन्ता व्यक्ता, संस्कृतसंस्थानां योजनानां पारस्पारिकसमायोजनस्य आवश्यकता च सविशेषं प्रतिपादिता। डा० शुक्लेन भारतसर्वकारस्य शिक्षामन्त्रालयाय, लेखकेभ्यः संस्कृतग्रन्थप्रकाशनार्थं दीयमानस्यानुदानस्य राशिं शतप्रतिशतं कर्तुमग्रिमरूपेण च दातुं, परामर्शोऽपि दत्तः।

उद्घाटनसमारोहानन्तरं 'संस्कृत-समूह-गान - प्रतियोगिता' प्राथमिक-माध्यमिक-वरिष्ठमाध्यमिक-उपाधिस्तरेष्वायोज्यत यत्र छात्रैश्छात्राभिश्च राष्ट्रभक्तिपरकाणां गीतानां ससंगीतं प्रस्तुतिः कृता। प्राथमिकस्तरे 'उत्तमनगरनयीदिल्लीस्थकमलपब्लिकस्कूलेन', माध्यमिके स्तरे 'हरिनगरनयीदिल्लीस्थमहाशयचूनीलालसरस्वतीबालमन्दिरेण', वरिष्ठमाध्यमिके स्तरे 'अरविन्दमार्गनयीदिल्लीस्थ-मदर्स इन्टरनेशनल स्कूलेन' उपाधिस्तरे च 'रमेशनगर-नयीदिल्लीस्थ मोतीनाथ संस्कृत-महाविद्यालयेन' प्रथमं स्थानं लब्धम्।

२२-१-१९८३ तारिकायां टैगोर-सभाभवने 'सद्यःपद्यपाठप्रतियोगिता' आयोज्यत। दिल्ल्यामियं प्रतियोगिता अनायोजितपूर्वा आसीत्। प्रतियोगिनां वाचनशक्तेः श्लोकपठनशैल्याश्च परीक्षणमस्यां प्रतियोगितायां जातम्। उपाधिकक्षास्तरीयैः प्रतियोगिभिः मिनटद्वयपूर्वं प्राप्तानां संस्कृतपद्यानां वृत्तप्रकृत्यनुसारं पाठोऽस्यां प्रतियोगितायां प्रस्तुतः। अस्यां प्रतियोगितायां दिल्लीस्थानां श्रीलालबहादुरशास्त्रिकेन्द्रीयसंस्कृतविद्यापीठ-मोतीनाथसंस्कृत-महाविद्यालय - विश्वनाथसंस्कृतमहाविद्यालय - इन्द्रप्रस्थमहिला-कालेज - सैण्ट - स्टीफेन्सकालेजानां छात्राः समुपातिष्ठन्।

२२-१-१९८३ तारिकायामेव 'अक्षरश्लोक' स्पर्द्धाप्यायोजिता जाता यत्र हंसराजकालेजस्य प्रज्ञाचक्षुश्छात्रः श्री परमहंसमौर्यः प्रथमं स्थानमवाप।

२३-१-१९८३ तारकायां 'टैगोर-सभागारे' राष्ट्रियसंस्कृतसंस्थान निदेशक-डा०रामकरणशर्ममहाभागानामध्यक्षतायाम् अखिलभारतीयं संस्कृतकविसम्मेलनमायोजितं बभूव यत्र पं० विष्णुकान्तशुक्ल-डा० हरीराम आचार्य-पं० ओगेटि-परीक्षित शर्म-डा० वासुदेवकृष्णचतुर्वेद-पं० रघुनाथप्रसादचतुर्वेद-डा० राजदेव

मिश्र-डा० उमाकान्त शुक्ल-डा० सुधाकराचार्य त्रिपाठि-श्री ओमप्रकाशत्रिवेदि-श्रीइच्छाराम द्विवेदि-डा० रुद्रदेव त्रिपाठि-श्री रामेश्वराचार्यमहाभागैः सरसाः कविताः प्रस्तुताः। अस्मिन्नवसरे विशिष्टातिथिरूपेण सम्प्राप्तैः जबलपुरविश्वविद्यालय प्राक्तनकुलपतिभिः साहित्यवाचस्पतिडा० प्रभुदयालुअग्निहोत्री-महाभागैः रमाकान्तशुक्लरचितस्य 'जय भारतभूमे !' इत्येतन्नामधेयस्य संस्कृतकाव्यस्य प्रकाशनोद्घाटनम् (विमोचनम्) अपि कृतम्।

२४-१-१९८३ तारिकायाम् 'आर-६, वाणी विहार, नयी दिल्ली-११००५९ इति स्थाने 'आचार्यश्रीब्रह्मानन्दशुक्लस्मारकव्याख्यानमालायाः' अन्तर्गतं 'संस्कृत-साहित्यस्य चतुर्वर्गसाधकता' इति विषयमवलम्ब्य डा० प्रभुदयालु अग्निहोत्री-महाभागैः वैदुष्यपूर्ण सरसं सारगर्भितंच व्याख्यानम् कृतम्।

२५-१-१९८३ तारिकायां राष्ट्रीयसंग्रहालयसभागारे समापनगोष्ठी आयोजिता बभूव यत्र डा० सी० आर० स्वामिनाथमहाभागैः पुरस्कारवितरणं कृतम्।

२५-१-१९८३ तारिकायां ६.३० वादवेलकायां सायंकाले 'श्रीराम सेण्टर फार् आर्ट एण्ड कल्चर' प्रेक्षागारे डा० रमाकान्तशुक्ललिखितं पण्डितराजजगन्नाथ-जीवनपरकं 'पण्डितराजीयम्' इतिनामधेयं संस्कृतनाटकं श्रीमत्याः कमलिनीदत्त-महाभागायाः निर्देशने प्रस्तूयत यत्र कु० शशिबाला गुप्ता-कु० भवानी अय्यर-कु० भारती भाटिया-श्री विश्वनाथशर्म-श्रीबलदेवानन्दसागर-श्री प्रमोददुआ-श्रीरमणकुमारशर्म-प्रभृतिभिः कलाकारैः विविधा भूमिकाः निर्व्यूढाः। अस्य नाटकस्य संगीतनिर्देशनं श्री छोटेलालमहाभगेन कृतम्। अस्मिन् नाट्यसमारोहे विशिष्टातिथिरूपेण भारतसर्वकारशिक्षासंस्कृतिमन्त्रालये अपरसचिवः डा० कपिला वात्स्यायन-महाभागा समुपातिष्ठत्। अस्मिन्नवसरे भारतीयबीज-निगमाध्यक्षेण श्री के०पी०ए० मेनन महाभागेन 'स्मारिका' अपि समुद्घाटिता। नाटकप्रेक्षावसाने डा० रामकरणशर्ममहाभागैः राष्ट्रिय संस्कृतसंस्थानतः नाट्य-कलाकाराणां प्रोत्साहनार्थमेकसहस्ररूप्यकात्मकराशेर्दानस्य घोषणा कृता।

२४-१-१९८३ तारिकायां परिषदो निर्वाचनमण्डलसमज्यायाम् आचार्य-रमेशचन्द्रशुक्लमहाभागाः आगामिवार्षिकाधिवेशनं यावदध्यक्षत्वेन निर्वाचिता अभूवन्।

राष्ट्रपतिपुरस्कृतसंस्कृतविद्वदभिनन्दनं, 'श्रीबदरीशसुप्रभात'स्य प्रकाशनोद्घाटनम्, संस्कृतनाट्यकलाकारसत्कारश्च

देववाणी-परिषदा 'दि शंकर एकेडमी फार संस्कृत कल्चर एण्ड क्लासिकल

आर्ट्स' - 'शंकरविद्याकेन्द्र'-'इन्द्रप्रस्थीयसंस्कृतपरिषत्' - 'संस्कृतसेवासंस्थान'-संस्थानां सहयोगेन २-४-१९८३ तारिकायां नयीदिल्लीस्थे 'भारतीय-विद्याभवने' समुत्सव एक आयोज्यत यत्र भारतराष्ट्रपतिपुरस्कृतानां संस्कृतविदुषामभिनन्दनम्, डा० सी० आर० स्वामिनाथप्रणीतस्य पण्डितरघुनाथशर्मव्याख्यातस्य देववाणी परिषत्प्रकाशितस्य च 'श्रीबदरीशसुप्रभातम्' इत्यस्य स्तोत्र-काव्यस्य प्रकाशनोद्घाटनं, देववाणी-परिषदः षष्ठवार्षिकाधिवेशनावसरे २५-१-१९८३ तारिकायां प्रस्तुतस्य 'पण्डितराजीयम्' इति नामधेयस्य संस्कृत-नाटकस्य कलाकाराणां सत्कारश्च समनुष्ठीयन्त ।

उत्सवस्यास्य मुख्यातिथिपदं भारतीयसर्वोच्चन्यायालयन्यायाधीशा न्यायमूर्तयः श्री रंगनाथमिश्रमहाभागाः अध्यक्षपदं च आइ० सी० एस० सेवानिवृत्ताः श्री सी० एस० रामचन्द्रन्-महाभागाः अलंचक्रुः ।

विशिष्टातिथिरूपेण शिक्षासंस्कृतिमंत्रालयस्य अपरसचिवपदमधितिष्ठन्ती डा० कपिलावात्स्यायनमहाभागा समुपस्थिता ।

उत्सवेऽस्मिन् डा० सी० आर० स्वामिनाथ-विद्यावाचस्पति श्री अमीर-चन्द्रशास्त्रि-आचार्य रमेशचन्द्रशुक्ल-श्री के० गणेशन्-श्री एन०के० शेषन्-आचार्य रामदयालु शास्त्रिभिरभिभाषितम् । अभिनन्दितविदुषां पक्षतः श्रीजगदीशशर्म-महाभागैरभिभाषितम्, श्रीभालचन्द्रशास्त्रीकरम्बेलकरमहाभागैः वेदमन्त्रपाठः कृतः । इतः पूर्वमाचार्यमहादेवशर्मणां शिष्यैः सामूहिकवेदपाठोऽनुष्ठीयत ।

अस्मिन्नवसरे पुण्यपत्तनाद् अभ्यागतेन 'शारदा'-सम्पादकेन पण्डितवसन्त-गाडगीलमहोदयेन एतादृशायोजने हर्षोऽभिव्यक्तः ।

'अर्वाचीनसंस्कृतसाहित्यस्य सर्वेक्षणस्यावश्यकता तदर्थमुपयुक्ता उपायाश्चे'ति विषये विचारगोष्ठी

परिषदस्तत्त्वावधाने उक्तविषयमवलम्ब्य १९-६-१९८३ तारिकायाम् 'आर ६ वाणी-विहार, नयी दिल्ली-११००५९' इति स्थाने विचारगोष्ठी समायोजिताभूत् यत्र मुजफ्फरनगरस्थसनातनधर्मस्नातकोत्तरकालेजस्य संस्कृत-विभागप्राध्यापकैः डा० रमेशकुमार लौ - श्री उमाकान्त शुक्ल - डा० सुषमा अरोड़ा-डा० जयकुमार जैन-महाभागैः स्व विचाराः प्रकटिताः । विचारगोष्ठ्या आध्यक्ष्यमाचार्यरमेशचन्द्रशुक्लैः विषयप्रवर्तनं च रमाकान्तशुक्लेन कृतम् ।

'भारतीय नृत्यानि संस्कृतं च'

९-७-१९८३ ई० तारिकायां परिषदस्तत्त्वावधाने 'आर-६ वाणीविहार, नयी दिल्ली-११००५९' इति स्थाने भरतनाट्यविशारदायाः श्रीमत्याः

कमलिनीदत्त महाभागाया: 'भारतीयनृत्यानि संस्कृतं चे'ति विषयमवलम्ब्य भाषणं संजातम् ।

देववाणी-परिषदोऽष्टमसंकल्पनादिवस:

देववाणी-परिषदोऽष्टम: संकल्पनादिवससमारोह: २१-८-१९८३ तारिकायाम् दिल्लीविश्वविद्यालयस्य 'टैगोर-सभाभवने' सम्मानितोऽभूत् ।

अस्मिन्नवसरे मुख्यातिथिना भारतसर्वकारस्य उपशिक्षामन्त्रिणा श्री पी० के० थुंगनमहाभागेन परिषत्प्रकाशितानां **'स्फूर्तिसप्तशती'-'पूर्णकुम्भ'-'साहित्यकौतुका'**ख्यानां त्रयाणां संस्कृतग्रन्थानां समुन्मीलनं (विमोचनं) कृतम् । शिक्षामन्त्रालये उपशिक्षापरामर्शदातृपदमलङ्कुर्वता (संस्कृते) डा० सी० आर० स्वामिनाथमहाभागेन समुन्मीलितग्रन्थानां प्रथमप्रतिरूपाणि स्वीकृतानि । उभाभ्यामप्येताभ्यां स्फूर्तिसप्तशतीकारस्य डा० शिवदत्तशर्मचतुर्वेदस्य (अनुपस्थितस्य) **'पूर्णकुम्भ'**-प्रणेतु: पण्डित विष्णुकान्त शुक्लस्य **'साहित्य-कौतुक'**-रचयितु: पं० टी० वी० परमेश्वर अय्यरस्य च सवर्धापनमभिनन्दनं कृतम् । श्री थुंगनमहाभागेन संस्कृतस्य नूतनरचनानां प्रकाशनार्थं देववाणी-परिषद् वर्धापिता ।

अस्मिन्नवसरे उपशिक्षामहोदयेन **अखिलभारतीयं संस्कृतकविसम्मेलनम्** अपि समुद्घाटितम् । अस्य कविसम्मेलनस्य अध्यक्षता भारतसर्वकारशिक्षा-संस्कृतिमन्त्रालये संयुक्तपरामर्शदातृपदमलंकुर्वता **डा० रामकरणशर्म** महाभागेन कृता । सम्मेलनेऽस्मिन् डा० सी० आर० स्वामिनाथ:, डा० नलिनी शुक्ला (कानपुरत:), श्री परमेश्वर नम्पूतिरि: (दिल्लीत:), श्री वी० स्वामिनाथ आत्रेय: (तञ्जौरत:) श्री श्रीभाष्यम् विजयसारथि: (हैदराबादत:), पं० कमलापति मिश्र: (लखनऊत:), डा० उमाकान्त शुक्ल: (मुजफ्फर-नगरत:), डा० महावीर: (दिल्लीत:), डा० रुद्रदेव त्रिपाठी (जयपुरत:), पं० विष्णुकान्तशुक्ल: (सहारनपुरत:), पं० वसन्त अनन्त गाडगील: (पुणेत:), डा०वासुदेवकृष्णचतुर्वेद: (मथुरात:) शिशु: अभिनवशुक्ल: (दिल्लीत:), डा० रहसबिहरी द्विवेदी (जबलपुरत), श्री ओमप्रकाश त्रिवेदी (बरहनत:), डा० सत्यपाल नारङ्ग: (दिल्लीत:), कविरत्नश्रीकृष्णसेमवाल: (दिल्लीत:), डा० रमेशकुमार लौ (मुजफ्फरनगरत:), डा० सुधाकराचार्य त्रिपाठी (मेरठत:), पं० टी० वी० परममेश्वर अय्यर: (दिल्लीत:), डा० आशाराम त्रिपाठी (लखनऊत:), श्री ओमप्रकाश ठाकुर: (दिल्लीत:), पं० रघुनाथप्रसाद चतुर्वेद: (मथुरात:) डा० कृष्णकान्त शुक्ल: (बरेलीत:),

रमाकान्तशुक्लश्च (दिल्लीतः) स्व रचना अपठन् । कविसमेलनस्य सञ्चालनं रमाकान्त शुक्लः कृतवान् ।

संस्कृतवार्तालापप्रशिक्षण्

दिल्ल्याः 'संस्कृत-सेवा-संस्थानम्' अगस्तमासतो देववाणी-परिषत्सहयोगेन वाणी-विहारे संस्कृतवार्तालापप्रशिक्षणकार्यक्रमचालयत । अस्मिन् कार्यक्रमे वाणी-विहारस्य **'गुडविल चिल्ड्रन पब्लिक स्कूलस्य'** शिशवः स्थानीयाश्च नैके बालकाः निःशुल्कं संस्कृतशिक्षामगृह्णन् । संस्कृतसेवासंस्थानेनैतदर्थं नियुक्ता श्रीमती वीणा वंसलमहाभागा शिशून् संस्कृतवार्तालापमशिक्षयत् । कार्यो-क्रमोऽयं वर्षं (१९८३) यावत्प्राचलत् ।

'संस्कृतसाहित्ये गान्धि-शास्त्रिणौ' इति विषये पत्रपाठगोष्ठी

परिषदस्तत्त्वावधाने २-१०-१९८३ तारिकायां डा० रमाकान्तशुक्लेन **'संस्कृतसाहित्ये गान्धिशास्त्रिणौ'** इति विषयमवलम्ब्य शोधपत्रं पठितम् । पञ्चविंशतिप्राया गान्धि - शास्त्रिपरकाः संस्कृतरचना उल्लिखन् डा० शुक्लः प्रत्यपीपदत् यदेतासु कृतिषु अनयोर्महापुरुषयोः संकीर्तनव्याजेन संस्कृतरचना-कारैः सत्याहिंसादेशभक्तिविनयसाहसदृढव्रतताद्युदात्तगुणान् प्रति स्वकीया आस्था प्रकटिता । अस्याः गोष्ठ्या अध्यक्षता परिषदध्यक्षैराचार्यरमेशचन्द्र-शुक्लैः कृता ।

विंशशताब्दीयसंस्कृतसाहित्यकोशनिर्माणोपायेषु विचारगोष्ठी

१२-१०-१९८३ ई० तारिकायां देववाणी-परिषदस्तत्त्वावधाने 'आर-६ वाणी-विहार, नयी दिल्ली-११००५९' इति स्थाने **'विंशशताब्दीयसंस्कृत-साहित्यकोशनिर्माणार्थमुपयुक्ता उपायाः'** इति विषयमवलम्ब्य एका विचारगोष्ठी समायोज्यत । स्मरणीयं विद्यते यत् ३०-१०-१९७७ तारिकायां परिषत्कार्य-समित्या विंशशताब्दीयसंस्कृतसाहित्यकोशस्य सम्पादनं स्वलक्ष्यत्वेन सङ्कल्पित-मासीत् । ततः प्रभृति यथाशक्ति यथावसरञ्चास्यां दिशि प्रयत्यते ।

अस्यां विचारगोष्ठ्यां विद्वद्भिरनुभूतं यत् १९९८ यावदस्य कोशस्य २०,००० प्रविष्टयः अकारादिक्रमेण संयोजनीयाः । तत ऊर्ध्वं द्वयोर्वर्षयो-रन्तराले प्रकाशितानां रचितानां वा रचनानां विषये यथाकालं तत्र सूचना निवेशनीया । २००० तमेशवीयाब्दसमाप्तेरुत्तरं द्रुतगत्या अस्य प्रकाशनं क्रियेत । २००१ तमेशवीयेऽब्दे पञ्चसहस्रपृष्ठात्मकस्य चास्य कोशस्य प्रकाशनं पूर्णं स्यात् । सम्पन्नं सत् इदं हि कार्यं नूनं महत्त्वपूर्णं भविष्यति ।

अस्मिन्ननुष्ठाने विविधसंस्कृतसंस्थानानां, शोधकर्तॄणां, सम्पादकानां लेखकानां, पुस्तकालयाध्यक्षाणां, प्रकाशकानां, विश्वविद्यालयानां, शोधनिदेशकानां, स्थाने स्थाने स्थापितानां देववाणीपरिषच्छाखानामवैतनिकसदस्यानां, सवेतनकर्मचारिणाञ्च सहयोगोऽपेक्ष्यते। पुनश्च प्रभूतधनराशिरपि अपेक्ष्यते। सर्वेक्षकाः, लेखकाः, लिपिकाः नियोक्तव्याः सन्ति। एतदर्थं भारतसर्वकारस्य, यूनेस्को-प्रभृतिसंस्थानां, देशविदेशगिथतानां संस्कृतानुरागिणां दानिनां च सहयोगो मार्गयितव्यः। श्री-सरस्वत्योः सङ्गतेनैवास्मिन् कर्मणि सिद्धिर्मता विद्वद्भिः।

अस्याः विचारगोष्ठ्या आध्यक्ष्यं गुरुवायूरकेन्द्रीयसंकृतविद्यापीठप्राचार्येण डा० चक्रधररिबजल्वानमहाभागेन कृतम्। विचारप्रदातृषु डा० रमेशचन्द्र-शुक्ल-रमाकान्तशुक्ल-डा० सातकडि मुखोपाध्याय-डा० सुन्दरलाल कथूरिया-श्री मणिभाई प्रजापति-प्रभृतय आसन्।

अर्वाचीनसंस्कृतस्य पञ्चमवर्षपूर्तिः

१५-१०-१९८३ ई० तारिकायां देववाणी-परिषदस्त्रैमासिकपत्रस्य 'अर्वाचीनसंस्कृतस्य' पञ्चमवर्षपूर्तिः सञ्जाता। अस्मिन्नवसरे परिषदोऽध्यक्षैराचार्यरमेशचन्द्रशुक्लमहाभागैः पञ्चमवर्षीयश्चतुर्थोऽङ्कः समुन्मीलितः, अर्वाचीनसंस्कृतरचनानां सर्वेक्षणस्यावश्यकता च सविशेषं प्रतिपादिता।

श्रीपादसप्ततेः श्रीपादपरागव्याख्यायाः समुन्मीलनम् अक्षरश्लोकं च

२१-१०-१९८३ ई० तारिकायां देववाणी-परिषदस्तत्त्वावधाने नयीदिल्लीस्थे भारतीयविद्याभवने समायोजिते भव्यसमारोहे भारतीयसर्वोच्चन्यायालयस्य न्यायाधीशैः न्यायमूर्ति श्री वी० बालकृष्ण एराडि-महाभागैः परिषत्प्रकाशितायाः डा०शास्त्रपुरम्रामकृष्णस्वामिनाथ-प्रणीतायाः श्रीपादसप्ततेः-'श्रीपादपरागा' ख्यायाः व्याख्यायाः समुन्मीलनं कृतम्। अस्मिन्नवसरे, मुक्तिस्थले विराजमानायाः महिषासुरमर्दिन्याः मन्दिरे श्रीपादसप्तर्तिं रचितवतो नारायणभट्टपादस्य सविशेषं परिचयं प्रस्तुवन्तो राष्ट्रीय-बीजनिगमाध्यक्षाः श्री के० पी० अच्युतमेननमहाभागाः श्रीपादसप्तर्तिं श्रीपादपरागं चावलम्ब्य स्वविचारान् प्रकटितवन्तः। समारोहस्याध्यक्ष्यं काशीहिन्दूविश्वविद्यालयस्य प्राक्तनकुलपतिभिः डा० वेणीशंकरझा-महाभागैः कृतम्।

ग्रन्थोन्मीलनानन्तरम् 'अक्षरश्लोकं' समायोजितमभूत् यत्र न्यायमूर्तिश्री वी०बालकृष्ण एराडि-पण्डितविष्णुकान्तशुक्ल-डा० सी० आर० स्वामिनाथ-

श्री के० पी० अच्युतमेनन-पं० पद्मनाभशास्त्रि-श्री विश्वनाथशर्म-रमाकान्त शुक्लैश्च सहभागित्वं निर्व्यूढम् ।

'मौरिशस' देशवासिनां संस्कृतानुरागिणामभिनन्दनम्, 'आन्ताराष्ट्रिक - संस्कृतसम्मेलनेभ्योऽपेक्षा'-इति विषये विचारगोष्ठी 'सुरश्मिकाश्मीर' स्य पाठश्च ।

२०-११-१९८३ ई० तारिकायाम् 'आर ६ वाणी-विहार, नयी दिल्ली-५९' इति स्थाने देववाणी-परिषदस्तत्त्वावधाने 'मौरिशस'-देशवासिनां संकृतानुरागिणामभिनन्दनं समनुष्ठीयत । अस्मिन्नवसरे समारोहाध्यक्षेण डा० मण्डन मिश्र-महाभागेन देववाणी-परिषत्प्रकाशितग्रन्थार्पणेन मौरिशसदेशवासिनः श्रीसुरेश रामवर्ण—श्री परमानन्द रामलखन—श्रीदामोदर तुलसी-महाभागाः समभिनन्दिता । परिषन्महासचिवेन रमाकान्तशुक्लेन परिषत्कार्यकलापानां परिचयः प्रदत्तः । अभिनन्दितैर्विद्वद्भिरुक्तं यत् संस्कृतं संस्कृतिश्च तेषां प्रतिष्ठे स्तः ।

अस्मिन्नवसरे 'आन्ताराष्ट्रिकसंस्कृत-सम्मेलनेभ्योऽपेक्षा' इति विषयमवलम्ब्य समायोजितां विचारगोष्ठीं समुद्घाटयन् केन्द्रीयशिक्षामन्त्रालये संयुक्तपरामर्शदाता डा० रामकरणशर्ममहाभागः प्रत्यपीपदत् यद् विश्वसंस्कृतसम्मेलनेषु 'संस्कृतं लोकजीवनं चे' ति विषयमलम्ब्य विचारो यदि क्रियेत तदा नून संस्कृताध्ययनस्य नूतन आयामः समुद्घाटितः स्यात् । शिक्षामन्त्रालये उपपरामर्शदात्रा डा० सी० आर० स्वामिनाथ-महाभागेन सूचना दत्ता यत्संस्कृतपाठानाम् अथ च वेदपाठानां ध्वन्यंकितटेपकैसेटाः भारते निर्मिताः । तेषामुपयोगोऽपि संस्कृतप्रचारार्थं हितकरः स्यात् । डा० रमाकान्तशुक्लेन 'षोडश संस्काराः' 'संस्कृतं संस्कृतिश्चे' त्यादिषु कतिपयेषु विषयेषु वीडियोफिल्मनिर्माणस्याप्यावश्यकता रेखाङ्किता ।

गोष्ठ्यनन्तरं भारतसर्वेकास्य योजनायोगे संयुक्तसचिवेन श्रीश्रीसुन्दरराजमहाभागेन 'सुरश्मिकाश्मीरम्' इत्येतस्य स्व काव्यस्य पाठः कृतः यस्य प्रकाशनं परिषदाङ्गीकृतम् । परिषदा श्रीसुन्दरराजकृता 'श्रीबदरीशतरङ्गिणी'ति काव्यरचनापि प्रकाशिता ।

परिषदध्यक्षैः डा० रमेशचन्द्रशुक्लमहाभागैः धन्यवादज्ञापनं कृतम् ।

देववाणी-परिषदः संस्कृताशुलिपेर्विकासस्य स्वप्नः साकारतां गतः

देववाणी-परिषदः सत्प्रेरणया श्रीगोपालदत्तबिष्टमहाभागेन संस्कृते आशुलिपिर्विकासिता। देववाणी-परिषदोऽष्टमस्थापनादिवसे १३-१२-१९८३ ई० तारिकायाम् श्री बिष्टमहाभागेन राजस्थानविश्वविद्यालय-संस्कृत-विभागाध्यक्षस्य डा० रामचन्द्रद्विवेदि-महाभागस्य आध्यक्ष्ये समायोजिते संस्कृताशुलिपि-प्रदर्शने भारतसर्वकारस्य शिक्षासंस्कृतिमन्त्रालये संयुक्तपरामर्शदातुः डा० रामकरणशर्मण उपपरामर्शदातुः डा०सी०आर० स्वामिनाथस्य, देववाणी-परिषदो महासचिवस्य डा० रमाकान्त शुक्लस्य डा० द्विवेदिमहाभागस्य च सस्कृतवक्तव्यानि आशुलिप्यां निबद्धय देवनागरीलिप्यां प्रत्यंकितानि।

इत्थं परिषदः संस्कृताशुलिपेर्विकासस्य स्वप्नः साकारतां गतः। इदानीं संस्कृतसंस्थानानि विश्वविद्यालयाश्च पारस्परिकं पत्रव्यवहारम् द्रुतगत्या संस्कृते कर्तुं समर्थाः भवेयुः।

देववाणी-परिषदस्त्रिदिवसीयः संस्कृत-संगीत-नाट्यसमारोहः

देववाणी-परिषदा १९८३ तमेशवीयेऽब्दे दिसम्बरमासस्य २८, २९, ३० तारिकासु नवदिल्ल्याः **श्रीराम सेण्टर फॉर आर्ट एण्ड कल्चर** इत्येतत्प्रेक्षागृहे **संस्कृतसंगीतकस्य संस्कृतनाट्यसमारोहस्य** चायोजनं कृतम्।

आयोजनस्योद्घाटनं भारतसर्वकारस्य शिक्षामन्त्रालये उपपरामर्शदातृभिः डा० सी० आर० स्वामिनाथमहाभागैः कृतम्। तैरस्मिन्नवसरे प्रकाशिता 'विवरणिका' (Brochure) अपि समुन्मीलिता। उद्घाटनसमारोहस्याध्यक्षं परिषदः प्राक्तनाध्यक्षैः डा० कृष्णकान्तशुक्लैः सम्पादितम्।

२८-१२-१९८३ तारिकायां **'संस्कृतसङ्गीतकम्'** सम्पन्नम्। अस्मिन् भरतनाट्यविशारदया सुश्रीकमलिनीदत्तमहाभागया श्रीमुत्तुस्वामिदीक्षितर-संस्कृतरचनामवलम्ब्य **'गणपतिस्तुतिः'** **'अन्नपूर्णास्तुति'**श्च भरतनाट्य शैल्या प्रस्तुते। तदनन्तरं **'तिलाना'** -क्रमेऽनया रमाकान्त शुक्ल-प्रणीता **'सुरभारती विजयते'**-इतीयं रचना नृत्येन संयोजिता। अग्रिमप्रस्तुत्यामनया **'अङ्गुल्याः कः कपाटं प्रहरति'** इत्यादि राधामाधवसंवादमनुसृत्य **संवादनृत्यम्'** प्रस्तुतम्।

श्रीगोदादेवी-संघसदस्याभिः कमलिनीदत्तमहाभागाया निर्देशने रागमालिकाधारेण **'भाति मे भारतम्'** नाम नृत्यं रमाकान्तशुक्लस्यैतन्नाम्नीं

संस्कृतरचनामवलम्ब्य प्रस्तुतम् । तदनु चेमाभि श्रीवल्लभाचार्यकृतं 'मधुराष्टकम्' जयदेवकृतं दशावतारं (गीतगोविन्दान्तर्गतं) चावलम्ब्य 'गोफगुन्थन'-रास-शैल्यां निबद्धं नृत्यं प्रस्तुतम् ।

संस्कृतसंगीतकस्य द्वितीये भागे मुजफ्फरनगरस्थ-**'श्रीरामदरबार'**-संस्थायाः सर्वश्री पं० गोपाल-शुकदेव-कौशलेन्द्र-राघवेन्द्रशर्मबन्धुभिः संस्कृते रामकथायाः गायनं कृतम् । शर्मबन्धुभिः वाल्मीकि-व्यास-कालिदास-वेंकटाध्वरि-तुलसीदास-उमाकान्तशुक्लानां रचनाभ्यः केचन अंशा उद्धृत्य पौरस्त्य-पाश्चात्त्य-सङ्गीत-सामञ्जस्यकारिण्या मनोज्ञया अनितरसाधारण्या स्वसमूहगानपद्धत्या प्रस्तुता. ।

२६.१२.१९८३ तारिकायां सुश्रीकमलिनीदत्तनिर्देशने, शाहजहान-नृपतिना पण्डितराजोपाधिना सम्मानितस्य रसगंगाधर-गंगालहरी-चित्रमीमांसा-खण्डन-भामिनीविलासादि-ग्रन्थैः संस्कृतसाहित्यमकुर्वतो नैकभाषासु कृत-परिश्रमस्य, प्रौढविदुषः कवेश्च जगन्नाथस्य विषये प्रवर्तितां किम्वदन्तीमव-लम्ब्य रमाकान्तशुक्लप्रणीतं **'पण्डितराजीयं'** नाम संस्कृतनाटकं प्रयुक्तम् । अस्मिन्नाटके पण्डितराजस्य श्रीबलदेवानन्दसागरः, शाहजहानस्य श्रीविश्वनाथ-शर्मा, लवङ्ग्या हेमलता, सम्राज्ञाः कु० शशिबाला गुप्ता, असूयकपण्डितस्य च भूमिकां श्री प्रमोद दुआ ससाफल्यं निरवहन् । सर्वश्रीरमणकुमारशर्म-गणेशप्रसाद- तनूजा - शशिपालशर्म-मालती गुप्ता - जयशंकर-रमाकान्त शुक्लै-श्चापि विविधा भूमिका. निर्व्यूढाः । संगीतनिर्देशनं श्रीछोटेलालः, प्रकाश-योजनां श्री नरेन्द्रकुमारः सूरी, रङ्गसज्जां श्री एच०एस० रावतः, प्रसाधनं श्री नरेश खरे, वेशभूषारचनां च श्री ए० बिन्दलः समन्वतिष्ठन् ।

२५-१-१९८३ तारिकायां देववाणी-परिषदः षष्ठवार्षिकाधिवेशनावसरे कमलिनीदत्त-महाभागाया निर्देशने प्रथमं प्रयुक्तस्य **'पण्डितराजीयस्य'** अयं द्वितीयः प्रयोग आसीद्यत्र तया निर्देशने किञ्चिन्नावीन्यं संयोजितम् । तया पुरातनपरम्परानूतनप्रयोगयोः सामञ्जस्येन संस्कृतनाट्यजगति काचिद्विशिष्टा स्फूर्तिः सञ्चारिता ।

३०-१२-१९८३ तारिकायां सुश्रीकमलिनीदत्त-निर्देशन एव **'पुरश्चरण-कमलम्'** इतीदं संस्कृतनाटकं प्रयुक्तमजायत । नाटकमिदं पं० सूर्यकान्तत्रिपाठि 'निराला' कृतां **'राम की शक्तिपूजा'** - इति हिन्दीकवितामाधारीकृत्य डा० रमाकान्तशुक्लेन प्रणीतम् । नाटकेऽस्मिन् सर्वश्री - बलदेवानन्दसागर-मालती गुप्ता-कु० शशिबाला गुप्ता शशिपालशर्म-विश्वनाथशर्म-रमणकुमारशर्म-

गणेशप्रसाद-केदारदत्तशास्त्रि-चन्द्रमौलिशुक्ल-जयशंकर-गोवर्धन सेमवाल-राकेश आहूजा-रतनकुमार-भूपेन्द्रपुरोहित-रमाकान्तशुक्लैश्च विविधा भूमिका अनुष्ठिताः। संगीतादिनिर्देशनं यथापूर्वमेवासीत्। संगीतकारेषु सर्वश्रीवर्मन-मतलूब हुसैन-पवननायडू-प्रभृतयः कलाकारा आसन्।

३०.१२.१९८६ तारिकायामेव परिषत्प्रकाशितस्य 'पुरश्चरणकमलम्' इत्येतन्नामकस्य ग्रन्थस्य समुन्मीलनोत्सवोऽप्यायोज्यत यत्र राष्ट्रियसंस्कृत-संस्थान-निदेशकस्य डा० मण्डन मिश्र महाभागस्य अध्यक्षतायां सुख्यातसमालोचकेन डा० नगेन्द्रमहाभागेन डा० रमाकान्तशुक्लप्रणीत 'पुरश्चरणकमलम्' नाम संस्कृतनाटकं समुन्मीलितम् (विमोचितम्)। ग्रन्थस्य प्रथमं प्रतिरूपं दिल्लीविश्वविद्यालयस्य हिन्दी-विभागाध्यक्षायै डा० निर्मला-जैनमहाभागायै समर्पितमभूत्। अस्मिन्नवसरे अभिभाषमाणेन डा० नगेन्द्रमहाभागेन निगदितं यत् 'पुरश्चरणकमलं' हि निरालाकृतकविताया: नाटकीयं तत्त्वं सफलतया समुन्मीलयति।

नाट्यसमारोह-समापनवेलायां मुख्यातिथिना डा० नगेन्द्रमहाभागेन संस्कृतसंगीतकस्य नाट्यसमारोहस्य च निर्देशिका सुश्री कमलिनीदत्तमहाभागा देववाणी-परिषत्पक्षतः समभिनन्दिता।

अर्वाचीनसंस्कृतस्य षष्ठवर्षे प्रवेशः

१५-१-१९८४ ई० तारिकायां अर्वाचीनसंस्कृतम् षष्ठवर्षं प्रविष्टम्। 'आर-६, वाणी-विहार, नयी दिल्ली-११००५९' इति स्थाने विद्यावाचस्पति पं० अमीरचन्द शास्त्रिणा षष्ठवर्षस्य प्रथमोऽङ्कः समुन्मील्य विद्वद्भ्यः समर्पितः।

'अभिनवोत्तर संस्कृत-काव्यशास्त्र में साधारणीकरण विमर्श' इति ग्रन्थस्य समुन्मीलनोत्सवः

१५-२-१९८४ तारिकायां दिल्लीविश्वविद्यालयस्य कलासंकाये सेमिनार-कक्षे परिषदस्तत्त्वावधाने एकस्मिन् समारोहे दिल्लीविश्वविद्यालयस्य हिन्दी-विभागाध्यक्षपदमलंकुर्वत्या श्रीमत्या डा० निर्मला जैन-महाभागया परिषत्प्रकाशितः डा० सुलेखचन्द्रशर्म लिखितः "अभिनवोत्तर संस्कृत काव्यशास्त्र में साधारणीकरण विमर्श" इति शीर्षको ग्रन्थः समुन्मील्य वयोवृद्धविदुषे डा० दशरथ ओझा-महाभागाय समर्पितः। उत्सवस्य आध्यक्ष्यं दिल्लीविश्व-विद्यालयस्य प्राक्तनहिन्दीविभागाध्यक्षेण डा० विजयेन्द्र स्नातक-महाभागेन सम्पादितम्। कृतिमवलम्ब्य केन्द्रीय-हिन्दी-निदेशालये सम्पादकेन डा० नरेन्द्र

व्यास - महाभागेन पत्रपाठः कृतः। अस्मिन्ननुष्ठाने विश्वविद्यालयस्य नैके आचार्याः, प्राध्यापकाः शोधच्छात्राश्च समुपातिष्ठन्। श्रीगणेशप्रसाद विद्यालंकारेण सरस्वती-वंदना कृता।

'संस्कृतसाहित्य में राष्ट्रियभावना' - ग्रन्थस्य त्रयाणां खण्डानां समुन्मीलनोत्सवः

२०-२-१९८४ तारिकायाम् 'आर-६, वाणी-विहार, नयी दिल्ली-११००५९' इति स्थाने समायोजिते एकस्मिन् समारोहे डा० कृष्णकान्त शुक्ल महाभागेन परिषत्प्रकाशितं डा० हरिनारायण दीक्षित-लिखितं, 'संस्कृत साहित्य में राष्ट्रियभावना' इति ग्रन्थस्य खण्डत्रयं विमोचयता संस्कृतस्य राष्ट्रियभावना - भरितस्य साहित्यस्य अनुशीलनस्योपयोगित्वं सविशेषं प्रतिपादितम्। स्मरणीयं विद्यते यत् परिषदा १९८३ तमेशवीयेऽब्देऽस्य ग्रन्थस्य त्रिषु खण्डेषु प्रकाशनं कृतम्।

'श्रीबदरीशतरङ्गिणी' - 'सुरश्मिकाश्मीरयोः' समुन्मील - नोत्सवः

२१-२-१९८४ तारिकायां नवदिल्लीस्थे भारतीयविद्याभवने समायोजिते एकस्मिन् भव्यसमारोहे भारतसर्वकारस्य योजनायोग - सदस्येन प्रोफेसर एम०जी०के० मेनन महाभागेन परिषत्प्रकाशितौ श्रीसुन्दरराज आई०ए०एस०-प्रणीतौ 'श्रीबदरीशतरङ्गिणी' 'सुरश्मिकाश्मीरं' चेत्याख्यौ काव्यग्रन्थौ समुन्मीलितौ। तेन संस्कृते आकर्षकप्रकाशनानामावश्यकता रेखांकिता। भारतसर्वकारस्य शिक्षासंस्कृतिमन्त्रालये संयुक्तपरामर्शदात्रा डा० रामकरण-शर्ममहाभागेन कृतिद्वयमवलम्ब्य विचाराः प्रकटिताः। परिषन्महासचिवेन डा० रमाकान्तशुक्लेन भारतसर्वकारस्य योजनायोगे संयुक्तसचिवपदं निर्वहन्नपि स्वान्तःसुखाय काव्यरचनायां प्रवृत्तः श्रीसुन्दरराजमहाभागः परिषत्पक्षतः समभिनन्दितः। डा० सम्पन्नारायणाचार्यमहाभागेन कवयितुः परिचयः प्रस्तुतः। श्रीसुन्दरराजमहाभागेन संस्कृतपद्यैः स्वाभिनन्दनस्योत्तरं व्याहरता देववाण्याः समुन्नतिरभिलषिता कवितां प्रति आदरश्च प्रकटितः।

संस्कृताशुलिपि - 'श्रीगणेश'-पुरस्कार-समर्पणोत्सवः

२१-२-८४ तारिकायां भारतीयविद्याभवने एव संस्कृताशुलिपिविकासार्थं देववाणी - परिषत्प्रवर्तित एंकोत्तरपञ्चसहस्ररूप्यकात्मकः संस्कृताशुलिपि-

'श्रीगणेश' पुरस्कारः केन्द्रीयसर्वकारस्य शिक्षासंस्कृतिमन्त्रालये उपपरामर्श-दात्रा डा० सी०आर० स्वामिनाथन्-महाभागेन श्रीगोपालदत्तविष्टमहाभागाय सताम्रपत्रप्रावारकः समर्पितः । पुरस्कार - समर्पण-समारोहस्य प्रारम्भो डा० नित्यानन्दशर्मकृत - सरस्वती - वन्दनयाभूत् । परिषदध्यक्षैराचार्य - रमेशचन्द्र शुक्ल - महाभागैराशा प्रकटिता यत् संस्कृतज्ञानां संस्कृतानु-रागिणां च समवेतप्रयासैः संस्कृताशुलिपिविद्या समधिकं विकासं लप्स्यते। समारोहस्याध्यक्षपदमलंकुर्वता राष्ट्रियसंस्कृतसंस्थाननिदेशकेन डा० मण्डनमिश्रमहाभागेन संस्कृत - संस्थानानां संस्कृतमाध्यमेन पारस्परिक-पत्राचारार्थम्, संस्कृतपत्रपत्रिकाणां सम्पादन-सौकर्याय च संस्कृताशुलिपे-रौपयिकत्वम् सविशेषं प्रतिपादितम्- देववाणी परिषदः प्रयासाश्च एतदर्थम् सविशेषम् अभिनन्दिताः। परिषन्महासचिवेन रमाकान्तशुक्लेन सूचितम् यत् षड्वर्षाणामनवरतप्रयासैः संस्कृताशुलिपेः प्रारम्भिकसूत्रपातः सुशकोऽजायत । यद्यग्रेऽस्यां दिशि संस्कृत-संस्थाभिः सर्वकारेण च समुचितः प्रयत्नो विधीयेत तर्हि अस्याः सम्यक् विकासः संभाव्यते । -

रसदर्शनस्य विमोचनम्

१४-३-१९८४ तारिकायां मौरीशसदेस्य 'मोका'स्थ-महात्मा-गान्धी-संस्थान-सभागारे देववाणी-परिषत्प्रकाशितस्य किञ्च आचार्य श्रीरमेशचन्द्र-शुक्ललिखितस्य 'रसदर्शनम्' इत्येतन्नामकस्य ग्रन्थस्य समुन्मीलनं मौरीशसस्य प्रधानमन्त्रिणा श्रीमता अनिरुद्ध-जगन्नाथमहागेन कृतम् । अस्मिन्नवसरे तत्रत्यः शिक्षामन्त्री श्री ए० परशुरामन्-महाभागः, तत्र भारतीयोच्चायुक्तः श्रीप्रेमसिंह - महाभागः महात्मगान्धिसंस्थानस्य निदेशकः श्री उत्तमविष्णुदयाल-महाभागः, संस्कृत-सम्मेलन - आयोजन-समितेरध्यक्षः श्रीचितलालरामचरण-महाभागः, भारतसर्वकारस्य शिक्षामन्त्रालये उपपरामर्शदाता डा० सी० आर० स्वामिनाथमहाभागश्च स्वशुभकामना अभिव्यक्तवन्तः। देववाणी-परिषदो महा-सचिवेन डा० रमाकान्तशुक्लेनोक्तं यद् रससिद्धान्तो हि सकलब्रह्माण्डे स्थितानां प्राणिनामेकात्मतां पोषयति; अनेकत्वे च एकत्वं द्रष्टुमनाः तिष्ठति। तेन परिषत्प्रकाशिताया 'आराधना'ख्यायाः पुस्तिकायाः पञ्चशतप्रतिरूपैः साकमन्येऽपि परिषत्प्रकाशिता ग्रन्थाः संस्कृतसम्मेलनायोजकेभ्यः समर्पिताः। परिषदः सहसचिवेन आचार्यश्रीरवीन्द्रनागरमहाभागेन विद्वद्भ्यो धन्यवादो व्याहृतः ।

देववाणी-परिषदो नवमः सङ्कल्पनादिवससमारोहः सम्पन्नः

२१-८-१९८४ ई० तारिकायां नवदिल्ल्याः 'रामायण-विद्यापीठे' देववाणी-परिषदो नवमः सङ्कल्पना-दिवसः ससमारोहं सम्मानितोऽभूत् ।

अस्मिन्नवसरे मुख्यातिथिना डा कर्णसिंह-महाभागेन परिषत्प्रकाशितो डा० हरिनारायणदीक्षित-लिखितः सपरिशिष्टश्च **'संस्कृत-साहित्य में राष्ट्रिय भावना'** इत्येतन्नामको ग्रन्थः समुन्मीलितः संस्कृत-नाट्यकलाकाराश्च समभिनन्दिताः । तेनोक्तम् यत् संस्कृतं नाम कस्यचित् धर्मविशेषस्य वर्णविशेषस्यैव वा भाषा नास्ति, अपितु मानवमात्रार्थं महानुपहारोऽस्ति । संस्कृत-साहित्यं राष्ट्रभक्तिभावनां विश्वमङ्गलमूलकमानवीयभावनां च जागरयितुमद्भुतां शक्तिं निदधाति ।

कार्यक्रमस्य प्रारम्भः श्रीमती शीला घोषाल-कु० मोमिता घोषालाभ्यां मनोहरस्वरेण प्रस्तुतया भारती-सुरभारतीवन्दनया सञ्जातः । भारत - सर्वकारस्य योजनायोगे संयुक्तसचिवेन लब्धप्रतिष्ठेन संस्कृतकविना श्री श्रीसुन्दरराज-महाभागेन देववाणी-परिषदः संस्तवः स्वरचितैः संस्कृतपद्यैः प्रस्तुतः ।

परिषदो महासचिवेन रमाकान्तशुक्लेन विज्ञापितं यत्परिषदा अद्यावधि चत्वारिंशत्प्रायाः संस्कृत-ग्रन्था प्रकाशिताः सन्ति; प्रतिवर्षं च संस्कृतनाट्यसमारोह-कविसम्मेलनाक्षरश्लोकादिसमायोजनद्वारा परिषद् जनेषु संस्कृतं प्रति रुचिं जागरयितुं यथाशक्ति प्रयतते ।

समारोहस्याध्यक्ष्यं परिषदध्यक्षैराचार्य रमेशचन्द्र शुक्ल महाभागैः कृतम् । तैः परिषत्प्रकाशिता ग्रन्थाः अपि मुख्यातिथिमहाभागाय उपायनीकृताः ।

अर्वाचीनसंस्कृतस्य फिलाडेल्फियायां समुन्मीलनम्

१५-१०-१९८४ ई० तारिकायां फिलाडेल्फियायां षष्ठविश्वसंस्कृत-सम्मेलनावसरे प्रो० रामचन्द्र नारायणदाण्डेकरमहाभागैः अर्वाचीनसंस्कृतस्य षष्ठवर्षपूर्त्यङ्कः समुन्मील्य शिकागोविश्वविद्यालयस्य संस्कृत-विभागाचार्येभ्यः डा० एड्विन गैरो-महाभागेभ्यः समर्पितः । अस्मिन्नवसरे पं० वसन्त अनन्त गाडगील-डा० स्टुअर्ट मैग्रेगर - डा० सत्यव्रतशास्त्रि - डा० हांस हेनरी हावक-डा० रामकरणशर्म - डा० रेवाप्रसादद्विवेदि - डा० प्रभाकरनारायण कवठेकर-डा० जयमन्त मिश्र - डा० मण्डन मिश्र प्रभृतिभिः नैकैर्भारतीयै रन्यदेशीयैश्च संस्कृतविद्वद्भिः पत्रस्य प्रकाशनार्थं देववाणी-परिषदभिनन्दिता । पत्रस्य प्रधानसम्पादकेन रमाकान्तशुक्लेन संक्षेपतः पत्रस्येतिहासः समुपस्थापितः ।

समारोहोऽयं पेन्सिल्वानिया - विश्वविद्यालय - संग्रहालयस्य 'हेरिसन'-सभागारे सम्पन्नः ।

ध्वनिपट्टिकायां सम्पूर्णगीतापाठः

परिषदो नवमस्थापनादिवसे १३-१२-१९८४ ई० तारिकायां परिषदध्यक्षैः आचार्यरमेशचन्द्रशुक्लैः डा० रमाकान्तशुक्लस्य स्वरे सम्पूर्ण-गीतापाठं दधाना ध्वनिपट्टिका (Cassette) प्रवर्तिता ।

संस्कृत-साहित्ये इन्दिरा गान्धी

परिषदस्तत्त्वावधाने १९-११-१९८४ ई० तारिकायां डा० रमाकान्त शुक्लेन 'संस्कृत साहित्ये इन्दिरा गान्धी' इति विषयमवलम्ब्य वार्ता प्रस्तुता ।

त्रिदिवसीये सारस्वतसमारोहे मौरिशस-संस्थाभ्यः ध्वनिपट्टिकासमर्पणं, ग्रन्थोन्मीलनञ्च

मकरसंक्रान्त्यां (१४-१-१९८५ ई० तारिकायां) देववाणी-परिषद-स्त्रिदिवसीयः सारस्वत-समारोहः प्रारब्धः ।

अस्य प्रथमदिवसे केन्द्रीयशिक्षामन्त्रिणा श्रीकृष्णचन्द्रपन्तमहाभागेन परिषत्पक्षतः उपहारस्वरूपं 'मौरिशस-सनातनधर्म-मन्दिर-परिसङ्घ (फैडरेशन)-अध्यक्षाय श्रीपरमानन्द रामलखन-महाभागाय एकशतं ध्वन्यंकितपट्टिकाः (Cassette) समर्पिताः । एतासु ध्वनिपट्टिकासु संस्कृतश्लोकानां सस्वरं पाठो ध्वन्यंकितोऽस्ति ।

अस्मिन्नवसरे शिक्षामिन्त्रणा परिषत्प्रकाशितं डा० रमाकान्त शुक्ल-प्रणीतं **'भाति मौरीशसम्'** नाम काव्यमपि समुन्मीलितम् । मौरिशसमवलम्ब्य संस्कृत-भाषायामिदं हि सर्वप्रथमं काव्यं वर्तते यस्य रचना कविना १७-३-८४ ई० दिनांके मौरिशस एव कृतासीत् । अस्यापि एकशतं प्रतिरूपाणि परिषत्पक्षतः शिक्षामन्त्रिणा श्रीरामलखनमहाभागाय उपायनीकृतानि ।

समारोहेऽस्मिन् शिक्षामन्त्रालये अपरसचिवपदमकुर्वती डा० कपिला वात्स्यायन-महाभागा, संस्कृतोपशिक्षापरामर्शदाता डा० स्वामिनाथ-महाभागः, राष्ट्रियसंस्कृत संस्थाननिदेशको डा० मण्डनमिश्र-महाभागः, भारतीयभाषा-विभागनिदेशिका श्रीमती आदर्शमिश्र - महाभागा तथान्येऽपि शिक्षाविदः समुपस्थिता आसन् ।

समारोहस्य द्वितीये दिवसे, १५-१-१९८५ ई० तारिकायां, डा० मण्डनमिश्र-महाभागः अर्वाचीनसंस्कृतस्य सप्तमवर्षीयं प्रथमांकं समुन्मीलितवान् ।

तृतीये दिवसे (१६-१-१९८५ ई० तारिकायां) डा० सुलेखचन्द्रशर्मणः 'साधारणीकरण और समानान्तर चिन्तन' इत्येतत्परिषत्प्रकाशितं ग्रन्थं केन्द्रीय-हिन्दी-निदेशालयस्य निदेशकः श्रीराजमणितिवारी महाभागः समुन्मीलितवान् । ग्रन्थमवलम्ब्य प्रो० तारकनाथबाली-डा० सुन्दरलालकथूरिया-महाभागौ विमर्शं विहितवन्तौ । दिल्लीविश्वविद्यालयस्य हिन्दीविभागाध्यक्षः प्रो० महेन्द्रकुमार महाभागः समारोहस्याध्यक्ष्यं निरवहत् ।

विद्वदभिनन्दनम्

देववाणी-परिषदा 'शंकर - एकेडेमी' - 'संस्कृत-सेवा-संस्थान'-'मीमांसा'-संस्थानां सहयोगेन १६-३-१९८५ ई० तारिकायाम् नयी दिल्लीस्थे श्रीलाल-बहादुरशास्त्रिकेन्द्रीयसंस्कृत-विद्यापीठे राष्ट्रपतिपुरस्कृतानां पं० जग्गू आलवार अयंगार - पं० आनन्द झा - पं० कुलमणि मिश्र - डा० दलसुख डाह्याभाई मालवणिया-डा० शशिधरशर्मणां संस्कृतविदुषाम्, उत्तरप्रदेशसंस्कृताकादम्या पञ्चविंशतिमहस्ररूप्यकात्मकविशिष्टपुरस्कारेण सम्माननीयानामाचार्य-श्रीरमेशचन्द्रशुक्लमहाभागानाम्, दशसहस्ररूप्यकात्मकपुरस्कारेण सम्माननीयानां डा० मण्डनमिश्रमहाभागानां च समभिनन्दनं कृतम् ।

समारोहस्याध्यक्ष्यं सुप्रसिद्धविधिवेत्ता डा० लक्ष्मीमल्ल-सिंघवी-महाभाग, मुख्यातिथित्वं च शिक्षामन्त्रालये संयुक्तपरामर्शदाता डा० त्रिलोकीनाथ-धरममहाभागो व्यधाताम् । केन्द्रीयशिक्षामन्त्रालये संस्कृतोपपरामर्शदाता डा० सी० आर० स्वामिनाथ - महाभागः, संस्कृत-सेवासंस्थान-मन्त्री आचार्य रामदयालु शास्त्री, मीमांसा- सचिवः डा० रामसुरेशपाण्डेयः, देववाणी-परिषन्महासचिवः रमाकान्तशुक्लश्च अंगवस्त्र - श्रीफल - पुष्पहाराभिनन्दन-पत्रैर्विदुषामभिनन्दनं चक्रुः ।

अक्षरश्लोकम् शिशुश्लोकपाठश्च

परिषदा २४-३-१९८५ तारिकायां शिशुश्लोकपाठस्य अक्षरश्लोकस्य चायोजनं कृतम् ।

'संस्कृत-नाट्य-समारोहः' कवि-सम्मेलनं च

"देववाणी-परिषद्" ३१-३-१९८५ तारिकायां दिल्लीविश्वविद्यालयस्य

टैगोर-सभागारे "बालसंस्कृत-नाटक-प्रदर्शनम्" "अखिलभारतीयसंस्कृतकवि-सम्मेलनं" चायोजितवती । बालसंस्कृत-नाटक-प्रदर्शनार्थं नवदिल्ल्या "गुडविल पब्लिक स्कूल" नाम्नी संस्था विशिष्टं पुरस्कारमलभत ।

कविसम्मेलने देशस्य विभिन्नेभ्यो भागेभ्य आगतैरेभिः सप्तविंशति-कविभिः स्वकाव्यरचनाः प्रस्तुताः—

१. डा० विन्ध्येश्वरीप्रसाद मिश्रः (पन्नातः), २. डा० पुष्पा त्रिवेदी (विलासपुरतः), ३. डा० कमलेशदत्त त्रिपाठी (उज्जैनत), ४ आचार्य वेदानन्द झा (दिल्लीतः), ५. डा० राजेन्द्र मिश्रः "अभिराजः" (प्रयागतः), ६. डा० उमाकान्त शुक्वः (मुजफ्फरनगरतः), ७. डा० प्रशस्यमित्र शास्त्री (रायबरेलीतः), ८. प्रो० वि० वेंकटाचलम् (उज्जैनतः), ९. डा०कृष्णकान्त शुक्लः (बरेलीतः), १०. डा० सी० आर० स्वामिनाथन् (दिल्लीतः), ११. श्री श्रीनिवास रथः (उज्जैनतः), १२. श्री विष्णुकान्त शुक्लः (सहारनपुरतः), १३. श्री दीपक घोषः (कलकत्तातः), १४. डा० सत्यपालनारगः (दिल्लीतः), १५. कविरत्न श्रीकृष्ण सेमवालः (दिल्लीतः), १६. डा० परमानन्द शास्त्री (अलीगढ़तः), १७. डा० इच्छाराम द्विवेदी (मैनपुरीतः), १८. डा० सुधाकराचार्य त्रिपाठी (मेरठतः), १९. श्री रामकृष्ण शर्मा (दिल्लीतः), २०. डा० हर्षनाथः मिश्रः (दिल्लीतः) २१. श्री वी० रामचन्द्रन् (दिल्लीतः), २२. डा० सुबोधचन्द्र पन्तः (दिल्लीतः), २३. श्री पी० एन० पी० नम्पूतिरिः (दिल्लीतः), २४. श्री ओमप्रकाश ठाकुरः (दिल्लीतः), २५. रमाकान्त शुक्लः (दिल्लीतः), २६. श्री टी० वी० परमेश्वर अय्यरः (दिल्लीतः), २७. आचार्य रमेशचन्द्र शुक्लः (दिल्लीतः) ।

समारोहस्य मुख्यातिथिना डा० सी० आर० स्वामिनाथमहाभागेन संस्कृत-कविता सामयिकीनां कालजयिनीनां च भावनानामभिव्यक्तेः मनोहारि-साधनात्वेन प्रतिपादिता । तेनात्रावसरे देववाणी-परिषत्प्रकाशितो डा० विन्ध्येश्वरीप्रसादमिश्रविरचितश्च 'सारस्वतसमुन्मेषः" इति कवितासंग्रहोऽपि समुन्मीलितः । कवि-सम्मेलनस्य प्रारम्भं नववर्षीयः शिशुः अभिनव शुक्लो दशावतार-प्रार्थनयाकरोत् । सम्मेलनस्याध्यक्ष्यं परिषदोऽध्यक्षैराचार्यरमेशचन्द्र-शुक्लमहाभागैः संचालनं च महासचिवेन रमाकान्तशुक्लेन कृतम् ।

स्वामिनाथ-विशेषांकस्य समुन्मीलनम्

३०-४-१९८५ तारिकायाम् परिषदस्तत्त्वावधाने उपराष्ट्रपति-निवासे समायोजिते एकस्मिन् भव्यसमारोहे भारतस्य महामहिमोपराष्ट्रपतिना

श्रीरामस्वामी वेंकटरामन्-महाभागेन अर्वाचीनसंस्कृतस्य 'स्वामिनाथ-विशेषांक:' समुन्मील्य डा० शास्त्रपुरम् रामकृष्णस्वामिनाथ महाभागाय समर्पित:। अस्मिन्नवसरे भारतीयसर्वोच्चन्यायालस्य न्यायाधीशाभ्यां न्यायमूर्ति श्री-रंगनाथमिश्र-न्यायमूर्ति श्री वी० बालकृष्ण एराडि-महाभागाभ्यां ग्रन्थं डा० स्वामिनाथं चावलम्ब्याभिभाषितम्। अस्मिन्नवसरे दूरदर्शनकलाकारै: श्री-छोटेलालमहाभागस्य निर्देशने सुरभारतीवन्दना प्रस्तुता। परिषत्पक्षत: स्वागतभाषणं परिषन्महासचिवेन डा० रमाकान्त शुक्लेन, धन्यवादज्ञापनं च डा० मण्डनमिश्रमहाभागेन कृतम्।

परिषद: सदस्यानामभिनन्दनम्

परिषदो नेके सदस्या विविधै: सम्मानै: सत्कृता अभूवन्। आचार्य-रमेशचन्द्रशुक्लमहाभागानाम् अलीगढ़े ११-१२-१९८३ ई० तारिकायाम् अभिनन्दनं संवृत्तम् यत्र 'आचार्यश्रीरमेशचन्द्रशुक्लाभिनन्दनसमारोहसमित्या' 'आम्भृणीयम्' नाम अभिनन्दनग्रन्थस्तेभ्य: समर्पित:। ७-५-१९८५ तारिकायां तीनमूर्तिसभागारे उत्तरप्रदेशसंस्कृताकादम्या आयोजिते पुरस्कार-समारोहे आचार्यशुक्लेभ्यो भारतसर्वकास्य प्रधानमन्त्रिणा श्रीराजीवगान्धिमहाभागेन पंचविंशतिसहस्ररूप्यकात्मको विशिष्टपुरस्कार: समर्पित:

१५-८-१९८३ तारिकायां डा० मण्डनमिश्रमहाभागा: संस्कृतस्योत्कृष्ट-सेवार्थं भारतस्य महामहिमराष्ट्रपतिना सम्मानिता:। २६-४-१९८४ तारिकायां तेषां नैकाभि: संस्थाभि: राष्ट्रीयसंग्रहालय-सभागारे नागरिकमभिनन्दनं कृतम्। डा० मिश्रमहाभागा: उत्तरप्रदेशसंस्कृताकादम्या दशसहस्ररूप्यकात्मकेन 'शांकर-पुरस्कारेण' अपि सत्कृता:। प्रधानमन्त्रिणा ७-५-१९८५ तारिकायां तेभ्योऽपि पुरस्कार: समर्पित:।

डा० देवीदत्तशर्ममहाभागा 'नेहरू'शिक्षावृत्तिं लब्धवन्त:।

१७-९-१९८३ तारिकायां नवदिल्ल्या: 'साहित्यसंगम' - संस्थया परिष-त्सदस्यौ ड० सुलेखचन्द्रशर्म -रमाकान्त शुक्लौ सम्मानितौ।

परिषदा एते सर्वेऽपि वर्धाप्यन्ते।

परिषदा सद्ग्रन्थ-प्रकाशयोजनायामेते ग्रन्था: प्रकाशिता :—

१. **संस्कृत साहित्य में राष्ट्रिय भावना** (डा० हरिनारायण दीक्षित:)
२. **अभिनवोत्तर संस्कृत काव्यशास्त्र में साधारणीकरण-विमर्श** (डा० सुलेचन्द्र शर्मा)
३. **साधारणीकरण : प्राच्य और प्रतीच्य चिन्तन** (डा० सुलेखचन्द्र शर्मा)

४. साधारणीकरण और समानान्तर चिन्तन (डा० सुलेखचन्द्र शर्मा)
५. श्रीबदरीशसुप्रभातम् (पं० रघुनाथशर्मकृत - टीका सहितम्)
(प्रणेता -डा०सी०आर० स्वामिनाथ:)
६. श्रीबदरीशतरंगिणी (श्री श्रीसुन्दरराज.)
७. सुरश्मिकाश्मीरम् (")
८. श्रीउच्छिष्टगणपतिमहाकल्प: (डा० सी० आर० स्वामिनाथ:)
९. श्रीपादसप्तते: श्रीपादपरागव्याख्या (")
१०. स्फूर्तिसप्तशती (डा० शिवदत्त शर्मा चतुर्वेदी)
११. पूर्णकुम्भ: (पं० विष्णुकान्त शुक्ल:)
१२. पुरश्चरणकमलम् डा० रमाकान्त शुक्ल.)
१३. पण्डितराजीयम् (")
१४. अभिशापम् (")
१५. कूहा (डा० उमाकान्त शुक्ल:)
१६. रसदर्शनम् (डा० रमेशचन्द्र शुक्ल:)
१७. कृष्णात्परं किमपि तत्त्वमहं न जाने (डा० रमेशचन्द्र शुक्ल:)
१८. रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)
१९. सारस्वतसमुन्मेष: (डा० विन्ध्येश्वरीप्रसाद मिश्र: विनय:)
२०. आराधना (सं० आचार्य रवीन्द्रनागर)

अद्यत्वे आचार्यश्रीरमेशचन्द्रप्रणीतं 'नवभारतपुराणम्', श्रीश्रीसुन्दरराजप्रणीतम् 'अभागभारतं' कविरत्न-श्रीकृष्णसेमवाल-रचितं 'महाप्रयाणं' चेति काव्यत्रयं परिषदा मुद्राप्यते यस्य शीघ्रमेव प्रकाशनमाशास्यते ।

परिषदा 'अर्वाचीनसंस्कृतं' नियमत: प्रकाश्यते ।

परिषदा दातार:, दिल्लीप्रशासनस्य शिक्षानिदेशालय:, भारतसर्वकारस्य शिक्षामन्त्रालय:, अतिथयो विद्वांस:, नाट्य-संगीत-कलाकारा:, स्वकार्यकर्तार: सदस्या: सभासदश्च धन्यवादै: सभाज्यन्ते येषां सहयोगेनेयमग्रेसरति ।

यत्प्रभापटलोद्भासा भासतेऽद्यापि भारतम् ।
दिव्यं तत्संस्कृतज्योतिरासंसारं प्रकाशताम् ॥

रमाकान्त शुक्ल:

(डा० रमाकान्त शुक्ल:)
महासचिव:
देववाणी-परिषद्, दिल्ली

आर-६, वाणी-विहार:,
नयी दिल्ली-११००५९
५-८-१९८५

DEVAVANI PARISHAD. DELHI

R-6, Vani Vihar. New Delhi-110059

Balance Sheet as on 31-12-1983

LIABILILIES	AMOUNT Rs.	Rs.	ASSETS	AMOUNT Rs.	Rs.
Interest Free Loan :		19,901.00	**Tape Recorder :**	393.66	
Expenses Payable :		86,854.50	Less : Depreciation :	39.36	354.30
Audit fee payable :		150.00	**Cassettes :**	360.21	
			Add : Purchased during the year :	412.70	
				772.91	
			Less : Depreciation :	77.29	695.62
			Library Books :	105.26	
			Addition during the year :	137.15	
				242,41	
			Less : Depreciation :	36.36	206.05
			Sundry Debtors :		
			Sales Receivable :	24.540.25	

Liabilities		Assets		
		Subscription due :	292.00	24,832.25
		Closing Stock (as valued by office bearers).		30,736.07
		Manuscript (Cost)		2,000.00
		Excess of Expenditure over Income :		
		Up to 31.12.1982.	23,465.07	
		Add for the year :	24,015.26	47,480.33
		Current Assets :		
		Cash in Hand :	25.17	
		Cash with S/B Account No. 2886	350.80	
		Cash with C/A Account No. C & I 1021	224.91	600.88
	1,06,905.50			1,06,905.50

Sd/- Dr. Ramesh Chandra Shukla (Adhyaksha)

Sd/- Rama Kant Shukla (Mahasachiva)

Sd/- Smt. Rama Shukla (Koshadhyaksha)

We have audited the accounts and found them in agreement with the books & vouchers and per explanations & details given to us. Accounts have been maintained on mercantile basis.

for Sharma Gupta & Co.,
Chartered Accountants
(Seal)
Sd/- D. K. Gupta,
LL.B. F.C.A., Parttner

Place : 1/24, Asaf Ali Road,
New Delhi

Dated : 16th Apr. 1984

DEVAVANI PARISHAD, DELHI

R-6, Vani Vihar, New Delhi-110059

Income & Expenditure Account as on 31-12-1983

EXPENDITURE	Rs.	Rs.	INCOME	Rs.	Rs.
Opening Stock :		36,189.27	Life Membership		600.00
Book Production			Annual Subscription for		
Expenses :	52,123.00		1. Parishad :	156.00	
Add : Books Purchased :	11,945.55	64,068.55	2. Arvachin Sanskritam	1,122.75	1,278.75
Programmes out of Grants				———	
Sanctioned :			Donaticn :		14,993.00
			Sale of Books		70,109.85
			Interest received		7.38
Expenses. (Arvachin Sanskritam)	16,679.42		Closing Styck (as valued by office bearers)		30,736.07
NATYA SAMAROH.			Miscelleneous receipts		103.80
Expenses :	33,513.20		**By income for Arvachin Sanskritam :**		
SANSKRIT KAVI SAMMELAN.	14,298.25		Sale of Books	5,145.00	
AKSHAR SHLOKAM.	2,838.25	67,329.12	Adv. Income	550.00	5,695 00
	———			———	
Samaroh & Goshthi.		4,290.50	**By Grant received from Ministry of Education & Culture, Govt. of India**		
Printing & Stationery.		2,310.50	**Letter No. & Date**	**Purpose**	
Royalty paid		3,702.00	F-4-24/81 Skt. II	Arvachin	
Establishment		600.00	dated 14-3-83	Sanskritam	4,000.00

Expenditure		Amount	Income			Amount
Conveyance/Travelling		217.00	F-4-24/81 Skt. II			
Postage		228.05	dated 11-7-83	-do-		4,000.00
Bank Charges		113.00	F 8-522/82/Skt. I	Sanskrit Kavi-		
Professional Charges		820.00	dt. 27-12-82 & 11-3-83	Sammelan		5,000.00
Audit Fee		150.00	-do-	Natya Samaroh		8,000.00
Depreciattion		153.01	-do-	Akshar Shlokam		1,000.00
Miscelleneous Expenses		74.59	F 8-28/83 Skt I	Sanskrit Kavi-		
Telephone Expenses		539.20	dt. 10-19-83	Sammelan		5,000.00
SMARIKA :	5,079.32		-do-	Natya Samaroh		8,000.00
Less : Advertisement ;	2,325.00	2,754.32	-do-	Akshar Shlokam		1,000.00
			Excess of expenditure over income			24,015.26
		1,83,539.11				1,83,539.11

Sd/- Dr. Ramesh Chandra Shulka
Adhyaksha

Sd/- Dr. Ramakant Shukla
Mahasachiva

Sd/- Smt. Rama Shukla
Koshadhyaksha

As per our report on the Balance Sheet
For Sharma Gupta & Co.,
Chartered Accountants
(Seal)
Sd/- D.K. Gupta
LL.B. F.C.A., Partner

Place : 1 24, Asaf Ali Road,
New Delhi

Dated : 16th Apr. 1980

DEVAVANI PARISHAD, DELHI

R-6, Vani Vihar, New Delhi-110059

Balance Sheet as on 31st March, 1984

LIABILITIES	AMOUNT	ASSETEI		AMOUNT
	Rs.			Rs.
Interest free Ioans	21,001.00	Tape Recorder		354.30
Expenscs Payable	78,544.50	Cassettes		695.62
Audlt Fee Payable	150.00	Library books		206.05
		Sundry Debtors		
		Sales Receivable		18,061.50
		Closing Stock		30,736.07
		Manuscript (Cost)		2,000.00
		Subocripton Due		292.00
		Cureent Assets:		
		Cash in hand		90.07
		Cash with S/B. A/C. No. 2886		5;749.15
		Cash with C/A No. 1021		224.91
		Excess of Exp. over Income:		
		Upto 31.12.83	47,480,33	
		Less: Income for 3 month ended 31.3.84	6.194.50	41,285.83
	99,695.50			99,695.50

Sd/- Dr. Ramesh Chandra Shukla	Sd/- Dr. Rama Kant Shukla	Sd/- Smt. Rama Shukla
Adhyaksha	Mahasachiva	Koshadhyaksha

We have audited the above Balance Sheet alongwith Profit and Loss Account for three months ended 31st March, 1984 and found them in agreement with the books and vouchers and per explanation and details given to us. Accounts have been maintained on mercantile basis.

Place : 1/24, Asaf Ali Road, New Delhi-110002	For Sharma Gupta and Co., Chartered Accountants
Dated : 31-8-1984	(Seal)
	Sd/- D.K. Gupta Partner

DEVAVANI PARISHAD, DELHI

R-6, Vani Vihar, New Delhi-110059

Income & Expenditure Account From 1-1-1984 to 31-3-1984

EXPENDITURE		AMOUNT	INCOME	AMOUNT
		Rs.	**By Annunl Subscription:**	Rs.
To Opening Stock		30,736.07	1. Parishad	24.00
To Book Production Exp.	5,375.00		2. Arvachin Sanskritam	638.00
Booles Purchased	4,393.75	9,768.75	By Donation	7,002.00
			By Sale of Books	8,005.20
			Opening Stock:	
To Programme Out of Grant Sanctioned:			(As Valuad by Office bearers)	30,736.07
Expenses (Arvachin Sanskritam)		60.00	**By Grant Received from Ministry of Education & Culture Govt. of India :**	
To Ashulipi Expenses		6,995.00	**Lettor no. & Date** **Purpose**	
To Samaroh & Goshthi		622.00	F-8-28/83-SKT-I Sanskrit Ashulipi dated-29.2.84	5,000.00
To Printing & Stationery		165.85		
To Conveyance		112 00	F-8-28/83 SKT-I Sanakrit Natya Samaroha dated 8.3.84	3,571.00
To Postage		227.10		
To Photo Copy Expenses		40.00	(The expenses for which amount is granted has been already exhausted in the year ended 31.12.1983)	
To Miscellaneous Expenses		55.00		
To Excess of Income Over Expenditure		6,194.50		
		54,976.27		54,976.27

Sd/- Dr. Ramesh Chandra Shukla Adhyaksha	Sd/- Dr. Rama Kant Shukla Mahasachiva	Sd/- Smt. Rama Shukla Koshadhyaksha

As per our report on the Balance Sheet of even date.

For Sharma Gupta & Co.,
Chartered Accountants
(Seal)
Sd/- D. K. Gupta
Partner

Place : 1/24, Asaf Ali Road,
New Delhi-110002

Dated : 31-8-1984

DEVAVANI PARISHAD, DELHI,

R-6, Vani Vihar, New Delhi-110059

Balance Sheet as on 31 st December, 1984

PREV YEAR	LIABILITIES	CURRENT YEAR	PREV YEAR	ASSETS	CURRENT YEAR	
19,901.00	Interest Free		354.00	**Tape Recorder**	354.30	318.87
	Loan	16,401.00		Less : Depreciation		
86,854.50	Expenses			@ 10%	35.43	
	Payable	1,33,627.25			695.62	
150.00	Audit fee		695.62	**Cassettes :**	—	
	Payable	250.00		Add : Purchases	69.56	626.06
				Less : Depreciation @10%		
			206.05	**Library Books**	206.05	
				Addition During the year	84.00	
					290.05	
				Less : Depreciation @10%	29.31	250.74
			24,832.25	**Sundry Debtors**		
				Sales Receivables	32,372.05	
				Subscription Due	292.00	32,664.05

		30,736.07	Closing Stock (as valued by offiice bearers)		37,704.40
		2,000.00	Manuscript (cost)		2,000.00
		47,480.33	**Excess of Expenditure over Income**		
			UPTO 31-12-83	47,480.33	
			Add : Current year	14,123.00	
			Add : Books a/c (enclosed)	14,718.70	76,322.03
			Current Assets		
		25.17	Cash in Hand	91.97	
		350.80	Cash with S/B A/C No. 2886	75.22	
		224.91	Cash with C/A No. C & I 1021	224.91	392.10
1,06,905,50	1,50,278.25	1,06,905.50			1,50,278.25

for DEVAVANI PARISHAD, DELHI

Sd/- Dr. Ramesh Chandra Shukla
Adhyakhsha

Sd/- Dr. Rama Kant Shukla
Mahasachiva

Sd/- Smt. Rama Shukla
Koshadhyaksha

We have audited the above Balance Sheet alongwith Profit & Loss a/c for the three months ended 31st March 1985 and found them in agreement with the books and vouchers produced and as per explanation and details given to us. Accounts have been maintained on mercantile basis.

for SHARMA GUPTA & CO.. Chartered Accountants
(Seal)

Sd/- D.K. Gapta, LL.B., F.C.A., Partner

Place : 1/18B, Dreamland House,
Asaf Ali Road, New Delhi-2

Dated : 26th June 1985

DEVAVANI PARISHAD DELHI, R-6, VANI VIHAR, NEW DELHI-110059.

Income & Expenditure Account For the year ending 31st Dec., 1984

PREV YEAR	EXPENDITURE	CURRENT YEAR	PREV YEAR	INCOME	CURRENT YEAR
36,189.27	To opening stock (seperate a/c)		600.00	By Life Membership fee	301.00
52,123.00	To Book Production Expenses (seperate a/c)			By Subscription for life Sabhasad	100.00
11,945.55	Add: Books Purchased			**By Annual Snbscription for**	
	To Programmes out of grant sanctioned		156.00	1. Parishad	112.00
16,679.42	Expenses Arvachin-Sanskritam (seperate a/c)		1,122.75	2. Arvachin Sanskritam (seperate a/c)	—
33,513.20	Natya Samaroh Expenses		14,993.00	By Donation	7,002.00
14,298.25	Sanskrit Kavi Sammelan	2,633.00	70,109.85	" Sale of Books (seperate a/c)	—
2,838.25	Akshar Shlokam		7.38	" Interest received	20.75
	To Sanskrit Shorthand Expenses		30,736.07	" Closing stock (seperate a/c) (as valued by office bearers)	—
4,290.50	To Samarah and Ghosthi	2,247,00	103.80	Miscelleneous receipt	—
2,310.50	To Printing and Stationary	582.85		**By Grant received from Ministry of education & cultuure, Govt of India.**	
3,702.00	To Royalty paid (seperate a/c)			**Letter No. & Purpose**	
600.00	To Establishment		4,000.00	F-4-24/81 SKT II di. 14.3.83 *Arvachin Sankritam*	—
217.00	To Conveyance/Travelling	633.00	4,000.00	F-4-24/81 SKT II dt 11.7.83 *Do*	—

589.50	To Postage	589.50	5,000.00	F-8-522/82/SKT I Sanskrii Kavi Sammelan dt. 27.12.82 & 11.3.83	—
113.00	To Bank Charges	47.10			
820.00	To Professionai Charges	950.00	8,000.00	" Nataya Smaroh	—
150 00	To Audit fee	250.00	1,000.00	" Aksharshlokam	—
153.01	To Depreciation	144.30	5,000.00	F-8-28/83 SKT I Sanskrit Kavi 10.11.83 Sammelan	—
74.59	To Miscellaneous Expenses	58.00			
539.20	To Telephone Expenses	1,123.00	8,000.00	" Natya Smaroh	—
2754.32	To Smarika Less Advertisement	—	1,000.00	" Akshar Shlokam	—
	To Photography Exp.	40.00		By Income for Arvachin Sanskritam (seperate a c)	
	To Subscription Paid	200.00	5,145.00	Sale of Books	—
	To Cassettes (Gift to Maurtius)	1,750.00	550.00	Advance Income	—
				By Sanskrit Natya Smaroh	3,571,00
	To Foreign Travel (for Samaroh & Ghosti) (half of the total Amount)	13,982.00	24,015.26	By Excess of Expenditure over Income	14,123.00
1,83.539.11		25.229.75	1,83,539.11		25,229.75

for DEVAVANI PARISHAD, DELHI

Sd/- Dr. Ramesh Chandra Shukla
Adhyaksha

Sd/- Dr Rama Kant Shukla
Mahasachiva

Sd/- Smt. Rama Shukla
Koshadhyaksha

As per report on the Balance Sheet of even date :
for SHARMA GUPTA & Co.,
Chartered Accountants
(Seal)
Sd/- D.K. Gupta, LL.B., F.C.A., Partner

Place : 1/18B Dreamland House,
Asaf Ali Road, New Delhi-2
Dated : 26th June 1985

DEVAVANI PAR ISHAD DELHI, R-6, VANI VIHAR, NEW DELHI-110059

Ineome and Expenditure a/c for the year Ended 31st Dec. 84.

(Books Account)

PREV. YEAR	EXPNDITURE		CURRENT YEAR	PREV. YEAR	INCOME	CURRENT YEAR
	To opening stock		30,736.07		By annual subscription Arvachin Sanskritam	1,096.00
	To Book Production Expenditure	38231.40			By sale of Books	47,490.52
	Add Foreign Travel for book exhibition on (half of the total amount)	13982.00			By income from Arvachin Sanskritm	926.50
	Add : Book Purchased	3843 65				
			56,057.05		By Closing Stock (as valued by office bearers)	37,704.40
	To Arvachin Sanskritam Expenditure		13,537.00		By Excess of Expenditure over Income	14,718.70
	To Royalty paid		1,606.00			

1,01,936,12	1,01,936.12

For DEVAVANI PARISHHD, DELHI

Sd./- Ramesh Chandra Shukla Adhyaksha	Sd./- Rama Kant Shukla Mahasachiva	Sd./- Smt. Rama Shukla Koshadhyaksha

As per our report on the Balance Sheet
of even date.

for SHARMA GUPTA & Co.,
Chartered Accountant
(Seal)
Sd./- D. K. Gupta, LL,B., F.C.A.
Partner

Place : 1/18B, Dreamland House,
Asaf Ali Road, New Delhi-2
Dated : 26th June, 1985

DEVAVANI PARISHAD. DELHI
R 6, Vani Vihar, New Delhi-110059

Balance Sheet as on 31.3.1985

LIABILITIES	AMOUNT Rs.	ASSETS	Rs.	AMOUNT Rs.
Interest free Loan	21,901.00	Tape Recorder		318.87
Expenses Payable	1,75,827.00	Cassette		626.06
Audit fee Payable	250.00	Library Books		250 74
		Sundry Debtors		
		Sales Receivable		32,699.25
		Subscriptions Due		292.00
		Manuscript (Cost)		2,000.00
		Current Assets		
		Cash in hand		277.02
		Cash with S/B a/c No. 2886		5,663.09
		Cash with C/A No. C & I 1021		*10.00*
		Closing Stock		*69,566.70*

Liabilities	Rs.	Assets	Rs.	Rs.
		Excess of Expenditure over Income		
		Upto 31.12.84	76,322.03	
		Add : Current year (1.1.85 to 31.3.85)	4,961,79	
		Add : Books a/c (enclosed) (1.1.85 to 31.3.85)	4,990.70	
				86,274.62
	197,978.25			197.978.25

for DEVAVANI PARISHAD, DELHI

Sd/-	Sd/-	Sd/-
Dr. Rama Kant Shukla	Dr. Ramesh Chandra Shukla	Smt. Rama Shukla
(Mahasachiva)	(Adhyakhsha)	(Koshadhyaksha)

We have audited the above Balance Sheet alongwith Profit & Loss a/c for the three months ended 31st March 1985 and found them in agreement with the books and vouchers produced and as per explanation and details given to us. Accounts have been maintained on mercantile basis.

for SHARMA GUPTA & CO.,
Chartered Accountants
(Seal)
Sd/- D.K. Gapta, LL.B., F.C.A,
Partner

Place : New Delhi,
Dated : 26th June 1985

DEVAVANI PARISHAD, DELHI,

R-6, Vani Vihar, New Delhi-110059

Income & Expenditure Account From 1.1.1985 to 31.3.1985 (Excluding Books)

EXPENDITURE	AMOUNT Rs.	INCOME	Rs.	AMOUNT Rs,
To Sanskrit Kavi Sammelan and Sanskrit Drama	32,020.73	By Annual Subscription		12.00
To Postage	39.45	By Donation (80 G)		15,104.00
To Typing Charges	200.00	By Grant Received from Ministry Education		
To Cassette A/C (Gift to Mauritians)	2,000.00	**Letter No.** F-8-604/ 84 SKT1 **Date** 4-3-85 **Purpose** Sanskrit Kavi Sammelan & Drama	20,000	
To Printing and Stationery	33.50	Cassette Purchase for Mauritian institutions	3,750	23,750.00
To Telephone Exp.	239.20			
To Samaroh Gosti	2,605.00			
To Vidvadabhinandan. Exp.	4,785.00			
To Akshar Shlokam Exp.	1,890.00			
To Bank Charges	14.91	By Excess of Expenditure over Income (1-1-85 to 31-3-85)		4,961.79
	43,827.79			43,827.79

Income & Expenditure A/c from 1.1.85 to 31.3.85 (Books a|c)

Expenditure	Amount	Income	Amount
To Opening Stock	37,704.40	By sale of Books	12,831.50
To Book Production Exp.	50,840.00	By Annual Subscription (Arvachin Sanskritam)	163.00
To Postage	90.00	**By Grant paid from Ministry of Education**	
To Typing Charges	100.00	**VIDE Sauction No.** — **Date** — **Purpose**	
To Printing of advertisement Pamphlets	3,000.00	F4-9/85 SKT II — 1-3-85 — Arvachin Sanskritam	4,000.00
To Conveyance	200.00	By Income from Arvachin Sanskritam	382.50
		By Closing Stock	69,566.70
		By Excess of Expenditure over Income (1-1-85 to 31-3-85)	4.990.70
	91,934.40		91,934.40

for DEVAVANI PARISHAD, DELHI

Sd/- Dr. Rama Kant Shukla
(Mahasachiva)

Sd/- Dr. Ramesh Chandra Shukla
(Adhyaksha)

Sd/- Smt. Rama Shukla
(Koshadhyaksha)

As per report on the Balance Sheet of even date :

for SHARMA GUPTA & Co.,
Chartered Accountants

(Seal)

Sd/- D.K. Gupta, LL.B., F.C.A.
Partner

Place : New Delhi,

Dated : 26th June 1985

महामहिमोपराष्ट्रपतिः श्रीरामस्वामी वेंकटररामनमहाभागः स्वामिनाथ-विशेषाङ्कं समुन्मीलयति (३०.४.१९८५)

प्रधानमन्त्री श्री राजीवगान्धी आचार्यरमेशचन्द्रशुक्लाय उ० प्र० संस्कृताकादमीपुरस्कारं समर्पयति (७.५.१९८५)

देववाणी-परिषद्वार्ता

स्वामिनाथविशेषाङ्कस्य समुन्मीलनम्

३०-४-१९८५ ई० तारिकायां देववाणी-परिषदस्तत्त्वावधाने उपराष्ट्रपति-निवासे समायोजिते एकस्मिन् भव्यसमारोहे भारतस्य महामहिमोपराष्ट्रपतिना श्री रामस्वामीवेंकटरामन-महाभागेन अर्वाचीनसंस्कृतस्य 'स्वामिनाथ-विशेषाङ्कः' समुन्मील्य डा० शास्त्रपुरं रामकृष्ण स्वामिनाथ-महाभागाय समर्पितः। तेन संस्कृत-प्रचारस्य आवश्यकता रेखांकिता। अस्मिन्नवसरे भारतीयसर्वोच्चन्यायालयस्य न्यायाधीशाभ्यां न्यायमूर्ति-श्रीरङ्गनाथमिश्र-न्यायमूर्ति-श्री वी० बालकृष्ण एराडि-महाभागाभ्यां ग्रन्थं डा० स्वामिनाथं चावलम्ब्याभिभाषितम्।

समारोहस्य प्रारम्भः श्रीछोटेलालमहाभागस्य निर्देशने दूरदर्शनकलाकारैः प्रस्तुतया सुरभारती-वन्दनयाऽभूत्। परिषत्पक्षतः स्वागतभाषणं महासचिवेन रमाकान्त शुक्लेन धन्यवादज्ञापनं च डा० मण्डमिश्र-महाभागेन कृतम्। कार्यक्रमस्य सञ्चालनं श्रीमत्या कमलिनीदत्त- महाभागया कृतम।

परिषदः सप्तमाष्टमसंयुक्तवार्षिकाधिवेशनं सम्पन्नम्

५-८-१९८५ ई० तारिकायाम् 'आर ६, वाणी-विहार, नयी दिल्ली-११००५९' इत्येतत्स्थाने देववाणी-परिषदः सप्तममष्टमं च संयुक्तं वार्षिकाधि-वेशनं सम्पन्नम्। महासचिवेन रमाकान्तशुक्लेन वार्षिकं विवरणं प्रस्तुतम्। परिषदध्यक्षैः आचार्यश्रीरमेशचन्द्रशुक्लमहाभागैः पद्यमये स्वीयेऽध्यक्षीयाभिभाषणे संस्कृतस्य वर्तमानकालिकावस्थां वीक्ष्य समुचितप्रयत्नान् समाचरितुं विद्वांसो युवानश्च प्रबोधिताः।

अस्मिन्नवसरे अर्वाचीन-संस्कृत-साहित्य-प्रदर्शनी, परिषदो विगतकार्य-क्रमाणां वीडियो-कैसेट-प्रदर्शनम्, ध्वन्यंकितश्रव्यकैसेटानामनुश्रवणं चाऽप्या-योज्यन्त।

साधारणसभायां परिषद आगामिनी कार्यसमितिरित्थं संघटिता जाता- अध्यक्षः आचार्यरमेशचन्द्र शुक्लः, उपाध्यक्षः डा० उमाकान्त शुक्लः

महासचिवः डा० रमाकान्त शुक्लः, सहसचिवः श्री बलदेवानन्द सागरः, कोषाध्यक्षा श्रीमती रमा शुक्ला, सदस्याः आचार्य रवीन्द्र नागरः श्री वेदप्रकाश गौतमः, डा० दुर्गाचरण शर्मा, पं० विष्णुकान्त शुक्लः, श्रीमती कमलिनी दत्तः, श्री विश्वनाथ शर्मा च ।

आचार्यरवीन्द्रनागरस्याभिनन्दनम्

१५-९-८५ ई० तारिकायां परिषदस्तत्त्वावधाने आचार्यश्रीरवीन्द्रनागर-महाभागस्याभिनन्दनं समायोज्यत । **'मौरीशसदेशे संस्कृतस्य स्थितिः'** इति विषयमवलम्ब्य तस्य भाषणमपि सञ्जातम् । तेनोक्तं यद्विगतेषु त्रिषु वर्षेषु मौरिशसदेशे संस्कृताध्ययनं प्रति लोकानां विशेषाभिरुचिर्वर्धिता । आचार्य-नागरमहाभागेन तत्र संस्कृतपुस्तकानां प्रेषणस्यावश्यकता रेखाकिता । स्मरणीयं विद्यते यत् मौरिशसदेशे वर्षत्रयमुषित्वा आचार्यनागरमहाभागो अगस्तमासे दिल्ली प्राप्तः । मौरीशसेऽस्य प्रेरणया अन्ताराष्ट्रिकसंस्कृत-सम्मेलनमप्यायोज्यत ।

१५-९-१९८५ तारिकायां रात्रौ आचार्यनागरमहाभागोऽमेरिकां प्रति प्रस्थितः । स तत्र ओहियोनगरे भारतीयसंस्कृतेः प्रचारकार्यार्थं तत्र वासिभि-र्जनैराहूतोऽस्ति । परिषत्पक्षतो महासचिवेन डा० रमाकान्तशुक्लेन तस्मै सौप्रस्थानिकं व्याहृतम् । परिषदध्यक्षेण आचार्यश्रीरमेशचन्द्रशुक्लेन समारोहस्याध्यक्ष्यं सम्पादितम् ।

(रमा शुक्ला)

संस्कृत-जगद्वार्ता

(१) उत्तरप्रदेशसंस्कृताकादम्याः पुरस्कारवितरणोत्सवः

७-५-१ ८५ तारिकायां नवदिल्ल्यां तीनमूर्ति-सभागारे प्रधानमन्त्रिणा श्रीराजीवगान्धि-महाभागेन उत्तरप्रदेशसंस्कृताकादमी-पुरस्कारा विद्वद्भ्यः कविभ्यश्च समर्पिताः । पुरस्कृतेषु विद्वत्सु पं० रघुनाथशर्म-आचार्य रमेशचन्द्र शुक्ल-डा० मण्डन मिश्र-श्रीविष्णुदत्तशर्म प्रभृतयः सन्ति । प्रधानमन्त्रिणा संस्कृतस्य महत्त्वमुपवर्णितम् ।

(२) 'इटली'-देशे उपनिषत्संगोष्ठी

१५ मई १९८५ तः १७ मई १९८५ ई० पर्यन्तम् इटलीदेशे ट्यूरिन विश्वविद्यालयस्य प्राच्यसंस्थानेन (ओरिएण्टल-इन्स्टीट्यूटेन) उपनिषदोऽवलम्ब्य विचारसंगोष्ठी आयोजिता यस्यामनेकैर्विद्वद्भिः स्वशोधपत्राणि पठितानि ।

देववाणी-परिषद आजीवनसदस्यया किञ्च दिल्लीविश्वविद्यालयस्य मैत्रेयीकालेजे संस्कृतप्राध्यापिकया डा० शशि तिवारी-महाभागया तत्र ईश-कठ-मुण्डकोपनिषत्सु पत्रत्रयं प्रस्तुतं यद्धि विद्वत्समूहेन नितरामभिनन्दितम् ।

(३) मध्यप्रदेश-संस्कृत-अकादमी मेघदूत-संगोष्ठीमायोजितवती

मध्यप्रदेश-संस्कृत-अकादमी ४-५.६.१९८५ तारिकयोः मध्यप्रदेशस्य अम्बिकापुर (सरगूजा) नगरे मेघदूत-संगोष्ठीमायोजितवती । गोष्ठ्या उद्घाटनम् आषाढस्य प्रथमदिवसे ४.६.१९८५ तारिकायां सरगूजामण्डलान्तःपाति-'रामगढ'-गिरौ विराजमानायां सोपानबद्धपार्वतनाट्यशालायां मध्यप्रदेश-विधानसभाध्यक्षेण श्रीराजेन्द्रप्रसादशुक्ल महाभागेन कृतम् ।

द्विदिवसीयेऽस्मिन् समारोहे 'रामगिरि' पर्वतस्य प्रत्यभिज्ञानार्थं विदुषां विचारविमर्शः, आदिवासिजनानां नृत्यप्रदर्शनं, प्रबुद्धरौहिणेयनाटकस्य सागर-विश्वविद्यालयनाट्यपरिषदा प्रस्तुतिः; संस्कृत-कविसम्मेलनम् इत्येतदादिकाः कार्यक्रमा आयोज्यन्त ।

अस्मिन् समारोहे प्रो० रेवाप्रसाद द्विवेदि-पं० सुन्दरलाल त्रिपाठि-डा० रमाकान्त शुक्ल - डा० सुधाकराचार्य त्रिपाठि - पं० चन्द्रभानु त्रिपाठी - प्रो० श्रीनिवासरथ-डा० कमलेशदत्त त्रिपाठि-डा० शिवदत्तशर्म चतुर्वेद-डा० राजेन्द्र मिश्र-डा० राधावल्लभ त्रिपाठि-डा० रामचन्द्र तिवारी-प्रभृतिभिर्विद्वद्भिः 'रामगढ़' पर्वतस्य 'रामगिरि'-रूपेण परीक्षणं रामवनगमनमार्गस्य संशोधनं च विहिते ।

अकादम्या सचिवो डा० भास्कराचार्य त्रिपाठिमहाभागोऽस्याः संगोष्ठ्याः संयोजनार्थं नूनमभिनन्दनीयः ।

(४) उत्तरप्रदेशसंस्कृतकादम्या वृन्दावनाधिवेशनम्

२१, २२, २३-६-१९८५ ई० तारिकासु वृन्दावनस्य आनन्दवृन्दावनाख्याश्रमे पूज्यस्वामिश्रीमदखण्डानन्द - महाराजानां सान्निध्ये उत्तरप्रदेशसंस्कृताकादम्या क्षेत्रीयमधिवेशनं संवृत्तम् ।

डा० वासुदेवकृष्ण चतुर्वेद-महाभागस्य संयोजकत्वेऽनुष्ठितेऽस्मिन्नधिवेशने अकादम्या अध्यक्षैः पं० करुणापति त्रिपाठि-महाभागैः अकादम्या गतिविधयो व्याख्याताः ।

त्रिदिवसीयेऽस्मिन् समारोहे - संस्कृत-कव्वाली - गान - अन्त्याक्षरी-प्रहसन-शास्त्रार्थ-कविगोष्ठी-प्रभृतयः कार्यक्रमा आयोजिता अजायन्त ।

(५) नागपुरे स्वातन्त्र्योत्तर-संस्कृत-साहित्यचर्चासत्रम्

नागपुरविश्वविद्यालयस्य स्नातकोत्तर-संस्कृत-विभागेन नागपुरे १०, ११, १२—अक्टूबर १९८५ ई० तारिकासु विश्वविद्यालयानुदानायोगसाहाय्येन अखिलभारतीयं स्वातन्त्र्योत्तर - संस्कृतसाहित्य-चर्चासत्रमायोजितम् यत्र पञ्चसत्रेषु स्वातन्त्र्योत्तरसंस्कृतसाहित्यमवलम्ब्य भारतस्य विभिन्नप्रदेशेभ्य आगतैर्विद्वद्भिः द्वात्रिंशत्पत्राणि पठितानि । अर्वाचीनसंस्कृतस्य सम्पादकेन डा० रमाकान्तशुक्लेन दिल्लीपरिसरे विरचितं स्वातन्त्र्योत्तरं संस्कृतसाहित्यमवलम्ब्य शोधपत्रं पठितम् ।

चर्चासत्रस्योद्घाटन-समारोहस्य आध्यक्ष्यं नागपुरविश्वविद्यालयस्य कुलगुरुणा डा० मधुसूदन अ० चान्सरकरमहाभागेन मुख्यातिथित्वं च मुम्बई उच्च न्यायालयस्य नागपुर-खण्डपीठ-न्यायाधीशेन न्यायमूर्ति-श्री सूर्यकान्त पुराणिकमहाभागेन सम्पादितम् ।

चर्चासत्रावसरे विभिन्नाः सांस्कृतिककार्यक्रमाश्चाप्यायोज्यन्त येषु 'सीता-निर्वासन' - कथामवलम्ब्य नृत्यनाटिका, स्वतन्त्रमहा-विद्यालय-नाटकं, बाल-प्रहसनञ्च प्रामुख्यं भजन्ते। महाकवि श्रीधर भास्कर-वर्णेकरमहाभागाना-माध्यक्ष्ये अखिलभारतीयं संस्कृत-कवि-सम्मेलनमपि सम्पन्नं यत्र श्रीमती लीना रस्तोगी-डा० राजेन्द्र मिश्र-रमाकान्त शुक्ल-कविरत्नश्रीकृष्णप्रसादघिमिरे-श्रीमती कमल अभ्यंकर-डा० ब्रजकिशोरस्वामी-विद्वन्मणिकेशवचन्द्रदाश-डा० भास्करा-चार्य-त्रिपाठि डा० शिवदत्त शर्मचतुर्वेद-डा० अरुणोदय जानी-पं० वसन्तगाडगिल प्रभृतिभिरष्टादशकविभि: स्व रचनाः प्रस्तुताः।

डा० कुसुम पटोरियाया. संयोजकत्वे एका पुस्तकप्रदर्शनी अप्यायोज्यत यत्र चतुश्शतप्राया अर्वाचीनसंस्कृतरचना प्रदर्शिता अभूवन्। अस्मिन्नवसरे 'नवोदय'-नाम्नी स्मारिकापि प्रकाशिता जाता या म०म० स्व० वासुदेव मिराशी-महाभागानां पुण्यस्मृतौ समर्पितास्ते।

चर्चासत्रस्य साफल्यार्थं नागपुरविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः प्रो० के०रा० जोशी, प्रपाठिका डा० रूपा कुलकर्णी अधिव्याख्याता प्रा० पंकज चांदे तथा चान्ये सर्वेऽपि संयोजन-सञ्चालन कर्मणि रताः सहयोगिनः साधुवाद-मर्हन्ति।

यद्यस्मिन् चर्चासत्रे पठितानां शोधपत्राणां प्रकाशनं सद्य एव क्रियेत तर्हि अर्वाचीन संस्कृत-साहित्यस्य गुण-परिमाणाभ्यां विद्वांसः सम्यक् परिचिता भवितुं शक्यन्ते। संयोजका अस्यां दिशि दत्तावधाना भवितुं सादरमनुरुध्यन्ते।

(६) श्री० भि० वेलणकरस्य रचनानामर्धशती

१५-१०-१९८५ तारिकायां मुम्बईस्थिते भारतीयविद्याभवने देववाणी-मन्दिरस्य तत्त्वावधाने श्री० भि० वेलणकरमहाभागानां ५० तम रचनाप्रकाशने एकः समारोह आयोज्यत। अस्मिन् समारोहे श्री० भि०वेलणकरकृतं 'महाराष्ट्र-वर्धापनम्' 'भारतीय-नृत्य-एकता' 'प्राचीन भारतीय भौतिक विज्ञान' (मराठी)-इति ग्रन्थत्रयं समुन्मील्यत। देववाणी-मन्दिरस्य अध्यक्षवर्याणां श्रीवेलणकर-महोदयानाम्, अन्येषां कार्यकर्तॄणां च सम्मानोऽपि जातः। नालन्दा-नृत्य-विद्यापीठ-विद्यार्थिभिः डा० श्री० कनक रेले-महाभागायाः संयोजकत्वे नृत्यमपि प्रस्तुतम्। समारोहस्याध्यक्ष्यं तर्कतीर्थश्रीलक्ष्मणाशास्त्रीजोशी - महोदयः कृतवान्।

(७) संस्कृते न्याय निर्णयः

इलाहाबाद उच्चन्यायालये न्यायमूर्तिश्रीबनवारीलालयादवमहाभागैः संस्कृते न्यायनिर्णयो दत्तः। यदि नाम न्यायालयेषु संस्कृताशुलिपिज्ञाः सुलभाः स्युस्तर्हि अन्येऽपि संस्कृतज्ञा न्यायाधीशाः संस्कृते निर्णयदाने सौकर्यमनुभवेयुः। अत्र न्यायनिर्णयस्य कश्चनांशः प्रस्तूयते। अयमंशः बिहारप्रान्तीय संस्कृतसाहित्य-सम्मेलनस्य त्रैमासिकमुखपत्रात् 'संस्कृत-सम्मेलनात्' (२२/३ सितम्बर १९८५) साभारं समुद्ध्रियते :—

इलाहाबाद उच्च न्यायालय समक्षे

सिविल प्रकीर्ण याचिका संख्या ३४६९ सन् १९७५ ई०

लक्ष्मीनारायणादयः..........................याचिगणः।

प्रति

उप संचालक चकबन्दी वाराणसीत्यादयः......प्रत्यर्थिगणः।

निर्णयः

न्यायमूर्ति श्री बनवारी लाल यादव द्वारा परिदत्तः निर्णयः।

इयं याचिका भारतीयसंविधानस्य २२६ अनुच्छेदेष्वन्तर्गतं उपसंचालकः चकबन्दी वाराणसेय निर्णय एवमादेश दिनांक १३-१२-७४ अभिखण्डितं कर्त्तुं प्रस्तुता।

याचिकायाः तथ्यं संक्षेपे ईदृशमस्ति। भूमिखण्डं संख्या ५, ६, ७, एवम् ६१७ विवादग्रस्तमस्ति। अस्मिन् भूमिखण्डे आधारवर्षे याचिगणस्य नामानि अङ्कितानि आसन्। प्रत्यर्थिगण अष्ट संख्यातः त्रयोदश संख्यायावत् पिता अम्बिकाप्रसादः तथा त्रिसंख्यातः सप्तमस्य पिता महावीरः च सप्त श्रेण्यामङ्कितावास्ताम्।

याचिगणैः एकापत्तिः उत्तर प्रदेश चकबन्दी अधिनियमस्य धारा ९ (२) अन्तर्गतं अनेन कथनेन सह प्रस्तुता यत् प्रत्यर्थिगणस्य नाम्नाम् प्रविष्टयः अशुद्धाः सन्ति। अतः ताः निरसनीयाः प्रत्यर्थिगणेन अस्माकं प्रतिवादः कृतः। तेषां कथनमासीत् वयं वादग्रस्त भूमिखण्डस्य भूमिधराः स्मः इति। इदम् भूमिखण्डं तेषां पूर्वजानां नाम्ना भोगबन्धकम् आसीत्। याचिगणपूर्वजाः षष्टि (६०) वर्षावधिषु बन्धकपत्रमोचनं न कृतवन्तः। अतः तेषामधिकाराः समाप्ताः। प्रत्यर्थिगणानाम् वादग्रस्तभूमौ भूमिधराधिकाराः सम्प्राप्ताः।

चकबन्दी अधिकारी महोदयः ३ जनवरी १९६६ दिनाङ्के आदेश द्वारा निर्णयं प्रत्यर्थिगणपक्षे दत्तवान् । बन्दोबस्त अधिकारी चकबन्दी निर्णय २५ अक्तूबर १९६६ दिनांङ्के याचिगणस्य पुनर्वादं (अपील) स्वीकृतवान् तथा चकबन्दी अधिकारिणः निर्णयमभिखण्डितवान् । प्रत्यर्थिगणः पुनरीक्षणं प्रस्तुतं कृतवान् । उपसंचालकः चकबन्दी १५ मई १९७० दिनाङ्के आदेश द्वारा पुनरीक्षणं स्वीकृतवान् । अस्यालोच्यादेशस्य विरोधे याचिकेयं प्रस्तुता । इयं याचिका निर्णयार्थं मत्समक्षे आगता ।

अहम् श्री रवीन्द्रनारायण सिंहम् याचिगणम् प्रति तथा श्री गजाधर प्रसाद भार्गवम् वरिष्ठाधिवक्तारम् प्रत्यर्थिगणं प्रति श्रुतवान् । याचिगणात् अयम् तर्कः प्रस्तुतः यत् आलोच्यादेशः निरस्तः भवेत् । षष्टि (६०) वर्षावधिषु बन्धक पत्र मोचनं न कृतवन्तः अतः याचिगणस्य अधिकाराः समाप्ताः । इयं स्पष्ट परिलक्षिता त्रुटिः अस्ति । इममपि तर्कं कृतवान् यत् धारा चतुर्दश जमीन्दारी उन्मूलन भूमि व्यवस्थाधिनियमः प्रभावी भविष्यति । अतः प्रत्यर्थिगणस्य समस्ता अधिकाराः समाप्ताः । इममपि तर्कं कृतवान् यत् बन्धकपत्रम् सिद्धम् न कृतम् । एतद् विपरीतं निर्णयं कृत्वा चकबन्दी उपसंचालकः त्रुटिमकरोत् । १९७५ प्रयाग साप्ताहिक निर्णय पृष्ठ ५२२ (शिव शंकर राजस्व परिषद आदि १९७५ ए० डब्लू० सी० ५२२) तथा १९७३ प्रयागविधि पत्रिका पृष्ठ ३८१ (१९७३ इलाहाबाद ला जर्नल पृष्ठ ३८१) इति द्वे व्यवस्थे प्रस्तुती कृते ।

अहमुभयपक्षाभ्यां प्रस्तुततर्कान् ध्यानपूर्वकमचिन्तयम् । पत्रावल्युपरि प्रस्तुत निर्णयपत्राणां तथा सम्पूर्णोपलब्धसाक्ष्यानामवलोकनं कृतवान् । चकबन्दी-उपसंचालकः स्वालोच्यादेशेन पत्रावल्युपर्युपलब्धसाक्ष्यानां विवेचनायाः पश्चात् निर्णयमदात् यत् बन्धकः सन् १८८४ ई० वत्सरेष्वभवत् अथवा न अभवत् तथ्यस्यायं निष्कर्षः अस्मिन् विधे,प्रश्नः निहितः नास्ति । अतः इमं प्रश्नं अस्य उच्च न्यायालस्य भारतीय संविधानस्य द्विशतषड् विंशत्यनुच्छेदान्तर्गत अधिकार क्षेत्रे विचारणीयः प्रश्नः नास्ति ।

बन्धकपत्रे निर्दिष्ट तिथ्युपरि बन्धक द्रव्यस्य अदाने भारतीय अवधि अधिनियम अनुच्छेदेषु १४८, इत्यस्यान्तर्गत षष्टि वर्षावधिः (६० वर्ष) बन्धक विमोचनार्थं निर्दिष्ट- संजातः । अस्याः तिथेः अन्तर्गत समये विमोचनाय वादपत्रस्य अप्रस्तुतीकरणे याचिगणः ये बन्धककर्त्तारः आसन् तेषामधिकाराः समयबाधिताः अभूवन् । सन् १८८४ इसवीतः सन् १९६५ ईसवीं यावत् षष्टि वर्षादप्यधिकः समयः व्यतीतः, अतः याचिगणनां नामाधिकाराः समाप्ताः ।

शिवशंकर प्रति राजस्व-परिषदादि (१९७५ प्रयाग साप्ताहिक पत्रिका ए० डब्लू० सी० ५२२) काचित् समानताप्रस्तुतयाचिकातथ्यैः सह नास्ति। अस्यां व्यवस्थायामयम् प्रश्नः आसीत् यत् अधिभोगाभिधारिणः बन्धकधारस्य प्रतिकूलम् अध्यासनकर्ता किम् अधिकारं परिपक्वं करिष्यति तथा वादपत्रम् सिविल न्यायालये प्रस्तुतम् भवितुर्महति। अस्याः व्यवस्थायाः तथ्यं प्रस्तुत याचिकायाः भिन्नमस्ति। अनेन प्रकारेण १९७३ प्रयाग विधि पत्रिका (१९७३ ए० डब्लू सी० ३८१) पृष्ठस्य तथ्यं भिन्नमस्ति।

अतः अनया व्यवस्थया याचिगणः कमपि लाभं न प्राप्स्यति।

याचिगणाः इममपि तर्कं प्रस्तुतवन्तः यत् सः जमीन्दारी उन्मूलन-भूमि व्यवस्था-अधिनियस्य चतुर्दश धारायाः (धारा १४) लाभाय अधिकारिणः सन्ति। इत्थं षष्टि वर्षावधिनियमः याचिगणाधिकारविरुद्धः नास्ति।

अयम् याचिगणतर्कोऽपि न्यायालयेन स्वीकर्त्तुं योग्यो नास्ति। अवधि अधिनियमः प्रक्रिया सम्बन्धितः मन्यते। अवधेः समयः वादपत्र प्रस्तुतीकरणस्य दिने एवं निर्धारितो भवति। वादहेतुकैः न कश्चित् सम्बन्धो भवति। अवधि-अधिनियमः नूतनाधिकारः सर्जनाय नास्ति किन्तु अस्मै हेतवेऽस्ति यत् कत्यवध्यभ्यन्तरे कश्चित् विशेषवाद-पत्रं प्रस्तुतं स्यात् वा प्रक्रिया प्रारब्धा भवतु। प्रस्तावितावधौ समाप्ते सति अधिकाराः समाप्ताः भवन्ति। तदा नवीन परिनियमस्य विधिविधानस्यागमने वा समाप्ताधिकरणम् पुनर्जीवनकरणेन शक्यम्।

यतोहि याचिगणाधिकाराः षष्टिवर्षावधेः (६० वर्ष) जमीन्दारी उन्मूलन भूमि व्यवस्था अधिनियमस्य प्रभावितिथेः प्रागेव समाप्ताः अभूवन्। अतः याचिगणाः धारा चतुर्दशस्य लाभं प्राप्तुं न अर्हन्ति।

(संस्कृतसम्मेलनम् २२/३/पृ० ३५-३६)

(८) उज्जयिन्यां कालिदास-समारोहः

उज्जयिन्यां कालिदास-समारोहः २३.११.१९८५ तः २९.११.१९८५ यावत्संयोजयिष्यते। समारोहस्योद्घाटनं भारतस्य महामहिमराष्ट्रपतिः श्री ज्ञानी जैलसिंहमहाभागः करिष्यति। अस्मिन् भव्ये समारोहे-कालिदास-अश्वघोषविषयकं शोधचर्चासत्रम्, वाचिकाभिनयमुपलक्ष्य विचारगोष्ठी, पं. सूर्यनारायणव्यास-स्मारकभाषणमालायां डा० ठाकुर जयदेवसिंहमहाभागस्य भाषणम्, विविधनाटकानां प्रदर्शनम्, मूर्तिचित्रकलाप्रदर्शनी अन्तर्विश्वविद्यालयीय वादविवादप्रतियोगिता इत्येतदादिकाः कार्यक्रमा आयोजयिष्यन्ते-इति सूचयति कालिदाससमितिसचिवः श्री श्रीनिवास रथ-महाभागः।

(प्रस्तोत्री—रमा शुक्ला)

अर्वाचीनसंस्कृतस्याग्रिमेऽङ्के समीक्ष्याणि पुस्तकानि

१. प्रतिपद् (विद्वन्मणि: केशवचन्द्र दाश:)

१९८४

२. कथासप्तकम् (डा० (श्रीमती) नलिनी शुक्ला)

१९८४

३. सायकी (डा० प्रकाश पाण्डे)

१९८४

४. वेला (श्रीब्रह्मदेव शास्त्री)

१९८४

५. मृद्वीका (अभिराज डा० राजेन्द्र मिश्र:)

१९८५

६. दिग्दर्शिनी (पत्रिका) (सं० डा० पतितपावन बानार्जी
डा० ब्रजकिशोर स्वाईं)

१९८५

७. संस्कृतसम्मेलनम् (पत्रिका) (सं० श्री चन्द्रदीपशुक्ल:)

१९८५

अगस्त

स्वतन्त्रता की जिस ज्योति को
हमारे बहादुर देशवासियों ने
प्रज्वलित किया—
आज वह करोड़ों लोगों का मार्ग
प्रशस्त कर रही है।
कोई भी आंधी इसे बुझा नहीं सकती।
यही वह ज्योति है—
जिसने हमारी नियति को बदल दिया,
हमें परतंत्रता की बेड़ियों से मुक्त कराया।
इसी प्रकाश पुंज ने
हमें मजबूती और आत्मनिर्भरता की
दिशा दिखाई।
यह दीप-शिखा
अंधेरे में आशा की किरण है।

हमारी चिरन्तन ज्योति

davp 85/141

"मेरा जीवन ही मेरा संदेश है"

सत्य
अहिंसा
शांति
प्रेम
सहिष्णुता
अभय
समानता
सादगी
स्वदेशी

गांधी जी के लिए ये केवल शब्द या प्रतीक ही नहीं, वे उनके प्रत्येक कार्य और व्यवहार का मूलमंत्र थे । इन्हीं से उनके जीवन में मानवता का सार समाविष्ट हुआ और उनका हर वाक्य एक सच्चा संदेश है ।

ऐसा संदेश जो सतत् प्रेरणा देता रहे ।




"एकला चलो रे"
सत्य पथ पर
आपके अग्रसर होने का
दृढ़ निश्चय ।
आपका साहस
आपका नेतृत्व
विपन्न और दलितों के प्रति
आपकी चिंता ।
भारत और भारतीयता
के प्रति आपकी आस्था ।
सर्वत्र मानवाधिकारों
के प्रति आपका संघर्ष ।
हमें स्मरण आता है,
आता रहेगा ।
आपके स्मरण का
सही ढंग हम जानते है –
वह है अटूट एकता
और देश निर्माण ।
शांति और सद् भाव की
एक सतत् स्मृति ।
डीएवीपी 85/296

अर्वाचीनसंस्कृतम्

(R.N. 34554/79)

★

१. प्रकाशन का स्थान — नयी दिल्ली

२. प्रकाशन की आवधिकता — त्रैमासिक

३. मुद्रक तथा प्रकाशक का नाम, राष्ट्रीयता तथा पता — डा० रमाकान्त शुक्ल (देववाणी-परिषद्, दिल्ली-कृते) भारतीय (६, वाणी-विहार, नई दिल्ली-११००५९

४. सम्पादक का नाम, राष्ट्रीयता तथा पता — डा० रमाकन्त शुक्ल भारतीय ६, वाणी-विहार, नई दिल्ली-११००५९

५. उन व्यक्तियों के नाम और पता जो इस पत्रिका के मालिक या साझेदार हैं अथवा जो इसकी सारी पूँजी के एक प्रतिशत से अधिक के हिस्सेदार हैं — देववाणी-परिषद्, दिल्ली ६, वाणी-विहार, नई दिल्ली-११००५९

मैं, डा० रमाकान्त शुक्ल, यह घोषणा करता हूँ कि उपर्युक्त विवरण मेरी पूरी जानकारी और विश्वास के अनुसार सही है।

डा० रमाकान्त शुक्ल

महासचिव, देववाणी-परिषद, दिल्ली

प्रकाशक

देववाणी-परिषदा प्रकाशिता ग्रन्थाः

२. सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः) रु० २०.

१. भाति मौरीशसम् (डा० रमाकान्त शुक्लः) रु० ६.

३. श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्) रु० ४०.

४. श्रीकृष्णचरितम् (डा० रमेशचन्द्र शुक्लः) रु० ३०.

५. कूहा (काव्यम्) (डा० उमाकान्त शुक्लः) रु० २०.

६. सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः) रु० १५.

७. आभाणकमञ्जरी („ „) रु० १५.

८. मेघदूत : एक विश्लेषण (डा० देवीदत्त शर्मा) रु० २०.

९. रघुवंश : एक विश्लेषण („ „) रु० २०.

१०. अभिज्ञानशाकुन्तल : एक विश्लेषण („) रु० २०.

११. जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ३०.

१२. अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) („) रु० ३०.

१३. „ „ „ (द्वितीय खण्डः) („) रु० ३०.

१४. राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः) रु० ४०.

१५. अभिनवहनुमन्नाटकम् (डा० रमेशचन्द्र शुक्लः) रु० २०.

१६. अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः) रु० २०.

१७. भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ४०.

१८. संस्कृत साहित्य में राष्ट्रिय भावना
(डा० हरिनारायण दीक्षित) रु० १५०.

१९. साधारणीकरण और समानान्तर चिन्तन
(डा० सुलेखचन्द्र शर्मा) रु० २००.

२०. अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु० २०.

२१. रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया) रु० ६०.

२२. साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः) रु० ४०.

२३. पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः) रु० २०.

२४. स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी) रु० ३०.

२५. रसदर्शनम् (डा० रमेशचन्द्र शुक्लः) रु० ५०.

२६. श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः) रु० २०.

२७. सुरश्मिकाश्मीरम् („) („) रु० २०.

२८. पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु० १०.

२९. श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्) रु० १०.

३०. महाप्रयाणम् (श्रीकृष्ण सेमवालः) रु० २०.

३१. पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः) रु० २०

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

दूरभाष : ५५३४९९